Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

no.107 Maudgalya Purâṇ.
Puran in Sânskrit.
9th. canto I to 52 page
6th. canto
24th. canto complete.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दिसर्वम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

आदिसर्वमा हा

॥इति नवमखंडप्रारंभः॥

॥९॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

केनसंराधितोदेवोदेहधारिब्रह्मवत् कैर्देवंवशमानीयधर्ममस्थाप्ययत्प्रभुः ९ इत्यादिसर्वमाहा
त्म्यंवदयोगीन्द्रसत्तम त्वत्समंनास्तिब्रह्मांडेभक्तिदायकपात्रकं १० सूतउवाच एवंपृष्टोमहायोगी
मुद्गलःशौनकान्नब्रवीत् दक्षंहृष्टमनाःसाक्षात्ज्ञात्वाभक्तियुतंपरं ११ मुद्गलउवाच॥ ॥दक्षत्वंयो
गिनंचासिनिश्चितंसर्वभावतः नान्यथागणनाथस्यकथायांजायतेरसः १२ धन्यत्ववल्लभूता
रस्यचरितंसर्वसिद्धिदं कथयिष्यामिमत्प्यातेसमासेनप्रजापते १३ विस्तरेणहिकोवाथाश्चव
दाधानब्रह्मविरे समर्थास्तत्रकोहंतुस्वल्पज्ञानप्रधारकः १४ अतस्तेकथयिष्यामिचेतिहासं
पुरातनं शेषस्यशंकरस्येवसंवादेनसमन्वितं १५ एकदाशेषनामाश्वप्रणम्यशंकरंपुरा पद्म
सिद्धिदंदक्षएंसर्वज्ञंकरुणानिधिं १६ ततःपरतरंनास्तिवेदस्मृतिप्रमाणतः तेध्यानसंयुतस्वाभिन्न

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मत्तो से कं परं शिवं १७ अतः संशययुक्तोहं दृष्ट्वा तं सर्वभावतः किं मोहार्थं महेशान करोषि वद तं
तुवा १८ मुद्गल उवाच ॥ ॥ एवं दृष्टः शिवः साक्षात्समुपाच सुहर्षितः भक्तं योगप्रियं दृष्ट्वा साधुचेष्टा
समन्वितं १९ शिव उवाच ॥ ॥ एवं दृष्टोहमेकांते सनकाद्यैर्महर्षिभिः तत्तेहं संप्रवक्ष्यामि ज्ञानं
गाणेशबोधकं २० एकदा सनकाद्याश्च दृष्ट्वा मां नियमे रतं पप्रच्छुस्त्वं यथा मे च तथा संशयसंयुताः
२१ सनकाद्या ऊचुः ॥ ॥ महेश्वरो भवान् साक्षात्त्वदंशेनैव विद्यते कं ध्यायसि महादेव मिथ्या मोह
प्रदायकं २२ तेषां तद्वचनं श्रुत्वा हर्षितोहं च कश्यप ऊचे योगं गणेशाख्यं तत्त्वं शांतिप्रदायकं २३
ईशत्वमनिशत्वं च मायायुक्तं न संशयः ब्रह्मणि ब्रह्मभूतस्य कथं तद्भवति द्विजाः २४ येनेशत्वं च म
त्वमनीशत्वं तथापरं जनेभ्यस्त्वं गणाधीशं भजामि भक्तिसंयुतः २५ अहंकारयुताः सर्वे न जानंति गजाननं ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तं जित्वाहं मुनीन्द्राश्च सेवेतस्य पदद्वयं २६ शिवस्य वचनं श्रुत्वा सनकाद्यास्तमब्रुवन् विस्मिता मा
नसंयुक्ता गणेशज्ञानलालसाः २७ सनकाद्या ऊचुः॥ ॥अभिमानं महादेव जेतुं नैव प्रशक्यते। चेद्रा
दिभिश्च देवेशैरस्माभिरन्ययोगिभिः २८ नरोहं देवरूपो हमात्माहं स्वस्वरूपकः ब्रह्माहं च म
हेशानश्चाहं तेजुष्मतिष्ठितं २९ अहंकेनैव योगेन जितस्त्वया सदाशिव वद तस्य चरित्रं त्वं विस्तरे
ण सुशांतिदं ३० शिव उवाच॥ ॥अहंब्रह्मणि विप्रेशा गतं ब्रह्मास्मिना सह महावाक्यमये योगे ब्र
ह्माहं दृश्यते न च ३१ अहं नास्मि न था ब्रह्मा नेति ब्रह्माहमंजसा बोधार्थं साधयेनच्चेदं महावाक्यं सम
तं परं ३२ ततः संशयसंयुक्ताः सनकाद्यास्तमब्रुवन् ब्रुवंद्वचनं नाथ वद योगं मंपरं ३३
अतः सुत्तमयोगेन वद योगं महेश्वर दयया शिष्यमुख्यांश्च तारणाय सुशांतिद ३४ शिव उवाच॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अत्रतः कथयिष्यामि चेतिहासं पुरातनं अहंभावविनाशार्थमहंकारस्वसौख्यदं ३५ एकदा ज्यो
तिषांनाथः सूर्य आत्मा शरीरिणां ब्रह्मणाभिषिक्तः स कर्मणां राज्यकर्मणि ३६ स प्राप्य राज्य
मुग्रं तत्कर्मणां ज्योतिषांपतिः अभिमानयुतोऽसौ तं बभूव देववदेवपः ३७ कर्मणा सृष्टिकर्त्ता वै ब्र
ह्मा लोकपितामहः पालकः कर्मणा विष्णुर्हरः संहारको भवत् ३८ कर्मणोऽन्नप्रभावेण पावका
ग्निरेव च कर्माधीनमिदं भाति भानुरेवं सुगर्वितः ४० अहंकारेण संयुक्तस्तिष्ठन्कुंभे च एकदा प्रभुः
तस्य छीकासमुत्पन्नः पुरुषः सुंदराकृतिः ४१ स पपात महीपृष्ठे न ज्ञातस्तेन भानुना महाकायो वि
शालाक्षो बलयुक्तो व्यराजत ४२ तत्राकस्मात्समायातः शुक्रः सर्वार्थकोविदः दृष्ट्वा तं हर्षसंयु
क्तः शुभभावसंयुतः ४३ शुक्र उवाच ॥ ॥ कोऽसि त्वं कुत आयातो वासः कर्तुमिच्छसि किं वद माता पिता

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चेतेत्रातातकः किमत्र रहेष्यसि ४४ पुरुषउवाच ॥ ॥सत्यपृष्टो द्विजश्रेष्ठ तस्य पृच्छिकासमुद्भवः अ
नाथो हं महाभागपतितो धरणीतले ४५ त्वं दयायुक्तभावेन रक्ष्यसि मां न संशयः त्वदधीनो भ
विष्यामि शाधि मां मुनिसत्तम ४६ शिवउवाच ॥ ॥तस्य तद्वचनं श्रुत्वा मुक्तो योगविदांवरः ध्या
नेनालोक्य तत्कर्म तमुवाच प्रभावहृत् ४७ मुक्तउवाच अहं मातात मुक्तं नस्त्वं सत्यन्नात्र संशयः
अहं त्वामाभवस्वाद्य कुरु तपो महामते ४८ एवमुक्त्वा ददौ तस्मै गणेशाष्टाक्षरं मंत्रं विधिसम
न्वितं ततः सोंतर्हितो भवत् ४९ अहं तत्र तपस्तेपे ध्यात्वा गणपतिं हृदि निराहारपरो भूत्वा मंत्रज
पपरायणः ५० शीतोष्णवाततवर्षादि सहन्हृदनिश्चयः जितात्मवाजितप्रयत्नेन तोषमाप्यास विघ्नपं
५१ ॥ ॥इतिश्रीमदांसेमौद्गले महापुराणे अष्टमखंडे धूम्रवर्णचरित्रे अहमुत्पत्तिवर्णनं नाम प्रथमो ध्यायः १॥५॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥ ॥श्रीमन्महागणाधिपतयेनमः॥ ॥शिवउवाच॥ ॥एवंवर्षसहस्रेणदिव्येनतंगजाननः यथोप्र
सन्नभावेनमत्याबरार्थमादरात् १ आस्वाहस्त्रिनेत्रश्चगजवक्त्रोमहोदरः चतुर्भुजश्चपाशा
द्यैःशोभितःसिद्धिबुद्धियुक् २ एकदंतःस्वर्पकर्णोदिवैर्मुनिसमन्वितैः संस्तुतःस्वगणैश्चैवसे
वितःसर्वदायकः ३ तंदृष्ट्वाहंसमुत्थायप्रणामकृतांजलिः प्रजपामासविघ्नेशंसिद्धिबुद्धिस
मन्वितः ४ ततःक्रमेणदेवान्समुनीन्प्रणम्यपुनःप्रभुं प्रणम्यप्रतुष्टावगणेशंप्रकृतांजलिः
५ अहमुवाच॥ ॥नमस्तेगणनाथायहेरंबायपरात्मने सर्वेभ्योवरदात्रेतेवरदायनमोन
मः ६ ब्रह्मसुब्रह्मनाभायनिजेषुस्वस्वरूपिणेसांख्यायपरतोध्यानस्थितेषुतेनमोनमः ७
ज्ञानेषुबोधरूपायसोहंदेहिषुतेनमः देहेषुबिंदुरूपायविघ्नेशायनमोनमः ८ स्वच्छंदब्रह्मदेवाय

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विघ्नवेपालकेषुते संहर्तृषुशिवायवैकदंतायनमोनमः ९ प्रकाशकेषुसूर्यायमोहकेषुचशाक्त
ये देवेषुदेवराजायविनायकायतेनमः १० अग्नयेदाहकेषुतेयमायनीतिधारिणां रक्षःसुनैर्ऋता
येवरुणपकिर्णायवेनमः ११ वायवेबलयुक्तेषुनिधिषुधनपायते रुद्रेषुकालरुद्रायलंबोदरायवै
नमः १२ प्रजापतिषुदक्षायनागेषुशेषरूपिणे अनंतविभवायैवकिंस्तौमितेनमोनमः १३
यंस्तोतुंनसमर्थाश्चवेदाश्चयोगिनोमताः तंकिंस्तवामिविघ्नेशमल्पबुद्धिप्रधारकः १४ धन्योऽहं
कृतकृत्योऽहंसफलोमेभवंपिता माताकुलंतथाज्ञानंत्वदङ्घ्रियुगदर्शनात् १५ एवमुक्त्वागणेशानंप्र
णनाममहासुरः हर्षेणमहतायुक्तस्तमुवाचगजाननः १६ श्रीगणेशउवाच॥ ॥त्वयाकृतमिदंस्तो
त्रंसर्वदंमद्धियंभवेत् पठतेशृण्वतेचैवममयिभावप्रदायकं १७ पुत्रपौत्रादिकंसौख्यंभुक्तिंमुक्तिंलभेन्नरः॥॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ॰अ॰पु॰ यस्यपठनमात्रेणमन्दभक्तिंममनाशिनी १८ वरान्वृणुमहाभागमनेप्सितान्ददाम्यहं तपसास्तोत्रमु अ॰१०८

५ ख्येनतुष्टोहंतेहमादरात् १९ अहंउवाच॥ ॥प्रसन्नोसियदानाथभक्तिंदेहिफलदायकां यंयमिच्छामि

तंतंमेसफलंसर्वदास्तुच २० मायाविकारयुक्तोस्योमरणंनैवमेभवेत् राज्यंब्रह्माण्डगोलस्यदेहि

मेभोगसंयुतं २१ आरोग्यंविजयंदेहिसंग्रामेचातुलंतथा अमोघास्त्रंसदामेस्तुत्वत्प्रसादाद्धदे

हिमे २२ तथेतितमहंदेवोजगद्गणनायकः अंतर्धायस्वमात्मानंनिजलोकंजगामह २३

ततोतिहर्षसंयुक्तोहंजगामकविंपुनः तंप्रणम्यस्ववृत्तांतंकथयामासविस्तरात् २४ श्रुत्वामुनिव

रःसोपितंप्रशस्यमहासुरं असुराणांक्रियामाससंमेशान्काव्योमहामुनिः २५ तस्याज्ञपालकावंतःसर्व ५

समागतामुनिं असुरास्तान्महातेजाःकाव्योजगाददैत्यहितं २६ अहमसुरवर्णांतंश्रुत्वातेशुक्रवचनंततः

हर्षितास्तं प्रणम्यादौ जगुर्वचो हितावहं २७ असुरा ऊचुः ॥ ॥आज्ञापय महायोगिन्कार्यं चेतोगतं
प्रभो करिष्यामो वयं दासास्त्वत्पादस्य जनान्विताः २८ तेषां वचनमाकर्ण्य काव्यः सर्वार्थकोविदः
ज्ञात्वा तानन्वेदनिष्ठांश्च समानाय्य पुनर्जगौ २९ ततोऽभिषेचयामासासुराणां राज्यकर्मणि यथाशास्त्र
विधानेन दैत्याधीशं चकार ह ३० प्रधानास्तस्य पंचाशत्सुहृदस्तत्र सायुताः शंखो वेदघ्नकः
कालात्पेशुनो धर्मधारकः ३१ नगरं निर्ममे सोऽपि विषयप्रियनामकं अहमसुरकस्तत्र राज्यं च
कार हर्षितः ३२ समायाता निजावासार्थं जना वर्णाश्रमान्विताः आसुरा विविधाश्चैव सुखं तत्र सुः समा
स्थिताः ३३ प्रमादासुरपुत्रं वै ममतां रूपशालिनीं तस्मै ददौ प्रमादश्च यौवनस्थां महात्मने ३४
ममतासंयुतो रेमे दैत्यो हंप्रहर्षितः मोहितो मायया तस्या ममताया वशोऽस्थितः ३५ तस्यां पुत्रो महा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नीयौ जनयामास देवपः गर्गः स्तोष्टस्तेयानर्मिमचक्रुः सर्वे द्विजातयः ३६ एवं व कुरोतकाले त मुवाच
प्रमादकः किं स्थितोसि महावीर जयदेवादिवान्नृमो ३७ नरदानवेंद्रन लेनिर्भयोसि न संशयः व
राणां सफलं सर्वे कुरुभोगपरं महः ३८ तथेति श्वशुरं सोपि जगाद हि प्रतापवान् समानाय्य क
विं तत्र यजयामास देवपैः ३९ तस्याज्ञां गृह्य देवेशो देवान्समाकुर्य परान् तैः संयुतः सम्मुखेण
प्रयाणे भुभुमेसुरः ४० दिग्जयार्थमहं तत्र सर्वानाज्ञापयत्प्रभुः सन्नद्धास्ते समाजग्मुर्देवाः परम
दारुणाः ४१ ॥ ॥इति श्रीमदांत्ये मौद्गल्ये महापुराणे ऽष्टमखंडे धूम्रवर्णचरिते अहंराज्यप्राप्तिवर्ण
नं नाम द्वितीयोध्यायः॥ ॥२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥श्रीमहागणाधिपतये नमः॥ ॥शिव उवाच॥ ॥ स तथा रुद्रः स्वयं तत्राहं निर्जगाम देवपैः॥ पुत्रौ तथा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रधानाश्च सन्नद्धा असुरा ययुः १ नानावर्णमहाक्रूराः कालस्य भयदायकाः नानावाहनगाः सर्वे
तमनुप्रययुः किल २ चतुरंगबलमध्ये शुम्भो दैत्यनायकः अपारसेनया युक्तः पृथ्वीं जेतुं मनो
दधे ३ शंखवाद्यो महावीरा जग्मुर्नृपासुदारुणाः जित्वा राजकुलं सर्वं समाजग्मुर्महासुरं ४ नृपा
स्तैः किं द्विजा युद्धं करिष्यंति महाबलैः मृताः केचित् हताः केचित् केचित्तान् शरणं ययुः ५ करदास्ते
नृपान् सर्वान् तेषां राज्ये स्वसेवकान् स्थापयामासुरव्यग्रा दैत्येन्द्रा हर्षसंयुताः ६ सप्तद्वीपवतीं निल
पृथ्वीं पातालमाययुः दैत्येन्द्रा नागमुख्यांस्ते जयार्थं जयशालिनः ७ शेषो नागयुतस्तेषां शरणं समु
पागतः ज्ञात्वा वरबलं योगी सामं चक्रे महासुरैः ८ वार्षिककरभावं स स्वीकृत्य स्वस्थलं ययौ ना
गेन्द्रैः संवृतः शेषोऽभूत् स्वयं तेन चेतसा ९ तथापि दैत्यमुख्यास्ते दैत्यं दैत्यसमन्विताः समीपे तस्य संस्था

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

प्ययमुरहंमहाबलाः १० ततोदैत्येंद्रसंयुक्तः काव्येनाहंप्रतापवान् स्वर्गपंथोमहातेजावरगर्वस
मन्वितः ११ दूतंसंप्रेषयामासाहमिंद्रस्यैवसंन्निधौ सगत्वादेवराजायप्रणम्यतद्वचोजगौ १२
ततःक्रोधसमायुक्तइंद्रोदेवेंद्रमुख्यकैः किंकार्यंगिरसंसर्वैर्जगामप्रणनामतं १३ तेनापिसत्कृ
तःसोपिजगादवचनंपरं सर्वेषांदुःखदंप्राप्तमासुराणांजयावहं १४ इंद्रउवाच॥ ॥अहंवर
समायुक्तःसमायातोमहाबलः दूतेननोवदस्वघःशरणंयाहिदेवपैः १५ अतःसुरैःसमायुक्तोभ
वंतंसर्वविदंततं समायातोवदस्वामीनूत्सदाज्ञावशागानयं १६ गुरुरुवाच॥ ॥गणेशवरदानेन
मत्तोसौनात्रसंशयः जेष्यतिसकलंतस्माद्धरणंनैवशोभनं १७ अतोवयंविधातारंप्रजामहेलर
न्विताः सन्तोषःसर्वभावेनकरिष्यतिहितंजनः १८ ततःसर्वेविधातारंजग्मुर्देवाःसवासवाः प्रणम्यतं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जग्मुः सर्वे रत्नां तं दैत्यसंभवं १९ श्रुत्वा देवद्युतो ब्रह्मा तान् गृहीत्वा शंकरं ययौ तं प्रणम्य जगौ सर्वं स देवो
रत्नमुल्बनं २० सोपि निःश्वस्य तैः सार्द्धं जगाम विष्णुमादरात् प्रणम्य कथयामास रत्नां तं दुःखदा
यकं २१ श्रुत्वा क्रोधयुतो विष्णुः समाश्वास्य महेश्वरं सदेवं तं जगादासौ पराक्रमयुतं वचः २२
॥ ॥विष्णुरुवाच॥ ॥हनिष्यामि महादैत्यं महासुरसंयुतं मायायुक्तमलमेवं तं नूनं मन्नतस्य बाधने
२३ एवमुक्त्वा महादेवं तत्रैव संस्थितोभवत् देवैः सह महाभागाः प्रतीक्षन् दैत्यपौरुषं २४ अहंकारा
सुरस्तत्र ज्ञात्वा रत्नीतमादरात् प्राविशाम रावत्यां दैत्येंद्रैर्हर्षसंयुतः २५ इंद्रासनसमारूढः सेव्य
मानोप्सरोगणैः गंधर्वैर्गीयमानः स शुशुभे परमश्रिया २६ ततो देवपदेषु स स्थापयामास चासुरान्
स्वर्गभोगं च कारेव दैत्येंद्रैः श्वशुरेण च २७ ततः स दैत्यसंघस्तैः सन्नद्धः प्रययौ द्विजाः ब्रह्मलोकं महो

[illegible]

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

निवेशाहर्षयुक्तस्तन्नगरं दैत्यसंयुतः ब्रह्मासनसमासीनो बुभुजे विविधान्सुरान् २९ ततः स दैत्यपः
सर्वेज्ञात्वा रत्नांतमंजसा कैलासं भानुतोर्कं नुशक्तिलोकं यथाक्रमात् ३० तत्र विल्वाससंयुक्तो बु
भुजे विविधान्सुरान् विकुंठं विजयार्थं स प्रययौ दैत्यपर्वतः ३१ दूतं संप्रेषयामास कान्तं
सर्वभयंकरं स गत्वा केशवं नत्वा जगाद वाक्यमुल्वणं ३२ कालरुवाच॥ ॥अहमसुरसंयुक्तः
समायुद्धोमहाबलः ३३ तेनाहंसाममावार्थं प्रेषितस्तव सन्निधौ ३३ । विकुंठं त्यज्य देवेशोर्युध्य
स्वंपत्नीतरुचिः नारायणेन हि न्मिलां नोचेद्युद्धे पतोभव ३४ कालस्य वचनं श्रुत्वा केशवः क्रो
धसंयुतः जगाद तं महादैत्यं दहन्निव प्रहर्षयन् ३५ ॥ ॥विष्णुरुवाच॥ ॥किं मां पापस्त्व रूपस्त्वं
वदसि मंद विक्रम हनिष्याम्यहमद्यैव दैत्ययुक्तं महासुरं ३६ गच्छ दूत स्वमावस्थं नह [illegible] न्मिलां खलाधम॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वपदं राज्यदैत्येशाधीनोऽहं किं भवामि तु ३७ ततोऽहंकारकं गत्वा कालासुरः प्रतापवान् वृत्तांतं क
थयामास दैत्यं दैत्यैः संयुतं परं ३८ श्रुत्वा दैत्यगणाः सर्वे क्रोधयुक्ता बभूविरे अहंकारासुरे ऐ
व युक्ता युद्धे पतावमुः ३९ तान्निवार्य महाबाहुरहं क्रोधसमन्वितः जगाद दैत्यमुख्यान् सवा
क्यं सर्वहितावहं ४० अहमुवाच ॥ ॥ किमर्थं भ्रमसंयुक्ता भविष्यथ महाबलाः अमोघास्त्रव
रैर्युक्तः करिष्याम्यधुना सुखं ४१ एवमुक्त्वा स्थितो दैत्यः सज्यं कृत्वा महाधनुः मुमोचाग्नि
मयं चास्त्रं मंत्र्य क्रोधसमन्वितः ४२ सहसास्त्रं प्रजज्वाल दिशो दश महोज्वलं विकुंठे दाहया
मास देवान् सर्वान् समंततः ४३ ततः क्षोभयुता देवास्तत्यजुर्वनगणास्तकं तेनैव तत्त्वशांतं तु बभुव तेजसा
न्वितं ४४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ततः स्वेदयुताः सर्वे पपलुर्भयसंयुताः अग्निनापीडितास्ते तं सक्काविकुंठमेव च ४५ दृष्ट्वा स्वयं व
रुणश्चाजगाम रणमूर्द्धनि चंद्रेण संयुतः सोपि जले स्थित्वा व्यवस्थितः ४६ जलेन न च शांतोभू
दग्निः परमदारुणः दाहयुक्तः पपालासौ वरुणश्चंद्रसंयुतः ४७ ततः शक्तिः समायाता महास्त्रं
वरुणात्मकं मोचयामास तस्मात्तु जलधाराप्रवर्तिता ४८ घृतेन संयुतस्तत्र यथाग्निर्जलसं
युतः अज्वालमायया तस्याहंकारस्य विशेषतः ४९ ततो दाहसमायुक्ता शक्तिः पपाल तत्क्षणात् ॥
क्रुद्धो भानुः स्वयं तत्राजगाम क्रोधसंयुतः ५० सोपि स्ववीर्यसंयुक्तं वरुणास्त्रं जलोमध्ये दर्शच
दाहसंयुक्तः पपाल च दिवाकरः ५१ ततः शिवः स्वयं तद्वये क्रोधसमन्वितः हतो यमः पपालासौ
दाहयुक्तः स्वभावतः ५२ ततो निस्वेदसंयुक्तो विष्णुः स्वयमुपागतः तस्याज वारुणास्त्रं स स्वसत्वासंयुतं परं ५३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तथापिनसशांतोभूदग्निःपरमदारुणः जज्वालज्वालीवसर्वत्रदाहयामासदेवतान् ५४ ततोग्नि
दाहसंयुक्तःपपालश्चजनार्दनः विष्णुनासंयुताःसर्वेदिवेशाःपपलुर्भयात् ५५ गत्वागिरिगुहा
संस्थावभूवुर्भयसंकुलाः कंदादिभक्षणंतस्तेदिवसान्नतिचक्रमुः ५६ ज्ञात्वावृत्तांतमेवाहंसमा
हरस्यशासनेकेआस्यंजगामदेवैःद्रैर्विकुंठंहर्षसंयुतः ५७ तत्रस्थितोभिमानःसमेनेकृतार्थतां
परां नमन्तःश्रेष्ठइत्येवंगर्वयुक्तोवभूवह ५८ ततोगर्वेणिवस्यैवपदेस्थाप्यतथासुरः श्रेष्ठंविकुं
ठनाथंसचकारपुत्रमुत्तमं ५९ पैशुनंशक्तिलोकस्यवेदघ्नंसोरलोकपं प्रमादंब्रह्मणोनाथंचका
रमदसंयुतः ६० शांत्वमिंद्रपदस्यैवनाथंचक्रेमहासुरः कालंयमस्यलोकस्यकमलंवरुणस्यच ६१
कुबेरस्यपदेस्थाप्याधर्मधारकमादरात् ततःस्वनगरंसर्वैःसमायातोमहाबलः ६२ [redacted]

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्रस्थःप्रपश्यासासोब्रह्मांडंलोकसंकुलं अहंमेनेन किंचिद्वैसमंभाग्येनतेजसा ५३॥ ॥इतिश्रीम
दांडेमौ॰माहा॰अष्टम॰धर्मवर्णचरित्रेअहंब्रह्मांडविजयोनामतृतीयोध्यायः३
॥ ॥श्रीमहागणाधिपतयेनमः॥ ॥शिवउवाच॥ ॥ततोहुंकारकोदेवोमंतंपरस्त्रीत्वांत्वसः॥ ॥
ब्रह्मवंदेस्वपैःसर्वैर्नागकन्याःसमानयत् १ देवकन्यानराणांचकन्याःस्त्रियोविशेषतः स
माहृत्यबलात्सोपिबुभुजेसर्वदूषकः २ मद्यमांसपरोनित्यं बभूवद्विजसत्तमाः गणेशांराज्यमु
ष्टात्मापापकर्मपरोभवत् ३ एकदाहंसभासंस्थंजगादधर्मधारकः देवेंद्रैःप्रेरितःसर्वैःसेस्ता
करपुटंवचः ४ अधर्मधारकउवाच॥ ॥जितंत्वयामहाभागब्रह्मांडंलोकसंकुलं जगदीशस्त्व
मेवैकोनान्यःकश्चनविद्यते ५ देवाश्चिन्मुमुक्षवःसर्वेभवंतिवनसंस्थिताः शान्तोनभववेदेषुस्तुतासर्वेषांकामितः६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शास्त्रादिभिश्च देवैश्च मरिष्यंति कदापि न अमरा वेदवादेषु कथिताः पश्यमानद ७ कर्मान्ता अमराः
सर्वे नष्टे कर्मणि देवाप मरिष्यंति न संदेहः कर्मणः खंडनं कुरु ८ जिताल्लोकराज्यं च कर्तारो बहवो
भवन् असुराः काल योगेन देवैर्द्रु निहताः पुरा ९ अतश्छिद्रं समालोक्य लोकान्हनिष्यंति देवपाः अहं
तेषां विनाशार्थं यत्न सुरश्चोरनायकैः १० अधर्मधारकस्यैवं वचः श्रुत्वा महासुराः साधु साधु ब्रुवंति
स्म शंखाद्यास्तत्र संसदि ११ ततो हंकारको हृष्टो जगाद वचनं हितं साधु प्रोक्तं त्वया दैत्य कुरु सर्वैः
समन्वितः १२ हृष्टो दैत्यसमूहैः संयुक्तो जगाम हर्षितः अधर्मधारको मृत्यां च कार कर्मखंडनं १३
कर्मखंडनभावेन हाहाकाररवाकुलाः जनावर्णाश्रमैर्हीनाः कृतास्तेन दुरात्मना १४ देवतायतना
दानि खंडयामास सर्वतः गणेशस्य च क्षेत्राणि मर्त्याः सर्वास्तथा द्विजाः १५ सर्वत्रा हं प्रतिमा अस्थापिता भूमिमंडले॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हृजकाराक्षसास्तत्र हतास्तेन सुपापिना १६ गृहे गृहे ऽभिमानस्य प्रतिमा मानवैः किल पूज्याः कृता द्वि
जास्तेनासुरं कर्म प्रवर्तितं १७ कृत्वाऽधर्मधरः कार्यं प्रयत्नेन सुहर्षितः तेनालिप्तजितः सोऽपि मेने कृता
र्थतां परां १८ एवं कर्मणि नाशेन तु वर्णसंकररूपिणः प्रजा जातास्ततो देवा दुःखयुक्ता बभूविरे १९ मुनि
भिः सहिताः सर्वे देवा उपायमन्विताः विचारं च प्रकुर्वन्तस्तस्य नाशार्थं दैत्यपस्य ते २० ततो ब्रह्मा महेशा
धानुचाखवेदसंयुतः मयायुक्ताश्च यं सर्वे जितास्तेन दुरात्मना २१ माया नानाविधा प्रोक्ता वेदेषु नात्र
संशयः तया हीनो गणेशात्तो नान्यः कश्चन विद्यते २२ पंचचित्तमयी बुद्धिः पंचभ्रांतिकरी तथा सिद्धिस्त
योः पतिः सोऽपि मायिको गणनायकः २३ सिद्धिर्बुद्धिः परा माया तयोः परा न विद्यते अतो विघ्नेश्वरो दैत्यं
हन्निष्यति न संशयः २४ गणेश वरदानेन मत्तोऽसौ दैत्यनायकः विस्मृतो गणनाथं तं मंत्रे सत्कारस्थितो भवत् २५

लोका३ ११

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गणेशक्षेत्रकाणि वै स्वं डयामास दुर्मतिः गणेश पूजनं सर्वकर्मस्वादौ विशेषतः २६ अतो विघ्नसमा
युक्तं जातं तं देवसत्तमाः अस्माभिः पूजितो ढुंढिर्हनिष्यति महासुरं २७ अधुनैकाक्षरं मंत्रं जप्त्वा
ध्यात्वा गजाननं पूजयित्वा तपोयुक्तास्तोषयामो विशेषतः २८ शिव उवाच ॥ ब्रह्मणो वचनं श्रुत्वा दे
वा मुनिसमन्विताः साधु साधूक्त्वं तस्मात्तथा चक्रुः सहेश्वराः २९ निराहारसमायुक्ता एकाक्षरविधा
नतः तोषयामासुरत्यंतभक्तियुक्ता गणेश्वरं ३० एवं वर्षशते पूर्णे प्रसन्नो गणनायकः ययौ तान्देवमु
ख्यांश्च वरदो मुनिसत्तमान् ३१ मूषकोपरि संस्थं ते ददृशुर्द्विरदाननं प्रणेमुर्हर्षसंयुक्ताः पूजयामासुरा
दरात् ३२ पुनः प्रणम्य विघ्नेशं देवा मुनिसमन्विताः तुष्टुवुर्गणनाथं ते धूम्रवर्णं प्रहर्षिताः ३३ देवर्षय ऊचुः
धूम्रवर्णाय सर्वेभ्यः सर्वदायकरूपाय ते गणेशाय परेशाय परात्पराय ते नमः ३४ लंबोदराय विघ्नानां पतये ते नमो नमः॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लंबोदराय विघ्नानां पतये ते नमो नमः विघ्नकर्त्रे चलद्धर्त्रे हेरंबाय नमो नमः ३५ अनादये विशोष
णज्येष्ठाय सर्वविज्जित मनोवाणीविहीनाय मनोवाणीमयाय ते ३६ नमस्ते ब्रह्मरूपाय ब्रह्मणे ब्र
ह्मदायिने ब्रह्मणां पतये तुभ्यं मंत्रनाथाय ते नमः ३७ महोरूपाय देवाय देवदेवेशरूपिणे देवेभ्यो
वरदात्रे ते महोदर नमो नमः ३८ आदिपूज्याय सर्वेषां मात्रे पित्रे नमो नमः सर्वरूपाय कर्मा
त्मन् कर्मरूपाय ते नमः ३९ सर्पकुण्डलिनिष्ठाय वीराय परमात्मने चतुर्भुजाय धर्माय गुणेशा
य नमो नमः ४० कर्त्रे हर्त्रे च भर्त्रे ते परज्ञानस्वरूपिणे स्वाधीनाय महामोहदात्रे हर्त्रे नमो नमः
४१ यत्र वेदादयः स्वामिन् शांतिं प्राप्ताश्च योगिनः गणेश तत्र के नाथ वयं ते स्तवने विभो ४२ १२
वर्णधर्माय पित्रे तव्यक्तरूपे लयि पुरा । धर्मा वर्णाः समाख्याता वेदेषु वेदवादिभिः ४३ धन्या वयं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

महाभागस्त्वदंघ्रियुगदर्शनात् अव्यक्तो व्यक्ततां प्राप्तो भक्तभावात्स्वकारणात् ४४ एवमुक्त्वा
प्रणेमुस्तं धर्मार्थवर्णे सुरर्षयः उत्थाप्य धर्मार्थवर्णांस्तान् जगाद मेघनिःस्वनः ४५ धर्मार्थवर्णे
उवाच ॥ ॥ भवत्कृतमिदं स्तोत्रं सर्वसिद्धिप्रदायकं भविष्यति महाभागाः पठते शृण्वते परं ४६
पुत्रपौत्रादिकं धान्यं धनं लभेन्नरस्तथा यं यमिच्छति तं तं तु सफलं संभविष्यति ४७ वरा
न्वृणुत देवेशा मुनयो मनसेप्सितान् दास्यामि तपसा तुष्टः स्तोत्रेण भवतां परान् ४८ गणेश
वचनं श्रुत्वा देवर्षयः प्रणम्य तं जगुः प्रहृष्टभावेन देवदेवेशमादरात् ४९ यदि प्रसन्नभावे
न वरदोसि गजानन तदाहंकारकं देहं जहि सर्वज्ञ ते नमः ५० सर्वेभ्यो दुःखदाता स कर्मरतं
उनकारकः समस्तश्च प्रणाशात्तदा सुखं भविष्यति ५१ मायायुक्तविहीनस्त्वं तव हस्तान्महासुरः ॥ ॥

मरिष्यति न संदेहस्तस्मात्त्वं जहि मानद ५२ अस्मे त्वया भयं दत्तं तेन सर्वे पराजिताः वयं ते श-
रणं प्राप्ता रक्ष रक्ष महाप्रभो ५३ तव पादे दृढां भक्तिं देहि नो व्यभिचारिणीं तथा विघ्नविहीना-
स्त्वपदं प्राप्स्यामहे वयं ५४ एवमुक्त्वा गणेशानं प्रणेमुस्ते सुरर्षयः तथेति तानथोक्त्वासावं-
तर्द्धानं चकार ह ५५ ॥ ॥इति श्रीमदांते मौद्गल्ये० अष्ट० खं० ध्य० देवमुनिवरप्रदो नाम चतुर्थोऽध्या-
यः॥४॥ ॥
॥ ॥शिव उवाच॥ ॥ततो देवेन्द्रमुख्याश्च देवा मुनिसमन्विताः हर्षयुक्ता विशेषेण निरेधासुरं हतं
॥१॥ कालमावं प्रतीक्षंतः स्थितास्तत्रैव विघ्नपं अभजंस्ते मुदा युक्ता गणपं सुप्रियात्मकं २
धर्म्म[illegible]वर्णः स्वयं साक्षाद्ब्रह्मोत्थं द्विजोत्तमाः॥ ॥जगाम देवनाथस्य मयदः सर्वभावतः ३

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सशोकसंयुतः प्रातः समुत्थाय महासुरान् समानाय स्वयं स्वप्नं कथयामास विस्तरात् ४
॥अहमुवाच॥ ॥शृणुत शंखमुख्याद्य स्वप्ने मे दृष्टं भयंकरं धूम्रवर्णेन गणेशेन क्रोधयुक्तो ब
भूव ह ५ तस्य क्रोधात्समुत्पन्नोऽग्निः सर्वं नगरं च मे दाहयामास शस्त्राण्यस्त्राणि कुंठीन्यिचा
भवन् ६ पराभवविहीनोऽहं ध्वस्तस्तेन महात्मना देवाः स्वस्थानगाः सर्वे कृता मुनिगणैः सह ७
अतः स्वल्पेन कालेन भविष्यत्यशुभं ध्रुवं तदर्थं यत्नसंयुक्ता भवध्वं दैत्यनायकाः ८ अभिमा
नवचः श्रुत्वा तं पुनर्दैत्यनायकाः जगुः खेदसमायुक्ता वचनं हितकारकं ९ दैत्या ऊचुः॥ ॥
मा कुरुष्व वृथा चिंतां तव नाशुभं कथं भवेत् वरदानप्रभावेण निर्भयोऽस्य सुरेश्वर १० स्वप्नः सदा
जनानां तु भवति नात्र संशयः जाग्रति न भवेत्सोऽपि तत्र किं दुःखदं भवेत् ११ स्वप्ने धनादिकं लब्ध्वा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मरणादिकमेवचा जागर्तिचेत्स्वयं जंतुर्नकिंचिन्नश्यतीत्यहो १२ एवंहास्यादिकंकलासमाभ्या
स्यासुरोत्तमं असुराः स्वग्रहं गत्वाशोकादिकं प्रचक्रिरे १३ अथ शृणुत विप्रेंद्राश्चरित्रं विघ्न
पस्य च अस्मांकेध्वसंभवर्णः सतत्रायंयोमहाबलः १४ पंचयोजनदूरस्य नगराद्वैतपस्य च
संस्थितस्तत्र विप्रेंद्रो नारदः सहसागतः १५ दृष्ट्वा गणेश्वरं देवं तमागत्य प्रणम्य सः गानं चकार
हर्षेण भक्त्या साश्रुप्रलोचनः १६ तमुवाच गणाधीशो गच्छ त्वं दैत्यमंदिरं अहंकारं वदस्वैर्वना
स्यं सांमकरेमहत् १७ देवाः स्वस्थानगाः संतु जनाः स्वाचारसंयुताः नागाः स्वराज्यकर्तारो
भवंतु मत्प्रसादतः १८ राज्यं कुरु सदा दैत्य नगरस्थो महासुर नोचेद्युद्धेन जेष्यामि करिष्यामि
जगद्धितं १९ तथेति गणनाथं स जगाद नारदो मुनिः अहंकारासुरं गत्वा कथयामास तद्वचः २०

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सश्रुत्वा क्रोधसंयुक्तो बभूव तं जगाद ह। गच्छ विप्रेश्वरं विप्र वद मे वचनं महत्॥२१॥ सदेवं धर्मरा
णं च हनिष्यामि न संशयः। तदाज्ञावशगो नाहं भविष्यामि कदाचन॥२२॥ एवमुक्तस्ततो विप्रं नार
दं दैत्यनायकः। नारदो गमनार्थं च ययौ जगाद तद्वचः॥२३॥ नारदस्य वचः श्रुत्वा क्रोधयुक्तो ग
जाननः। हंतुमहं मनश्चक्रे शस्त्रं दधार विघ्नपः॥२४॥ अथ नारदविप्रर्षिस्तं प्रणम्य ययौ सुरान्
जगाद सकलं तेभ्यो वृत्तांतं हर्षसंयुतः॥२५॥ देवास्तं नम्य सर्वे ते धर्मराजं समाययुः। मुनिभिः शास्त्र
संयुक्ताः स्तुत्वा तं ते जगुर्वचः॥२६॥ आज्ञां कुरु महाभाग धर्मराज नमोऽस्तु ते। देहि योद्धुं च देवेशांस्त्व
द्दासांस्ते वशस्थितान्॥२७॥ तेषां वचनमाकर्ण्य धर्मराजः प्रतापवान्। उवाच तान् स्वभक्तांश्चक्रेभं
शोभनं कृतवन्तः॥२८॥ धर्मराज उवाच॥ तिष्ठध्वं देवदेवेशाः पश्यध्वं कौतुकं महत्। हनिष्यामि महा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

देहं मच्छासनपरा ऽत्युरवं २९ एवमुक्त्वा गणाधीशो मुमोच पाशमुत्तमं स्वशस्त्रेन समागत्यानंत
रूपं बभ्रव ह ३० पत्रत्रस्त्रासुरेन्द्रस्य लाकंठे पपात तत्क्षणात् मृता देत्याः पुरस्थांत संस्थाः पाशबन्धादि
ताः ३१ हाहाकारश्च सर्वत्र बभ्रव नगरे तदा देत्या गला महादैत्यं कथयामासुरुत्वणं ३२ किं
स्थितोसि महाराज मृता दैत्याः समंततः पाशैः सर्वत्र संस्थैश्च धर्मवर्णस्य मानद ३३ तेषां वचन
माकर्ण्य दुःखयुक्तो महासुरः जगाद सचिवान्दैत्य वचनं भयसंकुलः ३४ अहमुवाच ॥ ॥अहो का
लमुखा दैत्याः स्वप्ने स संबभ्रव ह किं भविष्यति दैत्येशा विपरीतं तु दृश्यते ३५ इति तस्य वचः श्रुत्वा
पुत्रौ तातं महात्मनः ऊचतुस्तं भयोद्विग्नं गर्वभ्रेष्टौ महासुरौ ३६ गर्वभ्रेष्टावूचतुः ॥ ॥ किं शोच
सि महाभाग मयं तेन भविष्यति मायायुक्तोधर्मवर्णः किं करिष्यति तेप्रियं ३७ देहधारी समायातो देवपक्षपरायणः ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हनिष्यामो न संदेहः स देवं पश्य पौरुषं ३८ एवमुक्त्वा महादैत्यो गर्वो गर्वसमन्वितः अथैवः प्रणम्य दे
वीं द्रं युद्धाय जग्मतुस्ततः ३९ प्रधानाद्यैः समायुक्तौ पाशस्त्रदानिप्रच्छक्रतुः पाशस्य तेजसा तत्र दग्धासा
नुसमंततः ४० ततो भयप्लुताः सर्वे प्रधानाश्च बभ्रमिरे पाशतेजः प्रदग्धास्ते पपलुः सर्वतो दिशं ४१
ततोतिक्रोधसंयुक्तो खड्गहस्तो महासुरो पाशाभिघेनमायातो महाबलपराक्रमो ४२ तेजसा
दग्धदेहस्थो तथापि खड्गधारया पाशं गच्छन्नकर्तुं तो समुद्युक्तो बभ्रमतुः ४३ ततः पाशेन संब
द्धो रुद्धश्वासो महासुरो गतप्राणो च संग्रामे बभ्रमतुर्महर्षयः ४४ ततो हाहारवं कृत्वा दैत्याः सर्वे
भयातुराः पपलुर्दशदिग्देशे गतमानाः सुविक्लवाः ४५ ततः केचित्समागम्याहंकारं तेवचः परं ज
गुः क्रूरं महतो पुत्रौ तव दैत्यपते मृधे ४६ तेषां वचनमाकर्ण्य मूर्छितः स महासुरः सावधानः ततः सर्वैः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सुरोऽत्र भयसंकुलः ४७ धूम्राक्षोऽयं ततः सोऽपि युद्धाय संगतो भवत् मुमोचास्त्राणि सर्वाणि चैतं
पाशं महोज्ज्वलं ४८ पाशस्य तेजसा तानि दग्धानि च समं ततः ततोऽतिभयसंयुक्तो विचारमकरो
द्धृदि ४९ अमोघास्त्रमयं मे तु वरं निष्फलसंयुतं चकार पाशमस्त्रं तं चित्रं किं वा भविष्यति ५०
पलायनपरः सर्वैः स्वगृहे दैत्यनायकः आगतस्तद्गुरुं तत्र समानाय्याब्रवीद्वचः ५१ ॥छ॥छ॥
॥ ॥इति श्रीमदांशे मौ॰ अ॰ ध्र॰ अहंकारपराजयो नाम पंचमोऽध्यायः॥ ॥छ॥छ॥छ॥छ॥छ॥छ॥
॥ ॥श्रीमहागणाधिपतये नमः॥ ॥शिव उवाच॥ ॥श्रुत्वं प्रणम्य नीतिज्ञो भयसंकुलितो सुरः॥अ
हंकारो जगादेदं वचनं स्वहितार्थतः १ अहंकार उवाच॥ ॥स्वामिन्मे वरदानं यन्निष्फलं प्रबभूव
तत् अमोघास्त्रमयं किं त्वं वद संशयकं नुद २ धात्मवर्णैः समाचोतादेवपक्षप्रवर्द्धनः॥ ॥ ॥

मायामयः कथं सोपि निष्फलत्वं मां चकार ह ३ भृगुरुवाच ॥ अहं त्वं सर्वभावेन मन्यसे धर्मवर्ण
कं मायामयं विशेषेण न जानासि गजानन ४ मायायुक्तविहीनत्वं तत्रैनेव प्रवर्तते योगाकारं ग
णेशानं वदंति वेदवादिनः ५ हनिष्यति समाकृष्य त्वामयं धर्मवर्णकः अतस्तस्य गणेशस्य भार
णं याहि दैत्यप ६ धर्मोण्णावृतेमेवं यन्न दृश्यते जनैर्यथा वस्तु तथा गणेशानं न जानंति शिवादयः
७ वर्णवेदस्वरूपाश्च धर्माजाता इवा बभुः अज्ञानत्वान्न तं भ्रायमव्यक्तो धर्मवर्णकः ८ सोऽह
जं ब्रह्मयत्नोत्कं स्वाधीनं ब्रह्मसु परं तस्य किं वरदानस्योल्लंघने दुर्घटं भवेत् स्वेच्छया वरदानं वै सफ
लं निष्फलं भवेत् तदेव धर्मवर्णोयं सहजो नेति वाचकः १० अविनाशि पदं यच्च गजास्यं ब्रह्म
कथ्यते तदेव मस्तकं तस्य गणेशस्य महात्मनः ११ नाशरूपं जगत्सर्वं देहस्तस्य न संशयः ॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ॰उ॰पु॰

१७

खं॰ ३॰८

धरमवर्णस्तयोर्योगे देहधारी बभूव ह १२ पंचचित्तमयी बुद्धिर्दक्षिणांगे व्यवस्थिता चित्तभ्रांति
करी सिद्धिर्वामांगे राजते सदा १३ तयोः स्वामी गणेशानो मायाभ्यां क्रीडति प्रभुः तं गच्छ शरणं ता
त तदा सौख्यमवाप्स्यसि १४ स्वसंवेद्येन योगेन दर्शनं तस्य जायते योगिनां गणनाथस्य तेन स्वा
नंदपालकः १५ न ते यशो महाराज भविष्यति कदाचन सुरासुरमयी बुद्धिस्तस्य शरणं गच्छ
तु १६ सुराः स्वधर्मयुक्ते नैव स्थापिता मानवा भुवि असुरा विवरेषु स्थाप्या विधर्मसंयुतं १७
स्वस्वधर्मं परित्यज्य लोभयुक्ताः सुरासुराः भवंति चेत् तदा यं तु तेषां शास्ता भव स हि १८ देवैर्दैत्या
जिताः सर्वे पातालं गच्छमानद तदा लासविनिर्माय देवविघ्नकरो भवत् १९ लमपि च मलोप
न वर्णाश्रमपराङ्मुखः देवनाशार्थमसंतमुपयुक्तोसि स्वलोकतम २० अतस्त्वां हंतुमेवं स समागतो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्वधर्मस्थस्यतेनाशंनकरिष्यतिविघ्नपः २१ त्रिविधंत्रिविधभावेसंस्थितंधर्मसंयुतं तदायंबुद्धि
नाथश्चबुद्धोनिसंस्थितोभवेत् २२ अतस्तस्यगणेशस्यधारणंगण्डंदेहप ब्रह्माकारस्यसर्वत्र
सुरासुरप्रवर्त्तिनः २३ ॥ ॥शिवउवाच॥ ॥काव्यस्यवचनंश्रुत्वाहर्षयुक्तोऽहमादरात् प्रणम्यतंपु
नःप्राहसंशयस्यापनुत्तये २४ अहमुवाच॥ ॥धारणंब्रह्मणस्यगाभिख्यातिलदात्वया सुरासुर
मयस्यापितथापिसंशयंनुद २५ सिद्धिबुद्धिसमामायाविद्यतेनैवनिश्चितं प्रकृत्यासंयुतोनित्यंगणेशा
नःप्रखेलति २६ सर्वपूज्यश्चसर्वादौसंमतोब्रह्मनायकः श्रीशब्देनसमायुक्तःकथंश्रीमुच्यतंगि
ता २७ सिद्धिबुद्धीपरित्यज्यश्रीश्चेनौंकारकंतथा विकल्पेनसमागत्यतिष्ठतिगणनायकः २८
अन्येसर्वेतथाविप्रप्रत्यक्षाश्चास्वरूपया युक्ताभवंतिशास्त्रेषुकिमिदंकौतुकंवद २९ अतःश्रियः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

समादेवी विद्यते नैव निश्चितं भाति सर्वत्र वेदेषु तथा ओंकारात्मिका परा ३० ॥ ॥ भुशुण्डिरुवाच ॥ ॥ गकारः सि
द्धिरूपश्च णकारो बुद्धिवाचकः तयोः स्वामी गणेशानो योगाकारः प्रदृश्यते ३१ यथा माया युतं ब्रह्म माय
या भिन्नकं न च मायासे न च सदा ब्रह्म माया न संशयः ३२ तथा सिद्धिश्च बुद्धिश्च गणेशो देवनायकः ॥
एकरूपा न संदेहो योगस्तेनाय मुच्यते ३३ सिद्धिर्बुद्धिर्गणेशानो ज्ञानिनां त्रिविधं परं भाति योगमय
श्चापि विचारस्य विचक्षण ३४ अतः सिद्धेश्च बुद्धेश्चोपासनं नात्र विद्यते भिन्नं गणपतेः तस्मात्त्रिविधं ना
स्ति निश्चितं ३५ गणेशस्रजेन नैव त्रिविधं त्यजितं भवेत् प्रकृतिपुरुषाकारं तत्र नैव प्रदृश्यते ३६
वामांगं प्रकृत्याकारं दक्षिणांगं च पुरुषं सिद्धिं बुद्धिं विजानीहि तयोर्योगे गणेश्वरः ३७ सर्वेषां वामभागे
च प्रकृतिः संस्थिता भवेत् गणेशस्यात्र यत्नेन प्रकृतिः परिकीर्तिता ३८ एकरूपधरा माया सिद्धिबुद्धिमयी परा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भिन्नभोगार्थमानंदात् सृष्टिं कर्तुंमनो दधे ३९ सिद्धिरंगात्समुत्पन्नाश्रीः सर्वशोभयायुता बुद्धिरंगात्त
थोंकारात् प्रकृतिः प्रबभूव ह ४० ताभ्यां तपः कृतं घोरं स्वस्वज्ञानप्रसिद्धये यस्मैकस्यैनमोनियमं
त्यंजत्वा स्वमलकं ४१ ततस्तयोर्हृदिस्थं यद्ब्रह्ममायाप्रचालकं प्रसन्नं जातमत्यंतं स्वरूपं स्वमद
र्शयत् ४२ तत एकाक्षरं मंत्रं गणेशस्य महात्मनः दृष्टं ताभ्यां हृदिस्थं स्वतेजोरूपं सुखप्रदं ४३ हृष्टते
नैव मंत्रेण तोषयामासतुः परं गणेशं तं महाभागे ह्यादिमायेतपोन्विते ४४ दिव्यवर्षसहस्रेण प्रसन्नो
गणनायकः वरान्दातुं समायातः सिद्धिबुद्धिसमन्वितः ४५ नरकुंजररूपं तं दृष्ट्वा विस्मितमानसे मा
ये ब्रह्म वक्तुं स्तोत्रं विस्तारं चक्रतुर्हृदि ४६ गणेशरूपं यासे चाज्ञानं जातं महाद्भुतं तपसा तत्प्रभावेण
ज्ञातं ताभ्यां रहस्यकं ४७ सिद्धिबुद्धियुतं तं ते वीक्ष्य चाश्चायसत्वरं प्रणेमतुर्गणेशानं कृत्वा स्तोत्रं प्रचक्रतुः ४८

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥ ॥ओंकाराउवाचः॥ ॥नमस्ते गणनाथाय सर्वसिद्धिप्रदायक सिद्धिबुद्धियुतायैव गणानां पतये नमः
४९ स्वानंदपतये तुभ्यं कर्तृणां कर्तृरूपिणे अनाथाय सनाथानां नाथाय ते नमो नमः ५० परेशाय
पराणां च पालकाय परात्मने आत्मना मन्मतायैव विघ्नेशाय नमो नमः ५१ लंबोदराय देवाय देवदे
वस्वरूपिणे देवेभ्यो देवतं दात्रे गजाननाय ते नमः ५२ ज्येष्ठराजाय सर्वेषामादिरज्याय ढुंढये॥
अनामयाय निःसाय सर्वेशाय नमो नमः ५३ ब्रह्मभ्यो ब्रह्मदात्रे ते ब्रह्मणे ब्रह्मरूपिणे ब्रह्मणस्पत
ये तुभ्यं स्वर्णयोगाय ते नमः ५४ योगशांतिमयायैव चिंतामणिस्वरूपिणे अनंतायादिरूपाय चांत ॥१९॥
स्थाय नमो नमः ५५ किं स्तौमि त्वां गणाधीश योगशांतिधरं परं यत्र वेदादयः शांतिं प्राप्ता योगपरायणाः
५६ मनोवाणीमयो नैव मनोवाणीविवर्जितः नैव त्वं ते नमो नाथ प्रसन्नो भव सर्वदा ५७ एवमुक्ता गणाधीशं

गणेमनुर्महासुर ओंकारेणसमुत्थाप्यजगादगणनायकः ५८ ॥ ॥गणेशउवाच॥ ॥वरान्वृतंमहा
भागमाहामायेमनोभिमतान् दास्यामितपसातुष्टःस्तोत्रेणहंविशेषतः ५९ स्तोत्रंमत्कृतमेवैसर्व
सिद्धिप्रदायकं पठतेभ्रएवतेनित्यंप्रभवेमुक्तिमुक्तिदं ६० ब्रह्मभूतकरंसत्यंओं कारयशसान्वितं
ममप्रियकरंसत्यंभक्तिवर्द्धनकंभवेत् ६१ गणेशवचनंश्रुत्वाचतुर्थ्योंकारकेपरं गणेशंभक्तिसं
युक्तेभक्तेशंभक्तवत्सलं ६२ ओंकाराऊचतुः॥ ॥यदिभक्तिं स्थिरांदेहियोगशांतिप्रदायकं संकल्प
स्यं२ सिद्धिसामर्थ्यंदा तेपादपद्मयोः ६३ यथासिद्धिश्चबुद्धिश्चतयासंमानितेप्रभो तथावांतेप्रियेनाथकु
रुष्वगणनायक ६४ अस्मदीयवेशसर्वजगद्ब्रह्मकुरुप्रभो आवाभ्यांमोहितेसर्वंभवतुत्वत्प्रसादतः ६५
यदीयभजनेनैवमोहोत्रस्मत्कृतःपरः नाशंयातुसदादेवनान्यथायोगकारिभिः ६६ शिवविष्णुमुखा

मो॰ऋ॰पु॰ देवा मोहयुक्ता भवंतु च अस्मदर्थं सदा भांता यत्नयुक्ता भवंतु वै ६७ ॥ ॥श्रीगणेश उवाच॥ ॥भवतीभ्यां
॥१२०॥ दत्ताः सर्वे वराः सुदुर्लभाः पराः दत्ता मया विशेषेण मोहयेतामिदं जगत् ६८ मायाभ्यां सिद्धिबुद्धिभ्यां
रचितं विविधं जगत् ब्रह्म नानाविधं देव्यो तन्माहं बिंबितो भवं ६९ बिंबं मे मोहयुक्तं तन्नाना भावपरा
यणं मम भक्तिस्वभावेन मोहहीनं भवेत्सदा ७० मम बिंबस्य भार्ये तु भविष्यथो न संशयः तेन युक्ते
महामाये बंधमोक्षौ करिष्यथः ७१ सिद्धिबुद्धियुतो हं तु ब्रह्मस्थः सनातनः न तत्र योग्यता देव्यौ भवेत्स्या
न्महिमात्मनोः ७२ एवमुक्त्वा गणाधीशो तत्र्हदे चकार ह मायेते मन साध्याना संस्थिते तत्र देवप २०
७३ ततो गणेशबिंबं यत्प्रति तं तत्र योर्हृद तेन युक्ते चतुर्देहं च कतु भेदनात्मके ७४ बाह्यसो स्व्यकरा
मायाच तुर्णं जगतां किल ब्रह्मणां देहरूपा चभ्याः सर्वत्र प्रकीर्तिता ७५ चतुर्णं जगतां तद्ब्रह्मणां ज्ञानरूपि(णी)॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ओंकारात्मकरूपा सा माया सर्वत्र संस्थिता ७६ ताभ्यां युक्तो गणेशानः क्रीडति विविधैरतः मोह
युक्तविहीनत्वान्नामेदपरायणः ७७ अतः सर्वेषु जीवेषु मोहितेषु महासुर मोहहीनात्मभावेषु ओं
कारेत्वादिसंमते ७८ आदौ प्रकृतिपुंश्चार्यपश्चात्पुरुषउच्यते एतं विघ्नेश्वरेणैतज्ज्ञानी हि देसना
यक ७९ कुत्रभीषाद्युक्तश्च गणेशः पठ्यते बुधैः कुत्रौंकारसमायुक्तो मायाभ्यां खेलनापरः ८०
वामांगेभ्रामिर्धृता तेन दक्षिणांगे महासुर ॐकारा गणनाथस्य बिंबेन ब्रह्मरूपिणा ८१ बिंबं सर्वत्र
भावेषु तदाकारं वमस्तमहे अतः शिवादयः सर्वे तथा ओंकारसंयुताः ८२ जीवाश्चोंकारसंयुक्ताः प
ठ्यते वेदवादिभिः आदिमाये समाख्याते बिंबाधारे विचारय ८३ अत ओंकारमोहं त्वं त्यक्त्वा १०
विघ्नेश्वरं भज सिद्धिबुद्धियुतं तात तेन सौख्यमवाप्स्यसि ८४ ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥ ॥इति ते कथितं सर्वं धर्मार्थवर्णस्य चेष्टितं॥ गच्छ त्वं शरणं देवं शांतिदं भुक्तिमुक्तिदं ८५ भिन्नभावकरी मा
याओंकारे परिकीर्तिता ब्रह्मन्नन्नमयी प्रोक्ता सिद्धिबुद्धिविचक्षण ८६ एतत्ते कथितं सर्वं रहस्यं सर्वसंम
तं वेदगुह्यमहंकारगं धत्तं सर्वसिद्धये ८७॥ ॥इति श्रीमदांसे मौद्गल्ले० अ० ५२० अहंकारासुरज्ञान
प्रदो नाम षष्ठोऽध्यायः॥ ॥६॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥ ॥श्रीमहागणाधिपतये नमः॥ ॥शिव उवाच॥ ॥शुक्रस्य वचनं श्रुत्वा हंकारस्तं प्रणम्य च॥ ज
गाद ज्ञानसंयुक्तः कृतांजलिः प्रतापवान् १ अहमुवाच॥ ॥त्वया हं बोधितो नाथ त्वत्तो गच्छामि गजान ३१
नं सुरासुरमयं ब्रह्मन् सर्वशांतिप्रदायकं २ वेदे मु कृतसद्गुरुणा संयुतः परमार्थवित् ओंकाराम्यां
मनः कृष्णयोगेशं शरणं ययौ ३ पुरभ्रांतमहापापांदज्ञानम्य कृतांजलिः तुष्टाव भास्कराजं स गणेशाहं कृतिधरः ४॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥ ॥अहमुवाच॥ ॥नमस्ते शास्त्रराजाय पाशाय बंधरूपिणे मोक्षरूपाय वै तुभ्यं गणेशाकररूपिणे ५
मोहो मायामयः प्रोक्तो बंधदः सर्वजंतवे गणेशज्ञानयुक्तश्च द्वंद्वहीनो नरो भवेत् ६ त्वदेव बंधरूपा
ख्यं शास्त्रं तस्य महात्मनः त्वमेव पाशरूपं वै बंधमोक्षकरं महत् ७ ये त्वां शरणमापन्नास्तेषां ते बंधजं
भयं नास्ति शास्त्र चमां पाहि शरणागतमादरात् ८ नमस्ते तेजसां नाथ दुःखनाशकराय ते पाशाय परमा
त्माय शास्त्राणां ब्रह्मणे नमः ९ एवं स्तुत्वा महापाशं प्रणनाम कृतांजलिः अहंकारश्च तं सक्तापाशं विघ्ने
श्वरं ययौ १० इदं स्तोत्रं पठेद्यस्तु तस्य बंधो विनश्यति मायापाशमयः साक्षाद्गणेशसत्तमे द्धति ११ गतं पा
शं विलोक्यैव नाहंकारो गुरुत्वयुतः धर्मध्वजं जगामासौ त्वं दृष्ट्वा प्रणनाम ह १२ पुनरुत्थाय विघ्नेशं तज्जया
मास भक्तितः पुनः प्रणम्य सर्वेशं तुष्टाव स कृतांजलिः १३ अहमुवाच॥ ॥धर्मध्वजाय तुभ्यं वै गणेशाय परात्मने॥ ॥

२८

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लंबोदरायदेवायदेवनाथायतेनमः हेरंबायमहेशानांपालकायनमोनमः १५ कर्मणेकर्मरूपायना
नाकर्मफलचारिणे ज्ञानायज्ञानदात्रेतेज्ञानज्ञानायवैनमः १६ चरायचररूपायजंगमस्थायतेनमः स्था
वरायसदातद्रूपायतद्रूपधारिणे १७ स्थावरजंगमाभ्यांचहीनायतेनमोनमः योगाययोगनाथाययो
गिनेयोगदायिने १८ योगेभ्योयोगदात्रेतचिंतामणयेनमोनमः शांतायशांतचित्तेस्तुप्रख्यायशांत
मूर्तये १९ ब्रह्मणांपतयेतुभ्यंब्रह्मणेसिद्धबुद्धिद सिद्धिनाथायबुद्धीशायतेयोगायतेनमः २० मूष
कोपरिसंस्थायमूषकध्वजधारिणे चतुर्भुजायस्वानंदपतयेतेनमोनमः २१ किंस्तौमित्वांगणाधीश
धर्मार्थस्वरूपिणं अव्यक्तंवेदवादेषुकथितंसततंप्रभो २२ कथितुंतेस्वरूपंवैवेदाधर्मायिताबभुः
योगशांतिधरास्तेपिकथितुमक्षमाःकथं २३ अतस्त्वांधर्मवर्णस्त्वंवदंतिवेदवादिनः तंधर्मवर्णमेवाहंपश्यामियोगिदुर्लभं २४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

धन्योऽहं सकुलो नाथ त्वदंघ्रियुगदर्शनात् एवमुक्त्वा नतस्तस्थौ भक्तियुक्तो महासुरः २५ भक्तिरसेन
मग्नं तं दृष्ट्वा देवो गजाननः जगाद तं महात्मा गं प्रेमयुक्तं पदिस्वके २६ धूम्रवर्ण उवाच ॥ ॥ वरान्वृणु
महाभाग दास्यामि स्तोत्रतोषितः अहंकार न संदेहो नमस्यं ते भविष्यति २७ त्वया कृतमिदं स्तोत्रं सर्व
सिद्धिप्रदायकं मम भक्तिप्रदं चैव भविष्यति न संशयः २८ श्रृणुयाद्यः पठेदेतत्तस्याहंकारजं भयं न भ
विष्यति देवेश भुक्तिमुक्तिप्रदं भवेत् २९ यं यमिच्छति तं तं च दास्यामि स्तोत्रपाठतः मम प्रियो भवेत्सोपि स
दा मोहविवर्जितः ३० एवं गणेशवाक्यं स श्रुत्वा तमब्रवीदहं प्रणिपत्य महात्मानं धूम्रवर्णं महासुरः
३१ ॥ ॥ अहंकार उवाच ॥ ॥ यदि त्वं वरदोसि मे धूम्रवर्ण गजानन तदा ते पादपद्मे वै भक्तिं देहि परां प्रभो
३२ गाणपत्यं कुरुष्व त्वं मां गणेशपरायणं गाणपत्यप्रियं नाथ सदा सद्भावभाविकं ३३ स्थानं देहि तथार्दि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

योगक्षेमकरीं परां तत्रस्थस्त्वां भजिष्यामि दासोऽहं ते गजानन ३४ नान्यं याचे कदा नाथ त्वां कारमोहमोहितं
सिद्धबुद्धियुतं लाहं भजिष्यामि विशेषतः ३५ बोधितो गुरुणा स्वं तत्तस्य वाक्यपरायणः योगशांतिमयं रूपं
भजिष्यामि महोदर ३६ ॥ ॥धर्मवर्ण उवाच॥ ॥मयि भक्तिर्दृढा ते स्तु भविता स्वपरायणः गाणपत्यप्रियो
भ्रात्माचरिष्यसि न संशयः ३७ यत्त्वं दोषमहादेश्यतर्जनं नैव वर्तते कर्मसु तत्र ते स्थानं भुंक्ष्व कर्मफलं मह
त् ३८ कार्यो दोषस्मरणं मे न तत्र तव सुस्थिरो भव आसुरेण स्वभावेन भ्रंशयस्व निरंतरं ३९ स्वपुरे गच्छ
देशे दुर्मम्द्रत्कात्त्वक्ष सर्वदा मदहंकृतिसंयुक्तान्कुरुष्व निसमादरात् ४० यत्र मे स्मरणं चादौ तर्जनं सर्व २३
कर्मसु तत्र साधुस्वभावेन वर्तस्व तदहंकृतिः ४१ गाणेशभक्तिसंयुक्तो मदीयाहंकृतिधरः भविष्यसि
न संदेहो गच्छ गच्छ मदाज्ञया ४२ ॥ ॥शिव उवाच॥ ॥एवमुक्त्वा गणाधीशस्तत्र महं विरराम ह॥ प्रणम्यैनमहंकारो ययौ स्व
नगरं मुदा॥४३॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तादृशं तं परिज्ञाय दैत्येशा दुःखसंयुताः स्वपातालगाः सर्वे बभूवुर्भयविह्वलाः ५४ स एव सुखसंयुक्तो
भजतं गणनायकं अनन्यमनसा ध्यात्वा धूम्रवर्णधरं प्रभुं ५५ यथा जगाद विघ्नेशस्तथा चकार भावतः
अहंकारासुरस्त्वेवं शांतरूपो बभूव ह ५६ ॥ ॥इति श्रीमदांत्ये मौद्गल्ये महा० अ० ४० धूम्रवर्ण० ॥अहंका
रशांतिवर्णनं नाम सप्तमोध्यायः ॥७॥
॥ ॥श्रीमहागणाधिपतये नमः ॥ ॥शिव उवाच ॥ ॥शांतिरूपधरं दृष्ट्वा गणेशाहंकृतौ स्थितं अहंदैत्यासुरा
विप्रा विस्मिता अभवन् द्विजाः १ ततस्ते धूम्रवर्णं वै पुपूजुर्भक्तिसंयुताः पुनः प्रणम्य तं सर्वे तुष्टुवुः करसंपु
टाः २ देवर्षय ऊचुः ॥ ॥अनाथाय सर्वादिपूज्याय नित्यं निरालंबनेन निजस्वरूपाय ढुंढे सदाव्यक्तरूपाय सर्वां
तगाय नमो धूम्रवर्णाय सर्वेश्वराय ३ सदा मोहहीनाय मोहप्रदाय जनेभ्यः प्रभो मोहहंत्रे निजानां महानंद

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रैविध्यभावैः परेशान मो ब्रह्मणाय सर्वेश्वराय ४ नमः सिद्धिबुद्धिप्रदात्रे गणेश स्वसंवेद्यनाम्ना पुरेवास
कारिन् अनाथाय नाथाय सर्वेश्वराणां नमो० ५ सदा स्वेच्छया स्वेल्लकाराय तुभ्यं सगौणाय नैर्गुण्यभा
वाय ब्रह्मन् महाखुध्वजाय प्रथहेरंबकाय नमो० ६ गजाकारतुंडाय लंबोदराय त्रिनेत्राय [illegible] पर्शुहस्ता
भक्तारिन् मदासक्तयोगीन्द्रभृंगात्मकानां नमो० ७ चतुर्बाहवे चैकदंताय तुभ्यं विघ्नैरनर्घ्यैस्तु संभावि
ताय अलंकारकैर्देवदेवेशपाने नमो० ८ त्वया सृष्टमायासमं सर्वभावयुतं मोहदं मायिनां वंदना है॥
तदाकाररूपेण तस्थाय भ्रान्ते नमो० ९ त्वया प्रेरितेनाथ तेनापि सृष्टं सदात्म स्वरूपे परं जीवनं यत्॥
अभेदात्मकं तत्र संस्थाय तुभ्यं नमो० १० ततस्तेन सृष्टं सदा भेदकानां निजं देवतं ब्रह्मभावेन तत्स्थं॥ तदाकार
रूपेण तस्थाय ब्रह्मन् नमो० ११ असम्भावयुक्तेन सृष्टं विदेहं परं ब्रह्मसांख्यात्मकं सृष्टबीजं॥ त्वया प्रेरितेनात्मवास प्रदायिन्नमो० १२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्वतो ध्यानरूपं विदेहेन सृष्टं ललद्दीपप्रबोधेन विघ्नेश्वराय तदाकाररूपाय तत्रस्थकायन्नमो० १३
ततस्तेन तत्सत्त्वया सृष्टमाद्यं सदेकस्वरूपं परं सोहमेवं तथात्वं च तन्नैव संस्थः परात्मन्नमो० १४
सयो प्रेरितेनाथ तेनैव सृष्टं चतुर्णं प्रमत्त्वं महद्विंदुरूपं सदासोहमेनैव योगेन तस्यान्नमो धूम्रवर्णा
य सर्वेश्वराय १५ ततो नादरूपं समं यत्सुबुद्ध्वं परं सूक्ष्मरूपं ततः स्थूलभावं चतुर्धा शरीरं विनिर्माय
स्वेलिन्नमो० १६ नमो विश्वरूपाय सर्गक्रियायै ह्यनंतानि नाथैः सुचिन्त्याय तुभ्यं चरैः स्थावरैर्भोग
भोगिन्नमस्ते नमो० १७ चराचाथ तस्थावरायैव तुभ्यं नमः सृष्टिकर्त्रे सुपात्रे हराय प्रकाशाय सत्या
यदेवामयाय नमो० १८ नमो देवयक्षाय साध्याय तुभ्यं नरायाथ देवं द्रुदेवात्मकाय दिगीशाय रक्षादि
बीजात्मकायन्नमो० १९ नमः सर्परूपाय देहात्मकाय समुद्रादिनानाप्रभेदस्वमूर्ते अनंतस्वरूपैः सदा को उमिलन्नमो०
॥२०॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तथापि त्वमेवं तदाकारहीनः सदा साहजे नैव योगेन योगिन् स्वसत्तात्मकायैव तुभ्यं नमस्ते नमो०
२१ अतो वेदवादा विशेषेण धूम्रवर्णेति सर्वे वर्णितुं ते स्वरूपं बुधैः कथ्यसे धूम्रवर्णस्ततस्त्वं नमो०
२२ सुशांतिं गता वेदयोगींद्रमुख्यास्त्वयि ब्रह्मनाथे सदा धूम्रवर्णे वयं किं स्तवामोऽल्पबोधान्नमस्ते
नमो धूम्रवर्णाय सर्वेश्वराय २३ ॥ ॥शिव उवाच॥ ॥एवं स्तुत्वा गणेशानं प्रणेमुरमरर्षयः तानुवा
च महाभागा धूम्रवर्णः प्रतापवान् २४ धूम्रवर्ण उवाच॥ ॥वरान्वृत महाभागा दास्यामि स्तोत्रतोषितः
देवर्षयो हृदिस्थान्वः सुदुर्लभतरानपि २५ स्तोत्रं भवत्कृतं मे तु भविष्यति सुसिद्धिदं पठते शृण्वते देवा २५
मानाभावप्रदरकं २६ धर्मार्थकाममोक्षाणां दायकं भजतामिदं ब्रह्मभूतकरं विप्रा भविष्यति न संशयः
२७ पुत्रपौत्रकलत्रादिसौख्यदं धनधान्यदं आयुरारोग्यमैश्वर्यदायकं मम विष्यति॥२८॥ ॥ ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मारः एतेऽष्टादशादीनि ह्येकविंशतिपाठतः एकविंशतिभिर्नित्यं दिवसैः प्रभवंति हि २९ परकृ
त्यादिकं सर्वनाशमेति न संशयः अनेन स्तोत्रमुख्येन स्तुवंतः सर्वदा द्विजाः ३० यं यं चिंतेत यं त
कामं तं तं दास्यामि सर्वदा स्तुतोऽनेन महादेवाः स्तोत्रेण तुष्टिमागतः ३१ शिव उवाच ॥ ॥ध
म्रवर्ण वचः श्रुत्वा देवर्षयः प्रणम्य तं प्रहृष्टमनसो देवं सर्वसिद्धिकरं जगुः ३२ देवर्षय ऊचुः
धूम्रवर्ण त्वया नाथ कृतः शांतिधरः सदा अहंतेन वयं सर्वे वरयुक्ताः कृताः किल ३३ अ
हंकारे प्रशांते तु स्वाधिकारे वसामहे वर्णाश्रमयुता लोका भविष्यंति द्विजादयः ३४ किं वर्ण
यो गणाधीश देहि भक्तिं त्वदीयकं अहंकारमयं नैव तथा तु ज्ञानयं प्रभो ३५ तथेति तानुवाच
सो धूम्रवर्णो गणेश्वरः अंतर्दधे महेदेवा मुनयस्तं नतास्ततः ३६ स्थापयामासुरानंदाध्यक्ष

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वर्णं दिशांतगे क्षेत्रे तत्र गणेशानं प्रजयामासुरादरात् ३७ स्वस्वपदे पुनर्जग्मुस्ततो हर्षसमन्वि
ताः ॥ सुखिनः स्वस्वकार्येषु वर्तंते गणपेरताः ३८ एतदः कथितं चित्रं चरित्रं सर्वसिद्धिदं अ
हंकारमयघ्नं च पठतां श्रृण्वतां भवेत् ३९ एवं नानावतारान्स धृत्वा वर्णः प्रतापवान् धरलावि
घ्नं तु निर्विघ्नं चकार भक्तिभावितः ४० धराज्ञवर्णितावताराख्यानं तास्तु यांश्चरित्रकं कथितुं नैव श
क्यं तन्मदनात्केनचित्कदा ४१ अतः संक्षेपतः प्रोक्तं मुख्यावतारचेष्टितं सनकाद्या गणेशानं
भजध्वं भावसंयुताः ४२ तेनाहंकारनिर्मुक्ता भविष्यथ न संशयः योगींद्रा योगिवंद्या श्रवणां
तिनः शांतचेतसः ४३ ॥ ॥इति श्रीमदांत्ये मौद्गले० अं० धृ० दे० वर्णितावतारस्तुतिवर्णनं नाम ४ मोध्या
यः ॥ ॥ ८ ॥ ॥श्रीरामचंद्राय नमः॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥ ॥श्रीगणपतये नमः॥ ॥सनत्कुमार उवाच॥ ॥कुब्जक्षेत्रमहोदं च धर्मारण्यस्य सर्वदं माहात्म्यं
क्षेत्रमुख्यस्य वरदं संतोषदायकं १ ॥शिव उवाच॥ ॥ईशान्ये हिमवत्प्रांते धर्मारण्यस्य क्षेत्रकं दिव्यं
तं तस्य माहात्म्यं वर्णितुं कः क्षमो भवेत् २ संक्षेपेण वदिष्यामि प्रणम्य गणनायकं महात्म्यं क्षे
त्रमुख्यस्य शृणुष्वैकचेतसः ३ देवर्षिभिः प्रहर्षेण स्थापितो धर्मारण्यकः शुंडादंडमुखः श्री
मांश्चतुर्बाहुप्रधारकः ४ त्रिनेत्र एकदंतश्च परश्वादिसमन्वितः अहंकारो गणेशानं भजते तत्र
नित्यशः ५ वामे सिद्धिर्दक्षिणांगे बुद्धिः सर्वप्रियंकरी पुरतो मूषकस्तस्य धर्मारण्यस्य शोभनः ६
दशयोजनविस्तारः क्षेत्रस्य गणपस्य च चतुरस्रं च तत्क्षेत्रं सर्वसिद्धिप्रदायकं ७ पुरतो धर्मारण्य
स्य भक्ता मुद्गलमुख्यकाः भृगुकाद्यास्तं भजंते ते स्तुवंति स्म महर्षयः ८ पृष्ठतः पार्षदास्तस्य प्रमोदामोदकादयः॥ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

आनंदशास्त्रामहाभागाः सेवंते धर्मवर्णकं ९ वामांगे तीर्थमुख्यानि प्रयागादीनि मानदाः क्षेत्राणि का
शीमुख्यानि भजंते धर्मवर्णकं १० दक्षिणांगे महेशानाः शंभुविष्णुमुखाः सदा सगणाः परिवारा
स्तं भजंते गणनायकं ११ शेषाद्या नागराजानः पर्वता हैममुख्यकाः गंधर्वाश्चारणाः सिद्धा वस
वो मनवस्तथा १२ आदित्या रुद्रकाद्याश्च विद्याधराप्सरादयः वसंति तत्र क्षेत्रे ते भजंते द्विरदान
नं १३ यद्यप्येतन्मंल्लोके ततस्तत्रैव संस्थितः सेवार्थं धर्मवर्णस्य भक्तिभावसमन्वितं १४ तेषां
स्थानादिकं विप्राः कथितुं नैव शक्यते अपारत्वात्ततः संक्षेपतः प्रोक्तं मयापरं १५ तत्र तीर्थं महासिद्ध
दायकं वर्तते परं धर्मवर्णस्य तत्रैव स्नानं कुर्वंति विप्रपः १६ तत्र स्नानेन सद्यैव वांछितं लभते न
रः अंते मोक्षं न संदेहो यत्र कुत्रमृतोपि चेत् १७ तत्र विष्णुमुखा देवाः कश्यपाद्या महर्षयः॥ ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नित्यं स्नानं प्रकुर्वन्ति प्रहृष्टेनान्तरात्मना १८ अन्ये क्षेत्रस्थनागाद्यास्तत्र स्नानं प्रकुर्वते जनाः क्षेत्र
निवासार्थं स्थितास्तेपि मुदान्विताः १९ शिवविष्णुमुखानां च तीर्थानि तत्र मानवाः स्थितानि स्नान
मात्रेण तेषां पदप्रदानि च २० तत्र दर्शनमात्रेण धर्मस्य वर्णस्य वै सकृत् ईप्सितं तल्लभते सद्यो मानवो पु
ण्यवानुभवेत् २१ यात्रामात्रेण तत्रैव धर्मार्थकाममोक्षकं लभते एकवारेण यत्र कुत्र गतोपि वै नर
२२ भाद्रशुक्लचतुर्थ्यां सुस्नापितो धर्मस्य वर्णकः देवर्षिमिश्रमध्याह्नसात्त्विथिः परमामता २३
वार्षिकः सुमहोत्साहस्तत्रैव क्रियते जनैः भाद्रशुक्लचतुर्थ्यां तु यात्रां कुर्वन्ति मानवाः २४ परस्परं प्र
हृष्टास्ते बोधयन्ति गजाननं सरोमांचाभवंते सेव धांकराग्रामहर्षयः २५ गणेशाभावयुक्ताश्च याया
त्रार्थं हर्षसंयुताः तत्र गच्छन्ति चान्ये येवे भवाद्याः प्रहर्षिताः २६ कृत्वा यात्रां पुनः सर्वे स्वस्वस्थानं गता मुदा ॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

 स्मरंतिधर्मवर्णंतंभक्तिभावसमन्विताः २७ अंतेस्वानंदगाः सर्वेभवंतिनात्रसंशयः शेषाद्याः क्रममा
र्गेणस्वानंदस्थाभवंतितु २८ क्षेत्रेमरणतोविप्राः स्वानंदोलभ्यतेजनैः यत्रकुत्रस्थिताभ्भैवगाणपा
त्यरूपकाः २९ धर्मवर्णस्यक्षेत्रस्यमाहात्म्यंतेशातामया कथितंविस्तरेणैतत्कोहितिनैववर्णितुं॥
३० गाणेशानिचक्षेत्राणिब्रह्मभूतमयानितु यावंतितत्रब्रह्मगोलेस्मिंस्तावंतिमुनिसत्तमाः ३१ धर्मार्थका
ममोक्षाणांक्षेत्राणिविविधानिच चतुःपदमयान्यानिज्ञातव्यानिनसंशयः ३२ पंचमंयत्पदंप्रोक्तंब्र
ह्माकारंमहर्षिभिः क्षेत्रंगणपतेर्विप्रायत्रतत्रस्थितंकिल ३३ इदंक्षेत्रस्यमाहात्म्यंयःशृणुयान्न
रोत्तमः श्रावयेत्तंपरेद्वापिसर्वकार्थमवाप्नुयात् ३४ ॥ ॥इतिश्रीमदांत्येमौद्गल्ये॰अ॰धर्म॰क्षेत्रमा
हात्म्यवर्णनंनामनवमोध्यायः॥ ॥९॥ ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥श्रीराम॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥ ॥श्रीमहागणपतये नमः॥ ॥सनकाद्या ऊचुः॥ ॥ब्रह्मवर्णविस्तारस्य भेदा नानाविधाः स्मृताः तेषु वदवि
भो मुख्यं चरित्रसंयुतान्परान् १ ब्रह्मवर्णचरित्रं तु श्रुत्वा यामो नतत्परिकौ अहंकारहरं दुर्णं ज्ञात्वा लब्धोज
गद्गुरो २ शिव उवाच॥ ॥ब्रह्मवर्णविस्तारस्य भेदानां चरितं परं कथितुं नैव शक्यं तन्मुख्यानां मुनिसत्त
माः ३ मुख्येषु मुख्यभूतानां चरित्रं लेशतः परं कथयामि शृणुध्वं यन्मनसा निश्चितेन तत् ४
सहजं ब्रह्मयत्नोक्तं नेति रूपं मुनीश्वराः तेन सृष्टं समाख्यं हि ब्रह्मानंदवाचकं ५ तेन सृष्टानंतसृ
ष्टताभ्यामुत्थानसंयुते सृष्टब्रह्माणि विप्रेशाः स्वतः परतसंज्ञिते ६ ततो देहिमयं ब्रह्म ततो देहचतुष्कं॥
बिंदुतेनैव संसृष्टं चतुर्देहमयं परं ७ स्थूलं सूक्ष्मं समं नादं तैः सृष्टं विश्वरूपकं नानाभेदमयं तस्मात्सृ
ष्टिरूपं मुनीश्वराः ८ एतानि ब्रह्मरूपाणि कृतान्यादिमहर्षयः ज्ञानहीनानि सर्वज्ञाः क्षमानि कार्यजातिषु ९

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२९ ततस्ते भ्यस्तपस्तप्तं यस्मै कस्मै नमो नमः बीजरूपाय सर्वे षां मंत्रं जप्त्वा निरंतरं १० ततो वर्षशते पूर्णे
प्रसन्नोऽभूद्गजाननः दर्शयामास रूपं स्वं तेभ्यो मंत्रमयं परं ११ ततस्तत्तपसा तानि ददृशुः सुहृदि स्थिते
मंत्रमेकाक्षरं तेजोयुक्तं ज्ञानकरं परं १२ दृष्ट्वा मंत्रं प्रहृष्टानि ब्रह्माणि नेमुरादरात् तं मंत्रं गृह्य जेपुर्वै
ध्यात्वा हृदि गजाननं १३ मंत्राकारं गणेशानं ध्यात्वा तपः पराणि तु तोषयामासुरत्यंतं तेभ्यस्मयुक्तानि विघ्न
पं १४ दिव्यवर्षसहस्रेण प्रसन्नोऽभूद्गजाननः दर्शयामास रूपं स्वं योगिध्येयमनुत्तमं १५ नरकुंजररू
पं तु दृष्ट्वा हृदि विसिस्मिरे ब्रह्माणि तानि वै तुष्टुवुर्ददौ ज्ञानं सुनिर्मलं १६ तेन तेन गणराजस्य ज्ञातं रूपं विशे २९
षतः सगुणनिर्गुणाभ्यां च युक्तं योगमयं परं १७ ततोऽति हर्षयुक्तानि ज्ञातानि मुनिसत्तमाः निसं ब्रह्माणि
विघ्नेशं ध्यात्वा जपं समाचरन् १८ ततो गणपतिः प्रीतो ययौ तानि सुमक्षितः शिवरूपधरो भक्त्या पंचचित्तकस्त्रिलोचनः १९ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मुंडमालाधरः शंभुर्व्याघ्रचर्मधारकः विभूतिलेपनः सर्वो भोगिनागविभूषणः २० वृषध्वजो वृषारू
ढश्चंद्रखंडत्रिशूलधृक् अर्द्धांगिगिरिजायुक्तो योगींद्रो योगिवंदितः २१ समागतं महेशानं दृष्ट्वा ब्रह्म
णि ब्राह्मणाः विस्मितानि विशेषेण विचारं चक्रुरादरात् २२ गणेशाद्युपयासन्धो ज्ञातैस्तैः सकल महः॥
शिवस्य हृदि बोधेन परस्परमथाब्रुवन् २३ स्वमहिम्नि स्थितं ब्रह्मसाहजं गणपा इति वर्णधर्माय
नास्तत्वतेन धर्माक्षरः स्मृतः २४ तस्य बिंबविमोहेन पतितं मायया युतं जगत्सु ब्रह्मणाज्ञं तद्देनायं वृष
बि३ भध्वजः २५ बिंबौ बिप्रभावेणायं धर्मवर्ण उच्यते नभेदः शास्त्रवादेषु वरदः प्रभविष्यति २६ ततस्तानि
समुत्थाय ब्रह्माणि गणपं पुनः प्रणम्य हृदि संस्थं तं जेपुः शांकं विशेषतः २७ हृष्य तं विधिनाथां सुंप्रहृष्टानि
प्रणम्य च तुष्टुवुर्ब्रह्मरूपाण्यानंदमुख्यानि मानदाः २८ ब्रह्माण्यूचुः॥ नमस्ते धर्मवर्णाय गणेशाय सतिधारिणे॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्कं॰ अ॰ ८

मो॰भा॰पु॰ बिंबायशंकरायेवशंभवे ते नमो नमः २९ अमेयशक्तयेतुभ्यं पार्वतीपतये नमः वृषध्वजायदेवायसह
३० जायनमो नमः ३० मायाश्रयायमायायाअत्मालकायपरात्मने महेश्वरायपूर्णायहेरंबायनमो नमः ३१
जटाजूटधरायेवनिर्मोहायसदाशिव परेशायत्रिशूलादिधारिणे तेनमो नमः ३२ स्वाधीनायनमस्तु
भ्यं पंचवक्त्रधरायच अनाथायसनाथानांनाथायनाथरूपिणे ३३ परब्रह्मस्वरूपायब्रह्माधिपतये
नमः गिरिशायगिरीशायचिह्निताभस्मांगधारिणे ३४ मुंडमालाधरायेवनमस्तेसर्पभूषण नानाभेदप्र
कारेणखेलकायनमो नमः ३५ वामभागप्रसन्नायसन्नायदक्षिणेंगके तयोरभेदयोग्यानंदायतेनमो ३०
नमः ३६ समरूपामहामायादेहस्तेनात्र संशयः अस्याआत्मस्वरूपस्त्वमर्द्धनारीश्वरायेनमः ३७ एतादृ
शं महेशानंपश्यामोब्रह्मरूपिणं सर्वेजानंतिकर्तारंधन्यानितेनवेवयं ३८ धन्यस्त्वमेवत्वमहेतनमे दो दृश्यतेकदा॥ ॥

गं गणनायकं ॥५१॥ सर्वबंधविनिर्मुक्तं बभूव स्वस्वरूपकं ॥ एतत्सर्वं समाख्या
तं मयोगस्य चरित्रकं ॥५२॥ अयोगे दक्ष नैवास्ति त्वमहं ब्रह्म शास्वतं ॥ नगणे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

९ नूः स्वसंवेद्यं तेन निर्वृतिमाप्नुयात् ॥५३॥ यः पठेच्छृणुयाद्वा योऽप्ययोगस्य चरित्रकं
॥ सम्प्रुक्तः सकलान्भोगानंते निर्वृतिमाप्नुयात् ॥५४॥ इति श्रीमदांत्ये मोद्गले महा
पुराणे नवमखंडे योगचरित्रे अयोगचरित्रकथनं नाम द्वितीयोऽध्यायः ॥२॥ मुद्
ल उवाच ॥ अधुनाशृणु दक्ष त्वं पूर्णशांतिप्रदायकं ॥ चरित्रं पूर्णयोगस्य नानायो
गेश्वरस्य यत् ॥१॥ अयोगो मायया हीनः सदा बंधविवर्जितः ॥ ब्रह्मसुखे निमग्न
श्च तिष्ठन्नित्यं विशेषतः ॥२॥ स्वानंदाख्यं परं ब्रह्म नष्टं गाणेशयोगतः ॥ पु
नः सृष्टं तापोऽसौ न पूर्णयोगस्वरूपिणा ॥३॥ एवं पुनः प्रनष्टं तत्कालेन बहुना
विधे ॥ पुनः सृष्टं तथा नष्टं कल्माएवं गतावहु ॥४॥ नित्यमयोगसंस्थः स गाणे
शो ब्रह्मनायकः ॥ विचारमकरोच्चित्ते दक्ष स्वानंदजं भ्रमं ॥५॥ अहो मायाप्रभा ९

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वेण ब्रह्मस्वानंदधारकं ॥ नानाभावयुतं भ्र[illegible]ा पुनभ्रमतिनश्य[illegible] ॥६॥ मायाविही
नभावेनाहंसदामोहवर्जितः ॥ अखंड योगसंयुक्तोतिष्टं ब्रह्मपरायणः ॥७॥ अवि
नाशंपदमत्यंहत्तं केनमहात्मना ॥ नब्रह्मनाम्नासंयुक्तमविनाशिनाविद्यते ॥८॥ द
क्ष उवाच ॥ अविनाशि समाख्यानं देहिरूपं पुरा त्वया ॥ स्वतउत्थानकेनैवसस्टं
तदेवनिश्चितं ॥९॥ स्वसंवेद्यात्परं ब्रह्मायोगरूपं प्रकीर्तितं ॥ तदेव केनयोगीश
विनाशि कथ्यते त्वया ॥१०॥ मुद्गल उवाच ॥ नाम्नोनाम्नादिभेदाश्च स्वानंदात्सं
भवंति च ॥ भेदाभेदादिहीनंतत्स्वसंवेद्यं प्रकीर्तितं ॥११॥ शाब्दस्य बोधदाना
र्थं योगिनस्तं वदंति च ॥ कथितुं नैव शक्यत्वात्किंचित्तु भेदं प्रजायते ॥१२॥ अयो
गमविनाशाख्यं कथयाम्यधुनापरं ॥ नाशरूपं स्वसंवेद्यं बोधार्थं नात्र संशयः ॥१३॥

१० अयोगाग्निं नयाविष्टो बभूव बंधहीनतः॥ निवृत्तिजं सुखं तुछं मानयामास चेतसि॥१४॥
सदा मायाविहीनत्वं मम मात्मिना त्र संश्रयः॥ मायायुक्तविहीनत्वं ब्रह्मणि नैव विद्यते
॥१५॥ विचार्य खेदसंयुक्तो योगमार्गपरोऽभवत्॥ अयोगो हृदि संचिंत्य तपस्तेपे
दारुणं॥१६॥ दृष्ट्वा वर्षगणाध्यक्षः ब्रह्म संतो हृदि संस्थितः॥ दर्शयामास मंत्रं तमे
काक्षरं स्वकीयकं॥१७॥ दृष्ट्वाति हर्षितो योगी जजाप मंत्रमुत्तमं॥ ध्यात्वा मंत्रस्व
रूपस्थं गणेशं शांतिदायकं॥१८॥ स्वयं स्वल्पेन कालेन रूपं गणपतेः प्रभुः॥ दद
र्श गजवक्त्रादिचिन्हयुक्तं महाप्रभुः॥१९॥ ततोऽतिविस्मितो भूत्वा विचारमकरोद्धृ
दि॥ कोयं गजाननो देवः कस्त्वीक्ष्यां संस्थितो हृदि॥२०॥ गणेशरूपया तस्य ज्ञा
नं बभूव शाश्वतं॥ तेन सर्वमयोगेन ज्ञातं विघ्नेशचेष्टितं॥२१॥ ततोऽतिहर्षितो भू

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्वाध्यात्वा देवं गजाननं॥ मंत्रंजजापयोगज्ञः ज्ञानतः श्रात्मर्थमादरात्॥२२॥ स्वयं स्व
ल्पेन कालेन पुरा ययोग जाननः॥ वरदो भक्तवात्सल्यात् महाभक्तस्य भो विधे॥२३॥
दक्ष उवाच॥ वदस्व विप्र आश्चर्यं ज्ञायते न मया परं॥ रहस्यं तैर्वाक्यस्य योगग्रंथि प३
तकस्य च॥२४॥ अष्टौ विनायकाः प्रोक्तास्ते सर्वे गजवक्त्रिणः॥ एकदंतादि चिन्हैश्च
संयुक्ताः सिंदुरप्रभाः॥२५॥ संयोगस्थं गणेशानं भजंते नन्यमानसाः॥ तेषां हृदि
गणेशानः प्रकटो जायते यदा॥२६॥ तदा ते विस्मिता भूत्वा न जानंति स्वरूपकं।
नित्यं गजाननाः प्राहुर्गजाननं कथं मुने॥२७॥ एकाक्षरे रहस्यं ते न जानंति कथं
प्रभो॥ एकाक्षरस्थभावेन संस्थिता नित्यमंजसा॥२८॥ तथा संयोगरूपस्थो ग
णेशो गणनायकं॥ मंत्रयुक्ते न जानाति मंत्राकृतिधरः कथं॥२९॥ अयोगे गणना

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सोयं गजाननाकृतिधरः॥ समंत्रो मंत्रसंयुक्तं न जानाति गणेश्वरं॥३०॥ कीदृग्योग
णनाथस्स्वरूपं योगप्रवाचकः॥ यं न जानंति विघ्नेशास्तदाकृतिधरा अपि॥३१॥ सं
योगगणनाथोपि सिद्धिबुद्धिसमन्वितः॥ अयोगे सिद्धिबुद्धिभ्यां हीनः स एव वर्ण्यते
॥३२॥ रूपं योगगणेशानः संयोगयोगवर्जितः॥ मायाभ्यां संयुतः प्रोक्तः कथं वदर
हस्यकं॥३३॥ मुद्गल उवाच॥ सम्यक्पृष्टं त्वया दक्ष रहस्यं परमाद्भुतं॥ योगिनां
सुखदं पूर्णं शांतिदं भावितात्मनां॥३४॥ एकाग्रचित्तभावेन शृणु तस्य चरित्र
कं॥ अन्यथा भ्रांतिसंयुक्तो भविष्यसि निरंतरं॥३५॥ यथा विश्वमिदं नित्यं ब्रह्माका
रं प्रवर्तते॥ तथापि ब्रह्मरूपं न जानाति हृदिस्थितं॥३६॥ नामरूपविहीनत्वा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न्मंत्रस्तस्य न विद्यते ॥ तपसा युक्तभावेन प्रणवं पश्यति प्रभुं ॥ ३७ ॥ सर्वाकारं महावी
जं प्रणवाकृतिरूपिणं ॥ दृष्ट्वा विस्मयभावेन विचारं कुर्वते हृदि ॥ ३८ ॥ तपसा योगभा
वेन चतुष्पादं जगन्मयं ॥ जानाति कृपया तस्य मंत्रराजं जगद्यथा ॥ ३९ ॥ ततो योगप्र
भावेण प्रणवार्थस्वरूपिणं ॥ देवं सर्वात्मभावस्थं पश्यति विश्वमंजसा ॥ ४० ॥ दृष्ट्वा
ति विस्मितं मत्वा विचारयति चेतसि ॥ तपसा योगभावेन जानाति तं महाप्रभुं ॥ ४१
ततो योगप्रभावेण शांतिस्थं गणनायकं ॥ पश्यति वक्रतुंडाख्यं ब्रह्मस्वानंदगं प
रं ॥ ४२ ॥ प्रणवो देहरूपश्च प्रणवार्थो गजाकृतिः ॥ शिरस्तयोश्च संयोगे गणेशो
योगरूपधृक् ॥ ४३ ॥ योगाकारं महद्रूपं दृष्ट्वा विस्मितमानसं ॥ विश्वं भक्तिसमायु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१२ ॐ भजनार्थं मनोदये ॥४४॥ एतादृशं सुखं त्यक्त्वं ब्रह्मदेहपरं कथं ॥ भवति तस्य से
वां वै कुर्वे नित्यं महात्मनः ॥४५॥ तस्य हृदि स्थितं भावं ज्ञात्वा रूपधरः प्रभुः ॥ गजाननो
बभूवापि दृष्ट्वाति विस्मितं पुनः ॥४६॥ पश्यति तं प्रजानाथ कोयं भिन्नस्वरूपधृक्
॥ ततस्तं कृपया तस्य जानाति योगसेवया ॥४७॥ मूर्त्तिधारं गणेशानं भजते त
न्यभावतः ॥ मंत्रादिना रहस्येण जानीहि विश्वमादरात् ॥४८॥ तथा गणेश्वराः प्रो
क्ता अष्टौ योगप्रवाचकाः ॥ तेषां हृदि स्थितं ब्रह्म स्वसंवेद्यं न संशयः ॥४९॥ म
हदैश्वर्यसंयुक्ता न जानंति कदाचन ॥ वयं ब्रह्मस्वरूपाश्च प्रत्येकं मानयंति ते
५०॥ न मत्तः परमं किंचित् ज्ञात्वा मोहसमन्विताः ॥ विश्वात्मनि च विश्वास्मि

न्न क्रीडायुक्ता बभूविरे ॥ ५१ ॥ कृत्वा नानाविधं खेलं नानाकल्पपरायणाः ॥ एवं
बहुगते काले शांतिमिच्छंति शाश्वतीं ॥ ५२ ॥ ततः क्रीडां विहायैव स्वस्वमंदिरमध्यस
न्स्थिताः ॥ तथापि ते पुनर्विध्वंसस्तु जुरव ज्ञाः स्वयं ॥ ५३ ॥ ततस्ते खेदसंयुक्ता
विचारं कुर्वते परं ॥ केन स्म प्रेरिता विध्वंसजा स्मो विविधं वयं ॥ ५४ ॥ अतः स्वाधी
नता नेन विद्यतेऽपि कदाचन ॥ वयं न ब्रह्मरूपाश्च मायामोहयुताः सदा ॥ ५५ ॥
एवं मनसि संधार्य तपश्चेरुः समाधिदं ॥ तपसा योगसंयुक्ता बभूवुर्नात्र सं
शयः ॥ ५६ ॥ क्रमेण गणपाः सर्वे पूर्णयोगस्वरूपिणः ॥ लयं ययुः सुशांतिस्थाः
शांतिरूपे प्रजापते ॥ ५७ ॥ तत्र विधिं प्रवक्ष्यामि शृणु संशयनाशकं ॥ योगोद्ध

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

धा समाख्यातस्तस्य रूपं सुयोगदं ॥५८॥ शमो दम आसनं च प्राणायामश्चतुर्थकः
॥ प्रत्याहारो धारणा वै ध्यानं समाधिरष्टमः ॥५९॥ स्वधर्मयुक्तभावेन मनो नियम्य यत्
त्नतः ॥ यततेब्रह्मप्राप्त्यर्थं स शमः परिकीर्तितः ॥६०॥ स्वधर्मस्थितिमास्थाय नियमा
दिस्वभावतः ॥ दमेद्देहं सुशांत्यर्थं दमस्तेन स कथ्यते ॥६१॥ स्वस्तिकादीनि भो दक्ष
आसनानि विशेषतः ॥ साधयित्वा समातिष्ठेद्योगार्थमासनं स्मृतं ॥६२॥ प्राणाया
मं ततोभ्यस्य लघ्वादिकं क्रमेण च ॥ योगार्थं साधयेद्वा पुंस प्राणायाम उच्यते ॥६३॥
नानाविषयभोगार्थं गच्छंतींद्रियकानि तु ॥ तेभ्यस्तानि समाहृत्य योगयुक्तानि कार
येत् ॥६४॥ समनांसि सुशांत्यर्थं हृत्वा हृत्वा पुनः पुनः ॥ इंद्रियाणि नरः कुर्यात्प्रत्या
हारः स वै स्मृतः ॥६५॥ महावाक्यादिभिः प्रोक्तं ब्रह्मज्ञानार्थभावतः ॥ संधार्य संभ्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मे दक्ष धारणासम्प्रकीर्तिता ॥६६॥ हृदि ब्रह्मावबोधश्च जायते ऐक्यभावतः ॥ स्वस्थ
ने न समाख्यातं ध्यानं ब्रह्मसुखप्रदं ॥६७॥ ततो ब्रह्मणि सोप्येवं लीनः संजायते परे ॥
न ब्रह्म न स्वयं यत्र समाधिः परिकीर्तितः ॥६८॥ इदं योगाष्टकं प्रोक्तं योगशास्त्रार्थमाद
रात् ॥ सेवतां ब्रह्मदं पूर्णं भविष्यति न संशयः ॥६९॥ तत्र मायायुता जीवा भिन्नदेह
धरा मता ॥ तेषामष्टकमेवं तद्दत्तं तेसाधनात्मकं ॥७०॥ ब्रह्माकाराणि प्रोक्तानि
धा ३ तत्त्वानि विविधानि तु ॥ विश्वरूपाणि सर्वाणि ब्रह्माण्यन्नमुखानि च ॥७१॥ तेषां योगः
समाख्यातस्त्रिविधो नात्र संशयः ॥ देहादिभावशून्यत्वात्तच्छृणुष्व सुखप्रदं ॥७२॥
धारणाध्यानकं दक्ष समाधिः परिकीर्तितः ॥ त्रिभिर्योगं समाराध्य भवंति शांति
Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१४ गानि तु ॥७३॥ स्वस्व ब्रह्मणि ये संति भोगा ब्रह्मसुखात्मकाः ॥ तांस्त्यज्य धारयेत्तु ब्रह्म तप
स्तदेव कथ्यते ॥७४॥ पूर्णज्ञानं त्वयार्थं मस्यं तं ब्रह्माणि संभवंति चेत्तु ॥ त्यज्य भोगांस्तपस्ते
षां ज्ञातव्यं विबुधैः परं ॥७५॥ मनोवाणीभिर्विहीनं तं न मनोवाणिमयं न च ॥ ब्रह्मवे
देषु विख्यातं तं तदेवगणनायकः ॥७६॥ न तत्र सगुणं दक्ष निर्गुणं नैव वर्तते ॥ गणेशो
पत्त्यवेदेषु योगरूपस्ततः स्मृतः ॥७७॥ ब्रह्माणि खेदयुक्तानि पराधीनतया यदा ॥ त
पश्चेरुस्तदा तानि विचार्य ब्रह्मप्राप्तये ॥७८॥ अतितपोबलेनैव हृदि स्फूर्तिः प्रजायते
॥ योगस्य मंत्रराजं तं जानीहि ब्रह्मणां विधे ॥७९॥ ततो हर्षयुतान्येव स्वस्वरूपस्तदनुभ
वं ॥ जपस्वरूपं तेषां वै ब्रह्मणां भवति प्रभो ॥८०॥ ततो योगं हृदि संस्थं दृष्ट्वा तानि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सर्वदा ॥ तद्देवगणराजस्य रूपं तत्र प्रकीर्त्तितं ॥ ८१ ॥ ततस्तल्लीनभावेन तिष्ठंति ब्र
ह्मकादिवै ॥ गणेशस्य स्वरूपाख्ये यानत्र संकथ्यते बुधैः ॥ ८२ ॥ योगमेतादृशं ब्रह्मयदि
देहयुतो भवेत् ॥ तदा तं प्रभविष्यामो नित्यमिच्छंति तानि तु ॥ ८३ ॥ ब्रह्मदेहधरः सोपि
बभूव सक्तिमोहितः ॥ आययौ वरदानार्थं तेषांग्रे गजाननं ॥ ८४ ॥ ब्रह्माकोराणि वि
न्हानि कथितानि पुरा मया ॥ गणेशस्य स्वरूपे तु नान्यपन्थं श्रुतादृशं ॥ ८५ ॥ तत
स्तानि प्रणेमुस्तं पुष्टुवुस्तं च नित्यशः ॥ अंते योगमयान्येव बभूवुर्नात्र संशयः ॥ ८६ ॥
एतत्ते सर्वसमाख्यातं ब्रह्मणां चरितं मया ॥ तेषां योगादिको भावार मन्यच्छृणु प्रजापते
॥ ८७ ॥ वक्रतुंडो गणेशानो यदि रवेदसमन्वितः ॥ पराधीनतया दक्षशांतियोगप

रोभवेत्॥८८॥तदा तपो युतः सो पि त्रैधयोगार्थमादरात्॥अमेनेन हृदि स्थं तं लो
कयेदेकदंतकं॥८९॥देहेषु ब्रह्मभावेन वक्रतुंडः स्थितोभवेत्॥तस्माद्देही स्थितः
श्रेष्ठो सिन्नाकारः प्रकीर्त्तितः॥९०॥अतोयं वक्रतुंडस्तं गजाननं परात्परं॥एक
दंतं नजानाति तत्र भेदं वदाम्यहं॥९१॥त्रिगुणाकारदेहश्च तुरीयं मस्तकं गजं॥
वक्रतुंडस्तयोर्योगे बिंदुब्रह्मप्रवाचकः॥९२॥चतुर्विधेषु देहेषु मोहयुक्तं च य
त्स्मृतं॥सदाभेदविहीनं तं जीवसंज्ञं प्रकथ्यते॥९३॥मोहहीनं सदा साक्षिरूपं
परात्मधारकं॥एकदंतस्तयोर्योगे सोहं मात्रात्मकः स्मृतः॥९४॥जीवो देह
स्वरूपस्थः परमात्मा शिरः स्मृतं॥गजाकारं न संदेह एकदंतस्य नित्यदा॥९५॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

जीवात्मपरमात्मानौ दृष्ट्वा भेदविवर्जितौ ॥ विस्मितः सम्भवेत्तत्र वक्रतुंडो गजाननः ॥ ६ ॥
नानाभेदसमायुक्तो वक्रतुंडो मयोदितः ॥ भेदहीनमेकदंतं दृष्ट्वा प्रष्टुकृतं पुनः ॥ ७ ॥ स्वे
हृदिस्थं सोहमादौ यत्र ब्रह्माकारं प्रकथ्यते ॥ विंदौ स्त्वदेकदंताख्यं नदेहादियुतं क
दा ॥ ८ ॥ यथा जगदिदं सर्वं ब्रह्माकारं प्रकीर्तितं ॥ तथायं वक्रतुंडो हि ह्येकदंतस्व
रूपधृक् ॥ १० ॥ सेवार्थं वक्रतुंडेन प्रार्थितं हृदि संगतं ॥ ब्रह्मनंदं वभौ दक्ष एकदं
तो बभूव हे ॥ ११ ॥ सगुणं नरसंज्ञस्थं निर्गुणं गजवाचकं ॥ तयोर्योगपरं ब्रह्म ग
जाननः प्रकथ्यते ॥ १ ॥ सेवार्थं प्रार्थितं सर्वैस्तद्देवदेहवानभूत् ॥ गणेशो ब्रह्मरूपा
ख्यो नानाब्रह्मसु संस्थितः ॥ २ ॥ अतो गणेश्वरं दक्ष न जानाति गणेश्वरः ॥ नानामोह
लो० १ समायुक्तं भ्रांतिभावात्सुखांतिदं ॥ ३ ॥ स्वतनुत्थानभावेन देहो विंदुमयः स्मृतः ॥ सो

हेरंबो रोगजाकारं तयोर्योगे महोदरः ॥४॥ एवं नानाविभेदैश्च नानाब्रह्मपरायणाः ॥
गणेश्वरः स्थितस्तेषु गजाननादिचिह्नितः ॥५॥ संयोगे गणनाथस्य स्वस्वनउत्थानकं
वपुः ॥ परतो त्थानकं तस्य मस्तकं नात्र संशयः ॥६॥ अयोगे बुद्धिहीनं तु मस्तकं सि
द्धिवर्जितं ॥ वपुस्तयोर्न संयोगे गणेशः परिकीर्तितः ॥७॥ पूर्णयोगे शरीरं तु संयो
गवाचकं मतं ॥ अयोगवाचकं तस्य मस्तकं तु गजाकृतिः ॥८॥ अविनाशार्थसंयुक्तो
गजशब्दः प्रकीर्तितः ॥ अयोगान्तपरं ब्रह्म विनाशाख्यं प्रकथ्यते ॥९॥ संयोगायो
गभावाख्या भ्रांतिः सर्वत्र पठ्यते ॥ निरोधश्चित्तगा दक्ष सा सिद्धिः परमा मता ॥१०॥
संयोगायोगभावस्था बुद्धिर्भ्रांतिधरा मता ॥ तयोः स्वामी गणाध्यक्षः पूर्णयोगप्र
वाचकः ॥११॥ अहं गणेशरूपश्च संयोगायोगको मम ॥ कुतो माया प्रभावाख्या ते

न शांतिं लभते नरः ॥१२॥ सर्वत्राभेदभावेन संयोगात्मगजाननः ॥ तिष्ठंति नात्र संदेहः
संयोगमायया युतः ॥१३॥ सर्वत्राभेदहीनश्च योगरूपो गजाननः ॥ अयोगमायया
युक्तस्तिष्ठति व्यतिरेकतः ॥१४॥ यदि सर्वात्मकं योगं वदामि गणनायकं ॥ नाना ब्र
ह्मसु संस्थं तमन्वयाख्यं नदाविदुः ॥१५॥ नागतं नगतं योगं वदामि चेद्गजाननं ॥ ना
नाब्रह्मसु मुक्तं तं व्यतिरेकात्मकं जगुः ॥१६॥ अतश्चित्तनिरोधेनाहं गणेशो न संश
यः ॥ चित्तपंचकमुत्सृज्य पूर्णयोगमवाप्नुयात् ॥१७॥ तत्र समाधिजं सौख्यं वदामि
युक्तिभावतः ॥ गणेशोऽहं तदाकारो भवामि यदि योगतः ॥१८॥ तदा संयोगजः प्रोक्तो
नुभवो योगिनां हृदि ॥ यदाहं गणनाथश्च आगतो न गतः कदा ॥१९॥ तदा ह्ययोग
जः प्रोक्तोनुभवः शांतिदायकः ॥ अतो योगमयो योगस्तत्र कथं प्रवर्त्तते ॥२०॥ वि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

त्वं नानाविधं दक्ष संयोगायोगधारकं ॥ योगे योगात्मको हं वै सदा शांतिः प्रलक्ष्यते
॥२१॥ शांतीनां शांतिरूपा सा योगशांतिः प्रजापते ॥ तस्मात्परं न विद्येत ब्रह्मयोगा-
त्सुनिश्चितं ॥२२॥ अतो योगपनाथस्त्वं ब्रह्मणस्पतिरुच्यते ॥ संयोगायोगकादी-
नां ब्रह्मणां पितृभावतः ॥२३॥ एतत्ते सर्वं समाख्यातं रहस्यं परमाद्भुतं ॥ गजाननस्य
ते दक्ष प्रवृत्तं शृणु सांप्रतं ॥२४॥ इति श्रीमदांत्ये मौद्गले महापुराणे नवमखंडे यो-
गचरित्रे नानाब्रह्मस्थगणेशरूपवर्णनं नाम तृतीयोध्यायः ॥३॥ गणेशाय नमः ॥
मुद्गल उवाच ॥ तपसा भक्तिभावेनागतं दृष्ट्वा गजाननं ॥ अयोग हर्षितोत्यंतमुत्था-
य प्रणनाम तं ॥१॥ ततः पूज्य गणेशानं नानोपचारकैः प्रभुं ॥ पुनः प्रणम्य विघ्ने-
शं तुष्टाव करसंपुटः ॥२॥ अयोग उवाच ॥ शांतिस्वरूपाय सुशांतिदायवाणी

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मनोहीननमायद्वंद्वे ॥ वाणीमनोयुक्तप्रचारिणे वैयोगाय योगाधिपतेनमस्ते ॥३॥
वाणीमनोयुक्तमयंवदामिनोविश्वरूपोसिकथंस्तवीमि ॥ नित्यंगणेशाय नमोमहा
त्मनेयोगाययोगाधिपतेनमस्ते ॥४॥ वाणीमनोहीनमयंकथंत्वां ब्रूम्यध्य संयोग
मयंकदान ॥ नोयोगरूपंत्वथते नमो वैयोगाय ॥५॥ त्वत्तः प्रसूतानिमहानुभावब्र
ह्माणिविश्वानिपराणिभूयः ॥ त्वय्येवलीनानिह्यभिन्नंवायोगाय ॥६॥ नित्यंह्य गं ५
योगायनिवृत्तिदायमायाविहीनायगणाधिपाय ॥ वाणीमनोहीननयासुल
भ्ययोगाय ॥७॥ स्वानंदरूपायसुशांतिदाय सिध्द्याच बुध्द्यासहखेलकाय ॥ वाणी
मनोहीननिजात्मलभ्ययोगाय ॥ अव्यक्तरूपायस्वसहजायमोहे नहीना
यसदात्मिताय ॥ त्रैविध्यनाथायस्वनेतिकेत्रैयोगाय ॥ ९ ॥ सामान्यरूपायत्रयी

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

२ नानोम्न भेदेषु च तन्मयाय सर्वस्वरूपाय चशान्तये नो ।आनंत्यमाविश्वस्तु मोहदाय योगा०॥११॥२

१८ मयाय दुंदुभ्रकाग्नाय च विष्णवे ते ॥आनंदनाथाय स्तुरवेलकाय योगाय०॥१०॥आत्मस्व
रूपाय सदामृतस्थ योगेन संलक्ष्यतमाय भोनो ॥भेदैर्विहीनाय च जीवनाय योगा० ४
१२॥साक्षिस्वरूपाय च सांख्ययोग लक्ष्य स्वरूपाय सदात्मसंस्थ ॥बोधेन हीनाय पर
रूपराय योगा०॥१३॥बोधस्वरूपाय विहारके ते हते सदापालकभाव धारिनू॥ ते
विध्यहीनाय महोदराय योगाये०॥१४॥सोहं स्वरूपाय च चिन्मयाय मोहेन युक्ता
य च हीनकाय ॥देहि स्वरूपेण विहारकर्त्रे योगाय ॥१५॥बिंदु प्रचुराय चतुष्प
दाय चतुर्विधेषु प्रभवाय तुभ्यं ॥आनंत्य तत्वाय च देहभोक्ते योगा०॥१६॥तुर्या
त्मदेहाय लयात्मकाय कालस्वरूपाय गुणेश्वराय ॥नादात्मकाय प्यात्रे देहगा
य यो०॥१७॥आनंदकोशात्मक संस्थिताय प्राज्ञाय सोषुप्तिमयाय तुभ्यं ॥नि
त्येश्वरायेव तयोः प्रचारिनू योगाय०॥१८॥बाह्य स्थिताय न्नमयाय विश्ववेश्वा १८

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नरायैवतयोः प्रचारिणे ॥ स्थूलस्वरूपाय च जाग्रद्धारस्थयोगाय ०॥२०॥ विश्वस्थदेहवि
ध्यमयाय तुभ्यं ननांडरूपाय च स्वेलेकाय ॥ ज्ञानैकत्वधात्रे हरये ज्ञीवाय योगाय ०॥२१॥
एतेगणेशाधिपते कलौ त्वा विघ्नेश्वरास्ते गणनायकाय ॥ नत्वं सदेतैः सहिताय तु
भ्यं योगाय ०॥२२॥ स्तौमि कथं नाथ गणेश रूपं संयोगहीनं च ह्ययोगहीनं ॥ तादात्म्य
रूपं भव तुष्टचित्त योगाय योगाधिपते नमस्ते ॥२३॥ मुद्गल उवाच ॥ एवं स्तु
त्वा गणेशानं प्रणनाम कृतांजलिः ॥ अयोगस्तं गणाधीशो जगाद घननिःस्वनः ॥
२४॥ गणेश उवाच ॥ वरान्वृणु महाभाग मनसीप्सितरूपवान् ॥ दास्यामि भक्ति
तुष्टोहं स्तोत्रेणानेन योगप ॥२५॥ त्वया कृतमिदं स्तोत्रं योगशांतिपदप्रदं ॥ पठ
तां शृण्वतां नित्यं नानासिद्धिप्रदं भवेत् ॥२६॥ यं यं मिच्छति तं तं वै दास्यामि स्तोत्र

१९ पाठतः॥ मयि प्रीतिकरं चास्तु भक्तिभावप्रदं तथा ॥२७॥ एकविंशतिवारं चैकविं
शतिदिनावधिः॥ पठति यस्य सर्वं च दास्यामि दुर्लभं हि चेत्॥ २८॥ एवमुक्त्वा ग
णेशानः स्वस्वजेतं गणाधिपं॥ अयोगरूपिणं हर्षसंयुक्तं प्रचकार ह॥ २९॥ ततो
योगी गणाध्यक्षं प्रणम्य च पुनः पुनः॥ जगाद भक्तिसंयुक्तो हृष्टरोमा सुहर्षि
तः॥ ३०॥ अयोग उवाच॥ यदि तुष्टो वरान्मे त्वं दास्यसि भक्तिमोहितः॥ तदा ते पद
युग्मे मे भक्तिं देहि दृढां परां॥ ३१॥ पूर्णयोगस्वरूपस्थं मां कुरुष्व गजानन॥
सुखं मुक्तस्वरूपस्थं नेच्छामि नाथ ते नमः॥ ३२॥ मुद्गल उवाच॥ अयोग गण
राजस्य श्रुत्वा वचनमुत्तमं॥ जगाद तं गणेशानस्तथेत्यंतर्हितो भवत्॥ ३३॥
अयोगस्तं हृदि स्थाप्य भजते नन्यमानसः॥ अंते योगमयः सोपि बभूव मोक्ष १९

नायकः॥३४॥ इति ते सर्वमाख्यातं चरितं गणपस्य यत्॥ पूर्वयोगधरस्यापि
समासेन प्रजापते॥३५॥ अनंतस्त्वं गणराजं तं भज स्वभक्तिसंयुतः॥ तेन यत्नमपि सं
पूर्णं करिष्यति न संशयः॥३६॥ अंते योगयुतश्चैव ब्रह्मभूतो भविष्यसि॥ आज्ञां
देहि गमिष्यामि तदा तिष्ठ सुतोषितः॥३७॥ रहस्यं गणपानाथस्य कथितं सकलं मया॥
नान्यत्किंचिद्दतो दक्षपरं वेदादिषु मतं॥३८॥ यः श्रृणुयात्स देहेपि सर्वसंलसे
द्धुभं॥ अंते योगमयो भूत्वा संतिष्ठेद्धृदयापाकृतिः॥३९॥ इति श्रीमदांत्ये मौद्गले महा
पुराणे नवमखंडे योगचरित्रे पूर्णयोगचरित्रवर्णनं नाम चतुर्थोध्यायः॥४॥
दक्ष उवाच॥ धन्योहं कृतकृत्योहं कृतस्त्वया महामुने॥ येन [redacted]
[redacted] गणेशमाहात्म्यं श्रावितं योगदायकं॥१॥ गणेशगीता सोरादि भुक

२० श्रितं विशेषतः॥ ज्ञानं योगप्रदं पूर्णं संक्षेपेण त्वया परं॥२॥ तत्र श्रुतं मया सर्व
मतः सुलभतो वद॥ योगक्रमयुतं पूर्णं येन योगी नरो भवेत्॥३॥ सूत उवाच
एवं पृष्टो महायोगी मुद्गलस्तमुवाच यत्॥ हर्षेण महता युक्तस्तत्तेहं कथयामि
नु॥४॥ मुद्गल उवाच॥ धन्योसि कृतकृत्योसि साक्षाद्रूपापन्नतः किल॥ विभूतिवा
चकस्तत्र न चित्रमिदमुत्तमं॥५॥ त्वया पृष्टं महाभाग लोकोपकारकारकं॥ सर्वेषां
सुलभेनैव योगशांतिपदप्रदं॥६॥ कथयामि च ते प्रीत्या गुह्यं वेदरहस्यकं॥ शृणु
चैकमना दक्ष योगं शांतिप्रदायकं॥७॥ चित्तं पंचविधं प्रोक्तं तेषु पंचविधो रसः॥
सरसं चित्तमुत्सृज्य योगी भवति मानवः॥८॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं च निरो
धकं॥ चित्तं पंचविधं विद्धि जगत्सु ब्रह्मसु स्थितं॥९॥ व्यष्टिभावे स्थितायेनुजं तवो २०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विविधात्मकाः॥ लक्षचतुरशीतिषु योनिषु संभवा किल॥१०॥ देहभोगादिमार्गेषु
कुशलाः संभवंति ये॥ तेषु स्वस्वरूपं चेषु नानाकार्यपरायणाः॥११॥ नैर्ष्किनं क
र्यसिध्यर्थं चित्तं कार्येषु नित्यदा॥ तत्तत्कार्यप्रकाशो न प्रकाशाय नितं हृदि॥१२॥ ते
न कार्येषु दक्षास्ते भवंति नात्र संशयः॥ तदेव क्षिप्तसंज्ञं तं चित्तं ज्ञानी हि मानद॥१३॥
केचित्स्वल्पज्ञकास्तेषु केचि ज्ञानाधिका मताः॥ मध्यमा केचिदेवं तु नानाभेदा
स्थिता नराः॥१४॥ त्रिविधेषु विभागेषु स्थिता नानाविभेदतः॥ नानाज्ञानयुतास्ते
षां रूपं न कथितुं क्षमं॥१५॥ लक्षचतुरशीतिषु जंतवो विविधात्मकाः॥ व्यष्टिस्था
सर्वकार्येषु ज्ञानहीना भवंति ये॥१६॥ ते मूढाः कथ्यते लोके विषये चतुरेः स

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२१ दा॥ तेषु नानाविधास्ते दा अल्पाधिकप्रमध्यतः॥१७॥ तेषां प्रकाशि कुं चित्तं नाना
मूढस्वभावगं॥ न देव मूढ संज्ञाख्यं चित्तं ज्ञातव्यमंजसा॥१८॥ परैः संबोधितो
जंतुर्न बुबोध विचारतः॥ कार्यं नानाविधं तस्य चित्तं मूढं प्रकीर्तितं॥१९॥ व्युत्थितस्था
येन एदक्ष स्वधर्मनिरताः सदा॥ नानातपः पराभूत्वा मुक्तिमिच्छंति शाश्वतीं॥२०॥
विषयेषु विरज्येव सदा ब्रह्मपरायणाः॥ कुर्वंति विविधं कर्माहर्निशं मुक्तिकारणात्
२१॥ तदपि हृदये ब्रह्म न दृष्टं तैर्महात्मभिः॥ न संसारसुखे चित्तं तेषां रमति कर्हि
चित्॥२२॥ अतो विक्षिप्त चित्ताख्यं मनायोगिजनैः पुरा॥ ब्रह्मार्पणं क्रियासर्वाः कुर्वं
त्यं नरबाह्यजाः॥२३॥ विक्षेपणे वक्षिप्तो हं संसारे मायया सदा॥ विगतक्षेपणं

कुर्वे नानासाधनभावतः ॥२४॥ तेषां मुक्त्यर्थमत्यंतं प्रकाशयति सा वनां ॥ चित्तं कि
यात्मकं तेन विक्षिप्तं तत्र कीर्तितं ॥२५॥ तत्र नानाक्रियायाश्च सामर्थ्येन विमोहि
तः ॥ जानाति देवता तुष्टा मम मोपरि न संशयः ॥२६॥ कदा देवप्रसादादिं गृह्या विक्षेप
संयुतः ॥ अनाधारां क्रियां कुर्याद्देवज्ञा वशगोमुखा ॥२७॥ स्वप्नेषु विविधा भ्रावा
नूपनूपति म [illegible] तत्वेतसः ॥ सत्यं स्वप्नं मदीयं तु मान्यं नाहं जं चरेत् ॥२८॥ एवं विक्षि ३१५
प्तभावेन मोहितः स कदाचन ॥ अनाधारं करोत्येव नानातपः स्वभावतः ॥२९॥ सम
ष्टिभावसंस्थं यश्चित्तं वैराटगं परं ॥ तेन व्यष्टिं समाव्याप्य भुंक्ते सद्विविधान् स्तु
त्वान् ॥३०॥ वैराटस्य क्रिया प्रोक्ता व्यापका शास्त्रसंमते ॥ तत्र व्यापकभावस्य
चित्तं प्रकाशं दंमतं ॥३१॥ तत्वेषु विविधेष्वेव स्थूलसूक्ष्मादिगेषु वै ॥ व्यापकस्या

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२२॥ वकारात्माश्रितं तेषुस्थितं मतं ॥३२॥ समष्टिव्यष्टिसंयोगेनं ब्रह्मस्थूलगं परं ॥ तथास्व
प्नगतं सूक्ष्मं सौषुप्तं समसंस्थितं ॥३३॥ चेतनाप्तावगं पूर्णं तद्विन्नादात्मकं मतं ॥ अस्मि
ताख्यं परं ब्रह्म तेषु विलं प्रकीर्तितं ॥३४॥ समष्टिव्यष्टिभागस्य तयोरैक्यस्यवप्रसोः
॥ प्रकाशाकारकं विद्धि चित्तमेकाग्रसंज्ञितं ॥३५॥ समष्टिव्यष्टिभावेषु नष्टिन्नं सवर्ती
त्यहो ॥ लेनैकाग्र्यं समाख्यातं चित्तं तज्ज्ञानकारकं ॥३६॥ देहश्चतुर्विधः प्रोक्तः स्थूलः
सूक्ष्मः समात्मकः ॥ अस्मिताख्यश्चतुर्थश्च तेषु देहिस्थितो मतः ॥३७॥ देहेषु मोहि
तो देही जीवइत्यभिधीयते ॥ मोहहीनः स एवापि शिवः प्रोक्तो मनीषिभिः ॥३८॥
जीवशिवात्मकासंज्ञा देहिनोभ्रममात्रतः ॥ सदेकात्मस्वभावत्वात्तत्र भेदो न विद्यते
॥३९॥ तत्र जीवशिवाकारभावप्रकाशाकारकं ॥ चित्तमेकाग्रसंज्ञाख्यं तिष्ठति देहि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संश्रितं ॥ ४० ॥ चतुर्णां वपुषां यत्र ब्रह्माकारेण जायते ॥ संयोगं बिंदुरूपं न स्थानं तथ्यं
ब्रह्म सर्वगं ॥ ४१ ॥ चतुष्पदं बुधैः प्रोक्तं चतुर्भिर्वर्जितं सदा ॥ देहानां ब्रह्म विख्यातं ना
नादेहस्वभावकं ॥ ४२ ॥ तत्र चतुष्पदाकार भावप्रकाशकारकं ॥ चतुर्भिर्वर्जितस्वे
च चित्तं तिष्ठंति तद्गतं ॥ ४३ ॥ देहेषु न भवेद् भिन्नं सर्वगमेकभावतः ॥ एकाग्रं कथ्यते चि
त्तं बिंदुधर्मप्रकाशकं ॥ ४४ ॥ जीवब्रह्मात्मभेदस्थं मोहहीनं सदात्मगं ॥ ब्रह्म सोहं
समाख्यातं सदा भ्रांतिविवर्जितं ॥ ४५ ॥ तत्र जीवब्रह्माकार मोहहीनप्रकाशकं ॥
चित्तं सदैकरूपस्थमेकाग्रं कथ्यते बुधैः ॥ ४६ ॥ सोहमात्मात्मकं चित्तमेकाग्रं विध
ते न वै ॥ देहदेहिमयं चित्तमेकाग्रं योगिनां मते ॥ ४७ ॥ देहदेहिसमायोगे स्वचित्त
उत्थानमुच्यते ॥ बोधाख्यं हृदुभावेन ब्रह्मखेलकरं सदा ॥ ४८ ॥ तत्र निरोधकं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चित्तं तस्य स्वरूपं वदाम्यहं ॥ संक्षेपेण प्रजानाथ शृणुष्वावसमन्वितः ॥४९॥ बाह्यस्थू
लं समाख्यातमांतरं सूक्ष्मगं मतं ॥ ब्राह्यांतरैकभावस्थमानंददेहगं परं ॥५०॥ त्रि
भिर्हीनं त्रयाणां च चालकमस्मितात्मकं ॥ अहमनुद्भवेनैतज्ज्ञातव्यं योगिनां हृ
दि ॥५१॥ तेषां संयोगपक्षावेयश्चतुर्णां व पुषां परं ॥ सर्वात्मकं भवेत् ब्रह्मपंचमं
बिंदुसं स्थितं ॥५२॥ पंचविधा परस्यैव कल्पना हृदि संस्थिता ॥ अतः परं न भेदो
ऽस्ति येनास्य कल्पना भवेत् ॥५३॥ बिंदुत्यागे निरालंबं चित्तं भवति सर्वदा ॥ सततं
तत्समाख्यातं ब्रह्मध्यानविहीनतः ॥५४॥ न किंचित् ज्ञायते यत्र भेदहीन स्वभाव
तः ॥ सोहंमात्रात्मकं चित्तं निरालंबसमाधिदं ॥५५॥ अवलंबनगं चित्तं पंचधा
देहसंश्रितं । अवलंबनहीनं तद्देहिगं चिन्मयं भवेत् ॥५६॥ निरालंबपरित्या

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

३६ संशयः॥४०॥ यः शृणुयात्पठेद्वापि योगानुभवरूपगं ॥ महात्म्यं सलभेत्सर्वं वां
छितं शांतिमाप्नुयात् ॥४१॥ ॐ तत्सदिति श्रीमद्योगगीतासूपनिषत्सु गर्भासु
योगशास्त्रे श्रीमद्दांत्येमौद्गले महापुराणे नवमखंडे योगचरित्रे मुद्गलदक्षसं
वादे विज्ञानुभवशांतिसुखवर्णनं योगो नाम षष्ठोऽध्यायः॥ दक्ष उवाच॥
स्थितिं वद महायोगिन् जीवन्मुक्तस्य सौख्यदां ॥ शुभाशुभकृतं तेन कुत्र गच्छति
तन्नृपरं ॥१॥ कायिकं वाचिकं मानसिकं सांसर्गिकं प्रभो ॥ कर्म योगीकृतं सर्वं की
दृशं तस्य का गतिः॥२॥ मुद्गल उवाच॥ जीवन्मुक्तः स्वयं योगी स्वेच्छाचारी भवेत्स
दा ॥ प्रारब्धप्रेरितः साक्षाद्वर्तते नित्यमादरात् ॥३॥ स्वयं ब्रह्मापि संन्यस्तु ब्र
बिंबवच्चित्ते प्रतिष्ठति ॥ योगिनस्तत्कृतं सर्वं न बंधदं भवेत्कदा ॥४॥ नरवत्सर्वं ३६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तं ज्ञात्वा ब्रह्मभूतश्च स वसति नात्र संशयः ॥ सिद्धिबुद्धिमयं सर्वं त्यक्त्वा योगी प्रजा
यते ॥३३॥ ब्रह्मणि नैव संयोगो नायोगो वर्त्तते कदा ॥ सिद्धिबुद्धिभ्रमे नैव वांछति
तस्मात्परं ॥३४॥ गणेशोहं न संदेहो मयि कुतो भवेदिदं ॥ सिद्धिबुद्धिकृतं सर्वं त
न योगी स जायते ॥३५॥ सिद्धिबुद्धिसमायुक्तो ब्रह्मभूतो नरो भवेत् ॥ शांतियोगे
न शांतिस्थो वर्त्तते नित्यमादरात् ॥३६॥ ब्रह्मणि योगभावेन मायायुक्तो विहीन
तः ॥ शांतिं प्राप्तः स्वयं त्यक्त्वा योगं योगी स जायते ॥३७॥ एतादृशो भवेन्नैवानु
भवेन युतं परं ॥ चित्तं भ्रांतिमयं सर्वं संत्यक्त्वा सुतिष्ठति ॥३८॥ योगरसस
मायुक्तं सदा भवति तत्परं ॥ निश्चलं शांतिसंयुक्तं मायामलविवर्जितं ॥३९॥
एतत्ते कथितं सर्वमनुभवभवं सुखं ॥ यज्ज्ञात्वा ब्रह्मभूतः स तिष्ठति नात्र

जगतां ब्रह्मणां संयोगायोगं चित्तमुच्यते ॥२५॥ भ्रांतियुक्तं सवेद्धि तं नानामायावि
मोहितं ॥ योगसेवापरं चित्तं भ्रांतिहीनं तथा भवेत् ॥ २६ ॥ अहंकुतस्तथा ब्रह्मकु
तस्तयोश्चयोगतः ॥ अभेदः सर्वगं चित्तं क्रीडति नात्र संशयः ॥ २७ ॥ नाहं सर्वत्र यो
गेन संयोगाभेदभावतः ॥ तिष्ठामि चित्तमोहेन वदंते योगिनो मुधा ॥ २८ ॥ ब्रह्म ब्रह्म
णि संस्थं यत्नागतं न गतं कदा ॥ अयोगधारको हन्त चित्तं तदेव संमतं ॥ २९ ॥ धर्म
मिच्छति चित्तं च भ्रमयुक्तं तथार्थकं ॥ कामं मोक्षं ब्रह्मभूतं पंचभूमिप्रभावतः ॥ ३० ॥
चित्तरूपा महाबुद्धिस्तत्र भ्रांतिप्रदायका ॥ सिद्धिस्तयोः पतिः साक्षात्क्रीडति
स्वेच्छयापरः ॥ ३१ ॥ चिंतं यत्का महायोगी पंचरूपं सुसंस्थितः ॥ ब्रह्मभूतो भवेन्नूनं चिंतामणिः
स कथ्यते ॥ ३२ ॥

त्यक्त्वाद्ययोगतः ।। तिष्ठति मध्यगः सोपि मत्तो योगस्य सेवया ।। १८ ।। स्वतंत्रपरत
उत्थानहीनं संयोगधारकं ।। ब्रह्मतत्त्वभ्रमं त्यक्त्वा तिष्ठति सोधिमात्रगः ।। १९ ।। ना
गतोहं यदा भ्रांत्या जगत्सु ब्रह्मसु भ्रमन् ।। तदा मे गमनं कुत्र योगे नैव भविष्य
ति ।। २० ।। ब्रह्मभूतस्वभावेन तिष्ठति स नरोत्तमः ।। निवृत्तियोगमाश्रित्य पूर्णं त्याग्रवैं
ते ऽर्त्तसदा ।। २१ ।। अधुना पूर्णयोगस्यानुभवं ते वदाम्यहं ।। योगी येन नरो भूत्वा ति
ष्ठति गणपप्रियः ।। २२ ।। नाहं न ब्रह्म वेदेषु कथितं भेदभ्रांतिदं ।। ब्रह्मणि द्विवि
धं दृक्षं कुतो भवति चिंतनं ।। २३ ।। अहं चित्तमयश्चैव ब्रह्म चित्तमयं तथा ।। चित्तरूपं यं २
च विधं त्यक्त्वा योगी भवति मानवः ।। २४ ।। जगद्रूपं महच्चित्तं ब्रह्मरूपं तथा मतं ।।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नात्ममात्मिका॥ मयि ब्रह्मणि सा कुत्र तिष्ठति ब्रह्मवर्जिता:॥१००॥ यथा मरीचिसं
स्थं च ततोयं व्यर्थभ्रममप्रदं॥ तथा मयि महामाया व्यर्था संयोगधारका॥११॥ ब्रह्मदो
षविहीनं तु वेदे संकथितं पुरा॥ तदेव मायया युक्तं कथं भवति मोहितं॥१२॥ भ्रां
तियुक्तं सुयोगेन भ्रांतिहीनं भवेत्कथं॥ ब्रह्ममायायुता मूर्खा वदंति ब्रह्मवर्जिता:
॥१३॥ अतोहं नागत: पश्यजगत्सु ब्रह्मसु प्रभु:॥ नागतो ब्रह्मणि तत्र पुनर्योगस्य
सेवया॥१४॥ ब्रह्म त्रिविधाकारा मायानैव प्रतिष्ठति॥ मायायानैव नन्तु ब्रह्म
व्यतिरेकप्रभावत:॥१५॥ अयोगस्त्रिविध: प्रोक्तो मृदुमध्याधिमात्रत:॥ तेषां
भेदं प्रवक्ष्यामि मायामूलनिकृंतनं॥१६॥ स्वतो ध्यानभ्रमं त्यक्त्वाहं ब्रह्म व्यति
रेकत:॥ तिष्ठति यो नर: सोपि मृदुयोगयुतो मत:॥१७॥ परतो ध्यानजं दक्ष भ्रमं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रभो ॥१॥ अहं ब्रह्मेति यस्तोकंप इयवेदे विचारतः ॥ तेनैव कृतकृत्यः स भवति योग
सेवया ॥२॥ एवं संयोगयोगेन ब्रह्मणि तन्मयो भवेत् ॥ शांतियुक्तः स वै साक्षाद्दतेने
शांतिधारकः ॥३॥ अतः परमयोगाख्यं वदामि योगमुत्तमं ॥ तत्रानुभवमात्रेण शांति
युक्तो नरो भवेत् ॥४॥ अहं ब्रह्मेति यस्तोकं तत्र कुतो भवेदिदं ॥ तन्मयत्वं प्रजाना
य ब्रह्म ब्रह्मणि संस्थितं ॥५॥ ब्रह्मवाणीविहीनं च मनोगतिविवर्जितं ॥ तदेव नाग
तं कुत्र न ब्रह्मणि गतं पुनः ॥६॥ यदा भिन्नं विहारेषु संसक्तं जायते परं ॥ तदा योगे
न स्वानंदयुक्तं भवति नान्यथा ॥७॥ ब्रह्म ब्रह्मणि सं[illegible]स्थं च नागतं न गतं मतं ॥ कुतो
योगेन तत्रैव तन्मयो जायते नरः ॥८॥ यदाहं ब्रह्मरूपश्च नमायासंभुतः कदा ॥
भ्रांत्या मा नैव जानंति स्वमहिम्नि स्थितं परं ॥९॥ सर्वसंयोगयोगाख्या मायाना

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

३३ पेक्षवेत्कदा॥९३॥महावाक्यप्रयुक्ता वेदा यत्र लीनाः समाधिना॥तदा स्वानंदगाः प्रो
क्ताः परस्य वेदे महात्मभिः॥९४॥अहंभावप्रयुक्तोऽजं तुर्यामायया तुर्यभावया।मोहहीन
श्च युक्तस्य भवति भ्रमभावतः॥९५॥चतुर्विधं मया प्रोक्तं नानाभावपरायणं॥भा
वहीनं समानं वा व्यक्तं तेषु स्थितेन वै॥९६॥ब्रह्मदोषविहीनं तु दोषयुक्तं प्रकी
र्तितं॥साम्यं नेति मयं वक्ष्ये तु हीनं परं भवेत्॥९७॥स्वानंदे तन्मयं योगी भव
ति यः समाधिना॥न पश्यति पुनर्ह्येतच्चतुर्षु मोहिनात्मसु॥९८॥समाधिना यु
तो योगी निजरूपे लयं गतः॥न पुनर्दर्शनं तस्य तेषां तत्र प्रवर्तते॥९९॥कीदृशो
ह मिमांमायां यस्त्यक्त्वा योगसंयुतः॥ब्रह्मणि ब्रह्मभूतः स भवति स्वस्वरूपिणी
१००॥यदा ब्रह्मणि योगेन तन्मयो भवति स्वयं॥स्वपरादिकमेवेदं कुतः पुनर्वेद

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

धीनो हं प्रभावतः॥ ८५॥ त्रयाणामंतरि प्रकृतिस्वामिनात्र संश्रयः॥ ममांतरि नको
पि वै प्रेरकः साधुसत्तम॥ ८६॥ स्वस्वभावेषु नित्यं तु प्रेरकस्त्रिषु संस्थितः॥ तथा
पि नैव मे मोहो नाहं प्रेरक उच्यते॥ ८७॥ अहमव्यक्तरूपश्च वेदसंकथितो मतः॥
नेह नानास्ति भावाख्यो नानात्रिवर्जितः सदा॥ ८८॥ नेह नानाप्रमाणेनाव्यक्तं ब्र
ह्म सनातनं॥ तदेवाहं सुखे सक्तः सदा ब्रह्मणि योगतः॥ ८९॥ सर्वेषां नैतिकर्ताहं
महादंडधरप्रभुः॥ नेतिकर्ता न मे स्तिकर्ते नाव्यक्तो हमंजसा॥ ९०॥ मनोवाणी
विहीनोहमव्यक्तः परमो मतः॥ अनेनानुभवेनैव शांतिमाप्नोति मानवः॥ ९१
अथ पूर्णनिजानंदानुभवं शृणु सौख्यदं॥ येन स्वानंदसंयुक्तो भविष्यसि महाम
ते॥ ९२॥ अहं ब्रह्ममयः साक्षान्मायिमोहविवर्जितः॥ कुतो मोहयुतं ब्रह्म निजरू

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

योगीभवेन्नरः ॥७७॥ अहमव्यक्तरूपश्च त्रिभिर्हीनः सदामतः ॥ त्रिषुमोहवि
हीनोहं त्रिनेतिकारकः परः ॥७८॥ सर्वात्मकं मयिनास्ति तथाप्यतमयंस्व ॥ साम्यं
त्मत्२ स्वाधीनसंज्ञाख्ये ब्रह्मणि नंदनौकं ॥७९॥ उत्थानभावहीनाख्यो मोहसर्वमये स्थि
तः ॥ सदामतमयो मोहो ख्यं उ ब्रह्मणि कथ्यते ॥८०॥ नंदनं हृद्भावेषु साम्यत्वान्मो
हरूपकं ॥ सदा स्वाधीनतातेषु कुतस्त्रिषु भवेत्किल ॥८१॥ त्रिभियुक्तो ह मत्यंतं
तदपि त्रिविमोहतः ॥ भिन्नः सदा त्रयाणां तु नेति कर्ताह मंजसा ॥८२॥ नानाभा
वसमायुक्तो भावहीनं ततः परं ॥ साम्यमुभयं गं तेभ्यः परो व्यक्तस्ततः स्मृतं ॥८३
स्वक्षाहं त्रिविधां मायां तत्र खेलकरो मुदा ॥ तदपि मोहहीनोहं मायायाः स्वप्रभा
वतः ॥८४॥ मदाज्ञया त्रयं नित्यं चलति नात्र संशयः ॥ स्वस्वव्यापारसंयुक्तं स्वा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्वितीयाख्यं तयोः साम्ये ह्मास्थितः ॥६९॥ ब्रह्मणि सर्वभावश्च भावहीनं कुतो भ
वेत्॥ अमरतं मृतम्मूलं च नास्त्येव मयि सर्वदा ॥७०॥ अनंतलिलया युक्तं लीलाहीनं
न विद्यते ॥ मयि लीलायुतं हीनं वर्त्तते पत्यमेमहां ॥७१॥ अखंडरूपभावेन संस्थितो
हं सदामलः ॥ नानाविकारसंयुक्तो ह्याभ्यां हीनो हमंजसा ॥७२॥ ब्रह्मणि सर्वभावश्च
वर्त्तते नात्र संशयः ॥ सदात्मभावस्तत्रैव साम्ये वेदांततः स्मृतं ॥७३॥ यद्यत्संकथ्यते
वेदे तेषु ब्रह्मस्थितं मतं ॥ न वर्ण्यते तथा तत्र तत्त्वं ह्यात्ममयं किल ॥७४॥ अतः समं स
माख्यातं ब्रह्मवेदविवादतः ॥ आनंदमुभयानंदादासमंताधूचारय ॥७५॥ आनं
दोहं न संदेहो ब्रह्म ब्रह्म सुसंस्थितः ॥ अनेनानुभवेनैव शांतियुक्तो न रोभवे
त्॥७६॥ अतस्ते व्यक्तसंज्ञास्त्वं कथयामि प्रजापते ॥ ब्रह्मानुभवमाहात्म्यं येन

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

३१ तु ॥ खेलहीनं न देवापि भवति त्वनयोः परं ॥ ९१ ॥ तत्राहं नागतो दक्षनगतोपि कदा
चन ॥ स्वयमेव स्वभावेन स्वयजीवनं मे प्रभावतः ॥ ९२ ॥ तत्र किं मयि सर्वात्मविकारो दृ
श्यते कदा ॥ भ्रांतियुक्ता वदंति मां जीवनं ब्रह्मणां परं ॥ ९३ ॥ ब्रह्मणां जगतां नैव जी
वनं संघटनं मया ॥ स्वयमेव प्रभावेण मयि तद्दृश्यते वृथा ॥ ९४ ॥ सदा ब्रह्मणि सं
स्थोहं भेदाभेदविवर्जितः ॥ अद्वितीयप्रभावेणात्माहं पूर्णस्वभावतः ॥ ९५ ॥ अने
न योगमुख्येन योगी संजायते नरः ॥ ब्रह्मणि ब्रह्मभूतत्वाद्भ्रांतियुक्तो भवेत्सदा
॥ ९६ ॥ अतः परं समाख्यामि ब्रह्मानुभवरूपकं ॥ कथयामि त्व हं त्रित्वायेन योगी
क्ष २ भवेन्नरः ॥ ९७ ॥ नाहं सर्वात्मकोदैनाहमात्मकः कदा ॥ आनंदोहं तयोः साम्ये ब्र
ह्म ब्रह्मणी भावतः ॥ ९८ ॥ मायामायाबलेनैव सर्वात्मकं प्रतिष्ठितं ॥ एकमेवा ३१

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दाभिभो विधे ॥ तं ज्ञात्वा योगमार्गेण योगी भवति मानवः ॥ सर्वं ब्रह्मेति वेदेषु
कथितं नात्र संशयः ॥ तदेवोपाधिसंयुक्तं सर्वं मायाप्रभावतः ॥५४॥ एकमेवाद्वि
तीयं यत् ब्रह्म वेदविवादतः ॥ तत्र सर्वं कुतो भाति नानाभावपरायणं ॥५५॥ नाहमु
त्थानसंयुक्तो नाहमुत्थानवर्जितः ॥ तयोर्योगमयो हन्ता द्वितीयेस्मिन् स्थितः सदा ॥
५६॥ न सत्यं मयि नास्त्येवानृतं तयोर्युतं परं ॥ ब्रह्मसंयोगदं नास्ति सदाहं ब्रह्मसं
ज्ञितः ॥५७॥ न मया सत्यरूपं तु सृष्टं नानृतरूपकं ॥ तयोर्योगमये नैवाम्हतो
हमात्मभावतः ॥५८॥ आदिमध्यान्तभावश्च मयि कुतो भवंति ते ॥ सदामृतमये
संस्थो हमात्मा ब्रह्मभावितः ॥५९॥ मायया संयुताः सर्वे सर्वेषां जीवनं परं ॥ भाव
दंत विशेषेण मयि सर्वं न विद्यते ॥६०॥ सर्वात्मकं परं ब्रह्म नानारवलक्षुतं भवे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

३० युक्तोपि नांजसा ॥ उत्थानयुक्तहीनोहं पश्यमे योगमुत्तमं ॥ ४५ ॥ मयि ब्रह्मणि
सर्वं तत्स्वस्वरूपमयं सर्वदा ॥ तत्रोत्थानेन युक्तं त्वं हीनत्वं नैव दृश्यते ॥ ४६ ॥ अहो
मायाप्रभावेण मां वदंति विमोहिताः ॥ उत्थानेन युतं हीनं स्वस्वरूपं निजे रतं ॥ ४७
उत्थानसंयुतं ब्रह्मोत्थानहीनं प्रकीर्तितं ॥ ब्रह्मणि तन्मयं सर्वं संयोगं योगभावनः
४८ ॥ मयि ब्रह्मणि संयोगो जायते योगिनां यदा ॥ उत्थानेन युतं हीनं कः पश्यति
न ततःपरं ॥ ४९ ॥ समाधिहीनभावेन पश्यति विविधं सदा ॥ अयोगिनो न संदेहो यो
गिनां नैव विद्यते ॥ ५० ॥ सर्वं ब्रह्मेति वेदेषु कथ्यते वेदवादिभिः ॥ अतो मायां प
रित्यज्य ब्रह्माकारो भवेन्नरः ॥ ५१ ॥ अनेन विधिना योगं साधयेद्यः समाधिना ।
ब्रह्मणि ब्रह्मभूतः सन् शांतिमाप्नोति शाश्वतीं ॥ ५२ ॥ अयं सर्वं स्वरूपस्य योगं व ३०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मायाततः स्वयंसाक्षात्सत्यरूपोभविष्यति ॥३७॥ यद्यहंमाययायुक्तस्तयास्त्री
पुंमयंजगत् ॥ सृजामिचेत्तदासत्यंमयिकुतः प्रतिष्ठति ॥३८॥ अत्रानंदस्वरूपंतु
नास्त्येववेदवादतः ॥ तदेवसत्यमाख्यातमतोबोधोनदृश्यते ॥३९॥ अनंतमखि
लंविश्वंप्रकृतिपुरुषात्मकं ॥ तस्माद्भिन्नोहमेकश्चसत्यरूपोनसंशयः ॥४०॥ यो
गेनैतादृशेनैवशांतियुक्तोभवेन्नरः ॥ संख्यांत्यक्त्वाविविधांस ब्रह्मभूतस्वभा
वतः ॥ ४१॥ अथस्वानंदयोगंतुवक्ष्यामिहितायते ॥ तंशृणुष्वप्रजानाथसा
वधानेनचेतसा ॥४२॥ सत्यमुत्थानहीनंचानंतमुत्थानसंयुतं ॥ ब्रह्मणि द्विवि
धंनास्तिस्वस्वरूपेणनित्यदा ॥४३॥ बोधयुक्तंस्वतोज्ञानंसांख्यमुत्थानवर्जितं ।
तयोर्योगेपरंब्रह्मासत्स्वानंदमयोभवेत् ॥४४॥ उत्थानवर्जितोहन्नोत्थान

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वक्ष्यामि ब्रह्मसम्भूतकं ॥ प्रकृतिर्न तथा दक्ष पुरुषोहं न निश्चितं ॥२९॥ न योगेन बोधो
हं ब्रह्माहं भोगवर्जितः ॥ सदा ब्रह्मणि संस्थश्च खेलहीनप्रभावतः ॥३०॥ मिथ्यारूपं ज
गत्सर्वं जगदात्मा तथा मनः ॥ न योगकरं ब्रह्म मिथ्यामूलप्रकाशकं ॥३१॥ मयि ब्रह्म
णि नास्त्येव प्रकृतिर्वा पुमान्कश्चित् ॥ न योगो भ्रमाकारः सदा खेलपरायणः ॥३२
बोधो नो ध्यानभावश्च जायते ब्रह्मणः सदा ॥ मिथ्याभूतं न देवापि मयि कथं प्रवर्त्त
ते ॥३३॥ सत्यं ब्रह्म इति प्रोक्तं सततं वेदवादिभिः ॥ तत्र खेलो न चाकारः कुतस्तिष्ठ
ति भ्रांतिदः ॥३४॥ सदा ब्रह्मसुखे सक्तं ब्रह्मणि ब्रह्मभावितं ॥ तत्र भेदादिकं नास्ति
स्त्री पुंभावभयं कदा ॥३५॥ मायायां रचितं सर्वमनन्तं नाख्यं न संशयः ॥ सा मयि न
स्थिता वेदनिराधारा भ्रमाश्रिता ॥३६॥ ब्रह्मरूपं च मां दृष्ट्वा स्वयमेव विनश्यति ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नैवदेहस्थोभवाम्यहंकदाचन॥२०॥संततंमयिनास्त्येवविश्वंमय्यनवद्यते॥सदाभे
दविहीनत्वाद्ब्रह्मब्रह्मण्यहंरतः॥२१॥विश्वरूपोहमेवेदंमयिसर्वंप्रतिष्ठितं॥विश्व
हीनोनसंदेहःसदैकरूपधारकः॥२२॥नदृष्टंपाल्यतेनैवह्रियतेनमयाकदा॥वि
श्वंसृष्टंहतंनित्यंपालितंसर्वदामया॥२३॥मयिसंततनश्यावश्यदृश्यतेनविनिश्चितं॥
नविश्वंविविधाकारंनानादेहपरायणं॥२४॥सदाबोधमयोहंनुदेहदेहयुतःसदा॥
ममनत्रनभोदक्षबंधाबंधौप्रकीर्तितौ॥२५॥मययासंयुतोनित्यंदेहदेहीमयोम
तः॥मायाहीनप्रभावेणदेहदेहिविवर्जितः॥२६॥मायायुक्तवियुक्तत्वंमयिकुत्रप्रदृ
श्यते॥सदाहंबोधरूपाख्योब्रह्मणिब्रह्मभावितः॥२७॥एवंबोधात्मकेनैवानुभा
वेनप्रजायते॥योगीयोगसमायुक्तःन्नांत्यापवर्ततेसदा॥२८॥अतःपरंविदेहाख्यं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

२८ तत्र न मे हानिर्दृद्धिर्वृद्धि कर्हिचित् ॥१२॥ न विश्वस्मिन्नहं जीवो न शिवः साक्षिका
वगः ॥ भ्रांत्या मायायुतं हीनं वदंत्ययोगिनः सदा ॥१३॥ यथाकाशभवं मेघपटलं स
र्वतः स्थितं ॥ तत्र सूर्यस्य किं दक्षा छादनं संभवेत्कदा ॥१४॥ नष्टेभ्रे किं रविः साक्षा
च्छादने न विवर्जितः ॥ तथा मोहविमोहौ च मयि भ्रांत्या वदंति ये ॥१५॥ सदैकात्मस्व
रूपाख्ये मयि मोहविमोहकौ ॥ कथं भेदौ प्रवर्त्तेते पश्य मायाप्रभावजौ ॥१६॥ तथा
पि विश्वसंयुक्तो मोहितो हं न संशयः ॥ ज्ञात्वात्मानं विमोहोहं साक्षि सदा न संशयः ॥
१७॥ मायया जीवसंज्ञोहं तथा शिवो न संशयः ॥ मयि ब्रह्मणि विश्वं तद्दृश्यते नैव
दृश्यते ॥१८॥ एवं ज्ञात्वा स्वयं योगी ज्ञानं त्याप्रवर्त्तते सदा ॥ द्वंद्वभावं परित्यज्य
सोहं ब्रह्मणि संस्थितः ॥१९॥ अतः परं प्रवक्ष्यामि ब्रह्मानुभवसौख्यकं ॥ न देहो २८

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गः कदाचन ॥ ब्रह्माहमखिलेषु च तत्तद्भाव विवर्जितः ॥ ४ ॥ न बाह्यसुखसोक्ताहं
नांतरस्थपरायणः ॥ न समानेगनो हं तु नासम्प्रनीति धारकः ॥ ५ ॥ न स्थूलो नैव सू
क्ष्मो हं नानं गाः कदाचन ॥ न नाद देह संस्थश्च सर्वाकारः सदामतः ॥ ६ ॥ च तुष्पा
दमहस्तिचे मायया संधृतामया ॥ माया हीन प्रभावेण पादहीनोहमंजसा ॥ ७ ॥
माया युक्तविमुक्तत्वं मयि नैव प्रतिष्ठितं ॥ मयासंस्थापितं द्वंद्वं तदप्याश्चर्यमुत्तमं
॥ ८ ॥ अनेनानुभवेनैव योगी बिंदुगतो भवेत् ॥ तत्र लीनस्य चाज्ञानेन त्रांत्याप्रवर्त्तते
सदा ॥ ९ ॥ अथाहं भेदहीनश्च न भेदो मयि वर्तते ॥ सदा संततभावेन संस्थितो
त्र निरंतरं ॥ १० ॥ न सृजामि हराम्येव पालयामि न निश्चितं ॥ स्वयमेव जगद्भाति
मयि धृतं यथा भवेत् ॥ ११ ॥ उत्पन्नस्य स्वभावेन स्थितं नष्टं तथा किल ॥ विश्वं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२७ नत्यक्त्वा सर्व्वे योगी शांत्या शांतिमवाप्नुयात् ॥१४॥ लोष्टो न सौवर्णं वमानं द्राक् छं
त्यजेरितान्यपि ॥ प्रारब्धेन तथा कामान् भुनक्ति योगिसत्तमः ॥१५॥ नानाद्वंद्वविहा
रेषु समभावपरायणः ॥ योगी भवति शांत्या च सदा योगसुखे रतः ॥१६॥ ॐ तत्स
दिति श्रीमद्योगगीतासूपनिषत्सु गर्भासु योगशास्त्रे श्रीमद्गांत्ये मौद्गले महापुरा
णे नवमखंडे मुद्गलदक्षसंवादे चित्तभूमिनिरोधयोगो नाम पंचमोऽध्यायः ॥५॥
दक्ष उवाच ॥ योगस्यानुभवं ब्रूहि यत्र शांतिं लभे मनः ॥ रसं त्यक्त्वा तु शांत्या तद्यु
नं तिष्ठेन्महामुने ॥१॥ मुद्गल उवाच ॥ न तत्र दृश्यते दक्ष जगत् ब्रह्म भवं सुखं ॥
तन्मायामयगं दृष्ट्वा तस्मान्निर्द्वंगो भवेत् ॥२॥ नाहं देहो न मे देहो नाहं नानात्ममा
न्वितः ॥ चराचरमयो नैव ताभ्यां संवर्जितो न च ॥३॥ न समष्टिसमायुक्तो न व्यष्टि २७

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पंचभूमिनिरोधेनयोगीभवतिमानवः॥ तत्रशांतिलभेच्चित्तंत्यक्त्वाभूमिभवंभ्रमं॥६॥
योगरूपेसुखंयद्वैयोगिनांहृदिवर्त्तते॥ तदेवकथितंदक्षशक्यतेनकदाचन॥७॥ म
नोवाणीमयंचित्तंचतुर्विधंप्रकीर्तितं॥ मनोवाणीविहीनंतुनिरोधसंज्ञिकंमतं॥८॥
अतोयोगसमाख्यातोमनोवाणीमयोनच॥ मनोवाणीविहीनोपिकथ्यतेनैवयोगि
भिः॥९॥ कीदृशंब्रह्मतत्राहंयोगेनकीदृशंनच॥ ब्रह्मभूतःस्वयंजानप्स्यःशांति
लभेन्नरः॥१०॥ योगयोगीनरोजानस्तत्रनशायतेकदा॥ ब्रह्मवासाधनंकिंचिद्
ब्रह्मभूतस्यकारकं॥११॥ ब्रह्मणितन्मयत्वंचतन्मयवर्जितंनच॥ अतःशांतिसं
मागम्य शांतियोगपरोभवेत्॥१२॥ पंचविधेषुचित्तेषुदृश्यतेजगतांपरं॥ ब्रह्मणा
मैश्वरंसौख्यंतत्ररसंनधारयेत्॥१३॥ नानारसविहीनंतुचित्तंकृत्यप्रजापते॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

२९ योगाख्यं ब्रह्ममायाविवर्जितं। तदेव योगिभिः प्रोक्तं निवृत्तिसुखदायकं॥९७॥ न
तत्र जगतां दृष्ट ब्रह्मणां योग उच्यते॥ तस्यापि तेषु तद्रूपत्वे तेन योग इति स्मृतः॥९८॥ ब्र
ह्मणि तन्मयत्वेन स्वस्य संयोग उच्यते॥ तस्मान्निवृत्तिरूपत्वात्तेन निवृत्तिसंज्ञकं॥९९॥
स्वसंवेद्यस्य नाशो नलस्य तेन समाधिना॥ नागतं नगतं ब्रह्म संयोगः कुत्र जायते॥१००॥
तत्र योगप्रकाशाख्यं चित्तं निरोधसंज्ञिकं॥ निवृत्तिव्यतिरेकेण निवृत्तिसुखदायकं॥१॥
इदं पंचविधं चित्तं कथितं ते प्रजापते। जगत्सु ब्रह्मसु तत्स्थं नानाप्रकारदायकं॥२॥ भू
मयः पंचविख्यातास्तस्य चिविधात्मनः॥ भूमिनां त्यागभावेन ध्वेतं ब्रह्ममयं भवेत्
गसे २ ॥३॥ अतः पंचविधं चित्तं त्यजत्वं यौवया॥ योगी भविष्यसि दक्ष चिंतामणो न संशयः॥४॥
संयोगायोगसंज्ञस्तु निरोधाख्यं मतं बुधैः॥ अतः परो निरोधेन विद्यते सर्वसंमतं॥५॥ २९

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ख्यं चित्तं निरोधकं मतं ॥ ८९ ॥ असत्सद्द्विविधं प्रोक्तं तयोर्योगे समात्मकं ॥ स्वसंवेद्यं परं
ब्रह्म विष्णुर्हि हूं प्रवेशनात् ॥ ९० ॥ तत्रानंदप्रकाशाख्यं चित्तं निरोधसं ज्ञकं ॥ तिष्ठ
ति तेन योगी दृग्गच्छं तितं समाधिना ॥ ९१ ॥ त्रिभिर्हीनं त्रिभिर्युक्तमव्यक्तं नेतिकारकं ॥
मोहहीनप्रभावेन तुरीयं ब्रह्म कथ्यते ॥ ९२ ॥ तदेवाशिवसंज्ञाख्यं ज्ञातव्यं योगसेवया
तत्रनेतिप्रकाशाख्यं चित्तं तिष्ठति तद्रुतं ॥ ९३ ॥ त्रिविधं मोहसंयुक्तं मोहहीनं चतुर्थ
कं ॥ तेषां संयोगभावे वै स्वसंवेद्यं प्रकीर्तितं ॥ ९४ ॥ पूर्णसंयोगभावाख्यं पंचमं ब्रह्म
तत्स्मृतं ॥ तस्मात्परो न संयोगः कथ्यते योगिभिः कदा ॥ ९५ ॥ स एव गणनाथस्तु
स्वानंदाख्यः प्रकीर्तितः ॥ तत्र निजप्रकाशाख्यं चित्तं तिष्ठति सर्वगं ॥ ९६ ॥ अतः परम

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

समाधिःससमाख्यातो ब्रह्मण्यस्यान्वयात्मकः॥८१॥स्वकीयात्सेदृआवस्य तत्र ब्रह्म
प्रकारकं॥चित्तं निरोधसंज्ञं तुनिष्ठति नात्र संशयः॥८२॥संयोगः पंचधा दक्षभवति श्रु
णुरूपकं॥तस्य भिन्नं प्रवक्ष्यामि लोकानां हितकारणात्॥८३॥एते भेदाः समाख्या
तायोगे न लयतां ययुः॥स्वसंवेद्येन संदेहास्तेन सृष्टाश्च पालिताः॥८४॥एतेषां रूप
मास्थाय खेलति स्वस्वरूपकं॥नानालीलाकरं प्रोक्तं नदेव वेदवादिभिः॥८५॥उत्से
तिनाशसंयुक्ता भेदा एते मनीषिभिः॥तेषां निजत्वभावत्वादसत्त्वानंद उच्यते॥८६॥
तत् ब्रह्मशक्तिरूपाख्यं ज्ञातव्यं भेदधारणात्॥तत्रासत्काशभावेन वित्तं तिष्ठति
निश्चितं॥८७॥एते भेदैर्विहीनं यदमृतं ब्रह्म कथ्यते॥एतेषां जीवनं नित्यं न ह्रस
त्त्वस्वरूपकं॥८८॥तत् ब्रह्म सौरमाख्यातं भेदहीनप्रभावतः॥तत्र नित्यप्रकाशा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रूतं वै न तथाप्युत्थानहीनतः॥ स्वयमेव स्वतोत्थानं जायते नात्र संशयः॥७३॥ य
दानृतं भवेद्दृक्ष्नदा सत्यं प्रकीर्त्यते॥ एकं ब्रह्म यदा तिष्ठेत्सत्यं तत्केन कथ्यते॥७४
न दृष्टमनृतं येन न जानाति स सत्यकं॥ सदा तादृशरूपत्वादेकभावप्रदर्शनात्॥
७५॥ अतउत्थानहीनं च धृतं तेन विशेषतः॥ अनृतं तत्थानभावाख्यं स्वयमेवोपजाय
ते॥७६॥ नकृतं तेन सांख्येन स्वयमेव विनिःसृतं॥ अतः परतउत्थानं प्राप्तं तत्र
न संशयः॥७७॥ सांख्याहीनप्रकाशाख्यं चित्तं तत्र प्रवर्तते॥ बोधहीनप्रकाशो न
ज्ञायते तन्निरोधकं॥७८॥ उत्थानेन कृतं ब्रह्म बोधमयं प्रकीर्तितं॥ सांख्यमुत्थान
हीनं च तयोर्योगे निजात्मकं॥७९॥ स्वतः परतउत्थानं तत्र नैव प्रजायते॥ जगतां
ब्रह्मणां योगे भवति स्वस्वरूपं॥८०॥ स्वस्वरूपात्परो नास्ति संयोगस्तन्मयः कदा॥

२४ ततोऽस्थानमत्र काख्याख्यं चित्तनिरोधसंज्ञकं ॥ तिष्ठति नात्र संदेहो ज्ञातव्यं योगिनां हृ
दि ॥६५॥ बोधत्यागे समाख्यातं ब्रह्मसांख्यं प्रजायते ॥ कः सांख्यां कुरुते तस्य बोधनाद्ब्र
प्रभावतः ॥६६॥ उत्थानव
नं नैव प्रजायते ॥६७॥ प्र
तिसांख्यं बोधविहीनत
मायास्तु खं ज्ञात्वा ब्रह्म
तिष्ठितं ॥ तत्र योगं प्रवक्ष्यामि येन योगी न रोभवेत् ॥७०॥ यद्युत्थानसमा त
वलदा भवेत् ॥ उत्थानवर्जितं दक्ष तदेव बीजमाद्यकं ॥७१॥ उत्थानहीनभावेन सां
ख्यं सदा विराजति ॥ स्वयमेव स्वतोत्थानं निःसृतं तत्प्रभावतः ॥७२॥ सांख्येनत

ततोत्थानप्रकाशाख्यं चित्तं निरोधसंज्ञकं ॥ तिष्ठति नात्र संदेहो ज्ञातव्यं योगिनां दृ
ढं ॥६५॥ बोधत्यागे समाख्यातं ब्रह्मसांख्यं प्रजापते ॥ कः संख्यां कुरुते तस्य बोधनात्प्रो
प्रभावतः ॥६६॥ उत्थानवर्जितं ब्रह्मसांख्यं साक्षिस्वभावजं ॥ बोधहीनात्कदा तत्रोत्था
नं नैव प्रजापते ॥६७॥ प्रकृतिसंभवं बोधं पुरुषं संभवं तयोः ॥ योगे सांख्ये न जाना
ति सांख्यं बोधविहीनतः ॥६८॥ बुध्वा सुखं नरस्यैवोत्थानं यथा प्रजापते ॥ तथा
मायासुखं ज्ञात्वा ब्रह्मणोत्थानकं भवेत् ॥६९॥ तथापि परतोत्थानं सांख्ये नित्यं प्र
तिष्ठितं ॥ तत्र योगं प्रवक्ष्यामि येन योगी नरो भवेत् ॥७०॥ यद्युत्थानसमायुक्तं भवति
च तदा भवेत् ॥ उत्थानवर्जितं दक्ष तदेव बीजमाद्यकं ॥७१॥ उत्थानहीनभावेन सां
ख्यं सदा विराजति ॥ स्वयमेव स्वतोत्थानं निःस्थलं तत्स्वभावतः ॥७२॥ सांख्ये तत

गेरुंधनंजायतेसदा॥ चित्तस्यदेहदेहिभ्यांहीनत्वान्मात्रसंज्ञ्याय:॥५७॥ मनोवाणीवि
हीनंतच्चितंज्ञातव्यमादरात्॥ अस्तिनास्तिविहीनत्वादाधाराधेययोगत:॥५८॥ अवलं
बनयुक्तेनपंचधायोगिनांहृदि॥ निरालंबंनतस्मान्मनोवाणीविवर्जितं॥५९॥ बोधे
नबुध्यतेसर्वंनिरालंबसमाधिना॥ अवलंबनकंतद्बोधबोधेनविद्यते॥६०॥ एवं
बोधात्मकंब्रह्मदेहदेहिसमायोगप्रकाशं चित्तउच्यते॥६१॥ देहसौख्यंप्रजानातिदे
हिसौख्यंनिरंतरं॥ तयोर्योगेचयत्सौख्यंजानातिब्रह्मबोधगं॥६२॥ पदानांबोध
भावेनपदार्थानांविशेषत:॥ उत्थानंजायतेतस्मात्त्वतउत्थानमुच्यते॥६३॥ सुखं
ज्ञात्वासमुत्थानंस्वयमेवकरोतिय:॥ देहदेहिसंजित्वासखेलतिब्रह्मनतत्पर:॥६४॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कृतौ सो तथापि दोषवर्जितः ।। ब्रह्मणि ब्रह्मभूतत्वाच्छुभाशुभविवर्जितः ।।५।। प्रार
ब्धेन स्वयं योगी प्रेरितः पुण्यमाचरेत् ।। तीर्थयात्रादिकं सर्वं यज्ञदेवार्चनादिकं ।।६।।
सदा शौचसमायुक्तो नित्यं धर्मपरायणः ।। तथापि पुण्यजं भोगं भुनक्ति नैव निश्चितं
।।७।। अथवा पूर्वजे नैव प्रारब्धेन नियंत्रितः ।। पापानि नित्यमानंदात्स कुर्याद्वि
धानिसः ।।८।। ब्रह्महत्यादिकं सर्वं मातृगमनकादिकं ।। मद्यपानादिकं चौर्यं प्र
कुर्याद्वियोगतः ।।९।। एवं पापसमाचारस्तिष्ठति यदि मानवः ।। योगी पापफलं नै
व भुनक्ति नरवत्कदा ।।१०।। पूर्वजन्मार्जितेनैव प्रारब्धेन प्रजायते ।। कारितं योगीना
तत्र तेन किंचित्कृतं चन ।।११।। मरणे या मतिः प्राणनाद नी लभते गतिं ।। नरो ह्य
योगयुक्तो यो योगी ब्रह्मैव जायते ।।१२।। इदं संरायनार्थं कथितं ब्रह्मणाः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

३७ सुत॥ योगिनांकर्मजंसर्वंमहात्म्यलेशतोमया॥१३॥ योगीयोगसमायुक्तोनपा
पानिकदाचन॥ चरतिधर्मनिष्ठः सभवेतिनात्रसंशयः॥१४॥ लोकोद्धारकराः स
र्वेयोगिनः परिकीर्तिताः॥ नाचरंतिकदापापंनहिंसादिसमन्विताः॥१५॥ फलही
नस्वभावेनधर्मंचरतिनित्यदा॥ योगीलोकोपकारार्थंस्वयंब्रह्मपरायणः॥१६॥
कदाचित्पूर्वसंस्कारात्पापंतेनकृतंपरं॥ नतत्रपापयुक्तोसौ तदर्थंवर्णितंपुरा॥
१७॥ किमर्थंप्राणिनांदुःखदायकंयोगीनाचरेत्॥ पापंपापसमायुक्तोनभवे
पुरा३ न्निश्चितं॥१८॥ सर्वत्रगणनाथंसपश्यत्यनन्यचक्षुषा॥ पुण्येनसुखसंयुक्तंवि
श्वंभवतिनश्चरेत्॥१९॥ प्रारब्धंयोगिनांदक्षनभवेत्तापकारकं॥ पुण्यपापेष्टसमा
युक्तंतेषांप्रारब्धमंजसा॥२०॥ योगार्थंधर्मसंयुक्तोब्रह्मार्पणविधानतः॥ यन ३७

ते जन्मसुप्राज्ञस्तदा योगी भवेन्नरः ॥२१॥ तस्य प्रारब्धकं दक्षकुतो दुर्बुद्धिदायकं
॥ भवति च महायोगिधर्मयुक्तो भवेत्सदा ॥२२॥ अथ योगिजनानां ते स्थितिं वदा
मि सर्वदा ॥ क्रमयुक्तां यया योगी भ्रांतो नैव भवेत्कदा ॥२३॥ साधयित्वा महायोगं
चित्तं निरोधकारकं ॥ पंचविधं परित्यज्य चित्तं योगी भवेन्नरः ॥२४॥ स्थिते स्थिवं तामणिं
सात्वा सच्चित्तः सहसागतः ॥ तदाकारः सर्वयोगी तत्र ब्रह्मणि संरतः ॥२५॥ प्रारब्ध
योगिनां नास्ति भोगदं शास्त्रसंमते ॥ यदा हठयुतो योगी भवेत्प्रारब्धचालकः ॥२६॥
देहपातं प्रकुर्याच्चेदात्महत्यां लभेन्न च ॥ आयुष्यासंयुतो योगी देहं त्यजेद्धि निश्चि
तं ॥२७॥ तथापि योगसंयुक्तो न देहं त्यजति प्रभुः ॥ न प्रारब्धमतिक्रम्य करोति किंचि
दंजसा ॥२८॥ शांतियुक्तः स्वभावेन तिष्ठति नात्र संशयः ॥ यद्यपि तद्भवत्येव माया

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मोहविवर्जितः॥२९॥ देहपातेनक्रियाह्यंदेहरक्षणस्तथा॥ रक्षितं गणनाथेनभवतु
नाद्दश्यंसदा॥३०॥ एवंनिश्चित्यचित्तेनशांतियुक्तस्वभावतः॥ आचरेद्योगसंयुक्तःस्व
धर्मसंस्थितांक्रियां॥३१॥ वर्णाश्रमयुतोयोगीयदिभवेत्ससर्वदा॥ तदास्वधर्मजं
कुर्यात्कर्मनिःसंगभावतः॥३२॥ देहःकर्ममयःप्रोक्तोतस्थोकर्मीकुतोभवेत्॥ अ
वस्थासंभवंकर्मभवतिनकृतंह्यपि॥३३॥ यदिकर्मपरित्यज्यतिहेयोगपरायणः॥
तदादेहनिपातेनयुक्तोभवेन्नसंशयः॥३४॥ अन्नंभक्षणरूपंयद्भवतिकर्मनिश्चि
तं॥ जाग्रत्स्वप्नादिकंसर्वंत्यक्त्वाजीवतितत्कथं॥३५॥ क्रियतेनेनयत्किंचित्साक्रि
यापरिकीर्तिता॥ अतःकर्ममयोदेहस्तेनधर्ममथाचरेत्॥३६॥ देहत्यागसमुद्यु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्तो यदि योगी भवेत्सक्तो ॥ सहने द्वंद्वभावस्य न समर्थः सवै स्मृतः ॥ ३७ ॥ अशांतिसंयु
तः सोपि योगभ्रष्टो यथा नरः ॥ तथा द्वंद्वसमालोक्य सहनेन समर्थकः ॥ ३८ ॥ गर्वोद्धा
न कृतं सर्वं तस्येच्छया च यद्भवेत् ॥ भवतु तादृशं सर्वं सहेन्नित्यं सुशांतिगः ॥ ३९ ॥ स
योगी योगभ्रष्टो न प्रभवेत्किंचिदेउसा ॥ ब्रह्मभूतो महच्छ्रेष्ठः पावनः सर्वदेहिनां ॥ ४० ॥
अतो वर्णाश्रमस्थो यो योगी भवेत्सतां क्रियां ॥ ब्रह्मार्पणतया कुर्याद्बुद्धिध्यात्वाग
जाननं ॥ ४१ ॥ यदि स्वधर्मसंयुक्तं कर्म नैव समाचरेत् ॥ अन्यान्कर्मयुतान्कुर्यात्स्व
वर्णाद्धर्मपालकः ॥ तमक्रियं समालोक्यान्ये त्यजेयुः स्वधर्मकं ॥ ४२ ॥ अतो लो
कोपकारार्थं योगी कर्म समाचरेत् ॥ अन्यान्कर्मयुतान्कुर्यात्स्ववर्णाद्धर्मपालकः
॥ ४३ ॥ सर्वेभ्य आधिको योगी कुर्यात्सकर्म धर्मजं ॥ तादृशं कर्म सर्वोपि करिष्यं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तिविद्रोधनः॥४४॥नेन प्रामान्यमानंदात्कर्म कृतं प्रजापते॥ नदेवसर्वलोकाःक्षमा
न्यंकुर्वंति निश्चितं॥४५॥ ब्रह्मार्पणात्तया कर्म बंधनं न भवेत्कदा॥ ब्रह्मप्राप्तिकरं तस्य
 फलं प्रोक्तं मनीषिभिः॥४६॥ योगिभिश्च कृतं लोकसंग्रहकारणात्॥ असक्तमन
सा नित्यं नैमित्तिकं न बंधदं॥४७॥ सदाब्रह्मसमर्पणत्वेन तेन किंचित्कृतं न च॥ देहस्व
भावजो भावो स वेदस्य निरंतरं॥४८॥ अन्यं मार्गं प्रवक्ष्यामि ये निंदंति स्तुवंति तं॥ यो
गिनां पापभोक्तारो भवंति पुण्यभागिनः॥४९॥ योगिनां यत्कृतं पापं तं स्प्रष्टुं न क्षमं
कदा॥ निंदकांस्तत्समाश्रित्य प्रतिष्ठेत स्म नित्यदा॥५०॥ योगिनां यत्कृतं पुण्यं तद्देव
तं न संस्पृशेत्॥ स्तुवतस्तान्समाश्रित्य नित्यं तिष्ठेत्स्वभावजं॥५१॥ अतो न योगि
नां निंदां कुर्यात्कदा विचक्षणाः॥ सेवा समाचरेत्तेषां तेन सौख्ययुतो भवेत्॥५२॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यद्विवनेस्थितोयोगी आरण्येननियंत्रितः॥ तत्रफलादिकंभुंजन्शांत्यातिष्ठ
त्सनित्यदा॥५३॥ तत्रनिंदाकरास्तस्यसेवाकरास्तथानच। एकएवमहायो
गीशुभाशुभंसमाचरेत्॥५४॥ तदेवदेहपातेस्ययोगिनश्रमतंभवेत्। शु
भाशुभंनिराधारमुपोषणेनसमन्वितं॥५५॥ एतत्तेकथितंदक्षब्रह्मभूतस्य
चेष्टितं॥ कर्मयोगमयंपूर्णंश्रवणाच्छुभदंभवेत्॥५६॥ अथयोगंप्रवक्ष्यामि
ज्ञानात्मकंततःपरं॥ योगिभ्यःसुखदंपूर्णंशांतियुक्तंविशेषतः॥५७॥ देहःक
र्मात्मकःप्रोक्तस्तत्रयोगंसमाचरेत्॥ ब्रह्मार्पणतयाकर्माचरन्सशांतिधा
रकं॥५८॥ ज्ञानंस्फूर्तिमयंप्रोक्तंहृदितिष्ठतिसर्वदा॥ विवेकात्ममयंतत्रज्ञानं
योगंसमाचरेत्॥५९॥ हृदियस्यद्भवेज्ज्ञानंनानायोगार्थसौख्यदं॥ अथवाविष

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४० यार्थानां बोधकं तत्सर्वं संत्यजेत् ॥६०॥ उत्पत्तिनाशसंयुक्तं ज्ञानं विषयबोधकं
॥ ब्रह्मसौख्यप्रदं ज्ञानं योगभूमिप्रभावजं ॥६१॥ उपाधिसंयुतं चैकमनुपाधियुतं
परं ॥ तत्यक्त्वा योगसंयुक्तो सर्वे योगी महायशाः ॥६२॥ ज्ञानानां सकलानां च यो
गे ज्ञानमयः स्मृतः ॥ योगस्तत्र भवेल्लीनो ब्रह्मभूतस्वभावतः ॥६३॥ ब्रह्मापि ब्रह्म
भूतोहं मम ज्ञानं कुतो भवेत् ॥ नाना भ्रांतिकरं हृत्स्थं त्यक्त्वा ब्रह्मपरो भवेत् ॥६४॥
अनेन विधिना सर्वं ज्ञानं त्यक्त्वा हृदि स्थितं ॥ शांतियुक्तः स्वयं योगी तिष्ठेद्ब्रह्मपरा
यणः ॥६५॥ न कर्ताहं कदाचिद्वै कारयिता न निश्चितं ॥ मायामोहयुतानां तेवदं
ति कर्मकारिणां ॥६६॥ अहं साक्षी शरीरस्य देहे नयत्कृतं भवेत् ॥ तन्मयानकृतं क्वा
पि ब्रह्माहं परतः परः ॥६७॥ यद्यत्स्फूर्तिर्भवेन्मे वै सा माया भ्रांतिदायका ॥ तत्स्यां ४०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संस्थितो जीवः सदा साक्षिस्वभावगः ॥६८॥ निर्मोहेन समायुक्तो नमोहवर्जितः कदा ॥
मायया मां वदंत्येव ये योगिनो न संशयः ॥६९॥ एवं सदा महायोगी साक्षिवत्संस्थितो
भवेत् ॥ हृदय ज्ञानयोगस्थस्य त्वकास्फूर्तिभवं भ्रमं ॥७०॥ सर्वत्र रसहीनं यन्मनस्तस्य
महात्मनः ॥ ज्ञांत्वा युक्तं सर्वे दृक्ष ब्रह्मभूतस्य नित्यदा ॥७१॥ एतत्ते कथितो योगो ज्ञा
नात्मको विशेषदः ॥ साक्षिवद्देहसंस्थः स तिष्ठति लेशतो मया ॥७२॥ अतपरं समंबो
गं शृणु स्थितिपरायणं ॥ यं ज्ञात्वा ब्रह्मभूतो यो योगभ्रष्टो भवेन्न सः ॥७३॥ देहः कर्म
मयस्तत्र कर्मयोगं समाचरेत् ॥ मनो विवेकरूपं तु साक्षित्वं तत्र संचरेत् ॥७४॥ अ
हं ब्रह्म यदा दक्ष तत्र कुतो सवेदिदं ॥ द्वंद्वरूपं विशेषेण वक्ष्यामि तस्य रूपकं ॥७५॥
देहः कर्ममयः प्रोक्तो विवेकः कर्मवर्जितः ॥ द्वंद्वं ज्ञात्वा महायोगी समयोगे समाचरे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

४१ त्॥७६॥ देहकर्ममयो हं तु हृदि साक्षी तथामलः॥ उभयोर्योगभावेन भवति किं विदंज
सा॥७७॥ यदा विवेकहीनश्चेद्देहः किं तु करिष्यति॥ देहहीनं मनस्तद्वज्ज्ञानं दं कस्य वा
भवेत्॥७८॥ आनंदमयभावेन संस्थितो हं तदात्मकः॥ उभयत्र ततः स्वस्व व्यापारं कु
रुतः परो॥७९॥ देहकर्ममयो हं वै हृदि विवेकधारकः॥ द्विविधां स्वगतां मायां सदानं
दनधर्मगः॥८०॥ तयोः समानभावेन संस्थितो हं न संशयः॥ अनुपाधेरुपाधेश्च व
र्जितो ब्रह्मसंज्ञितः॥८१॥ अतः समं समाश्रित्य बाह्यां तरे च भावनः॥ यादृशं सं
स्थितं ब्रह्म तादृशं तत्र चाचरेत्॥८२॥ देहकर्मकरो भूत्वा हृदि साक्षिमयो भवेत्॥
उभयं तत्परित्यज्यानंदावस्थां समाचरेत्॥८३॥ यद्यदुभयभावाख्यं नानानंदम
यं परं॥ तत्र योगमयो भूत्वा नित्ये दानंद संयुतः॥८४॥ आनंदानां समायोगे ब्रह्म ४१

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नंदः प्रकीर्तितः॥ उभयेषां प्रजानाथ तादृशं माचरेद्बुधः॥८५॥ मदीयसंगयोगेनो भ
यं प्रवर्तते सदा॥ उभयमाचरेत् सर्वमुभाभ्यां वर्जितोपि सः॥८६॥ द्वयमानंदरू
पाख्या कथिता योगिभिः पुरा॥ ब्रह्मभूतः समास्थाय तिष्ठेत् तां शांतिसंयुतः॥८७॥
अतः परं प्रजानाथ वक्ष्ये शृणु सुखप्रदां॥ सहजाख्यां महायोगी चाचरेत्तं विशेष
तः॥८८॥ देहः कर्ममयः प्रोक्तस्तत्र योगं समाचरेत्॥ ब्रह्मार्पणतया नित्यं कर्मणां
योगिसत्तमः॥८९॥ हृदि साक्षिस्वभावेन तिष्ठत्तयोः परेरतः॥ समभावे समाश्रि
त्य त्रिषु त्रैधं प्रकीर्तितं॥९०॥ तेषु विस्मृतिभावेन भ्रांत्या वापि स्मृतं भवेत्॥ विपरि
तं भवेद्वापि ततः खेदं न धारयेत्॥९१॥ त्रिविधं मायया युक्तं पराधीनं प्रकीर्तितं॥
तूर्यं स्वाधीनरूपाख्यं प्रोक्तं शास्त्रेषु सर्वदा॥९२॥ तूर्येण या त्रिधा भ्रतं चल

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४२ तिनात्र संशयः ॥ स्वस्वप्रारब्धसंयुक्तं सदाभ्यां तमिवास्थितं ॥ ९३ ॥ न कस्याहं कृतिस्त
स्य तुरीयस्य कदाचन ॥ यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ ९४ ॥ अतः प्रारब्ध
न२ योगैर्विस्मितोऽहं स्थि[illegible]तिं परां ॥ योगरूपो च तूर्येण प्रेरितः सर्वधारिणा ॥ ९५ ॥ अथ वा
ज्ञानमोहेन विपरीतं कृतं मया ॥ त्यक्तो योगस्थितिं पूर्णां तत्र प्रारब्धमुख्यकं ॥ ९६ ॥
प्रारब्धधारकं प्रोक्तं तुरीयं नात्र संशयः ॥ तस्येच्छया च यज्ज्ञातं तदेव योगदं भवेत्
॥ ९७ ॥ पराधीनोऽहमत्यंत तूर्येच्छया समन्वितः ॥ करोमि कर्म साक्षित्वमानंदं वा न सं
शयः ॥ ९८ ॥ सदा स्वाधिनभावेन तिष्ठति ब्रह्म तूर्यगं ॥ तुरीयैः खेलकं प्रोक्तं त
स्य किं बंधनं भवेत् ॥ ९९ ॥ यज्ज्ञातं यत्कृतं तेन तुरीयेण न संशयः ॥ तत्र कुतः स्थितो
हं तु स्वेच्छया क्रीडति प्रभुः ॥ १०० ॥ इयं तु सहजावस्था कथिता ते प्रजापते ॥ यज्ज्ञा ४२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तं तत्र सा प्रोक्ता नकृता नदपि ह्यहो ॥१॥ यत्कृतं सहजातेन स्वयमेव प्रवर्तते ॥ यो
गस्तेन समाख्याता संजाता तुर्यसंज्ञिका ॥२॥ अतः परं ब्रह्मभूतं स्वानंदाख्यं प्र
कीर्तितं ॥ तत्र योगस्वरूपाख्यां स्थितिं शृणु सुखप्रदां ॥३॥ स्वाधीनं तुर्यभावाख्यं
पराधीनं त्रिधामतं ॥ तेषां योगेन आत्मस्थो भवेद्योगी निजात्मसु ॥४॥ त्रिविधं
खेलरूपं तु तुर्यः खेलक उच्यते ॥ तयोर्योगे प्रजानाथ स्वानंदस्थो भवेन्नरः ॥५॥
ब्रह्मणि ब्रह्मभूतस्य योगिनेस्य कुतो भवेत् ॥ स्वाधीनं तु पराधीनं मायायुक्तं न सं
शयः ॥६॥ योगी स्थितिं समाश्रित्य चत्वारि चाचरेद्बुधः ॥ तेषां संयोगरूपे पाति
ते तेषु महात्मवान् ॥७॥ कर्मयोगं समाश्रित्य देहचेष्टा समाचरेत् ॥ ज्ञानयो
गं तथाश्रित्य साक्षित्वे माचरेद्बुधः ॥८॥ समयोगं समाश्रित्यानंदस्थ आचरेत्स

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४३

दं ॥ सहजं स समाश्रित्य विपरीतेन मूलकमात् ॥ ९ ॥ चतुर्भिः संयुतो भूत्वा चतुर्भि
र्वर्जितस्तथा ॥ निष्ठ योगमयीं दक्षावस्थामाश्रित्य सर्वदा ॥ १० ॥ अवस्थानिजरू
पेतु कुतो वस्थाप्रधारकः ॥ योगमयी न योर्योगस्यावस्था न प्रकीर्तिता ॥ ११ ॥ चै
तुर्मयी चतुर्हीना योगावस्था प्रकीर्तिता । योगासिस्तां समाश्रित्य योगभ्रष्टो भवे
न्नरः ॥ १२ ॥ अधुना शृणु योगस्थामवस्थां द्वितीयां परां ॥ अयोगधारका पूर्णास
दानिवृत्तिदायकं ॥ १३ ॥ ब्रह्मणि ब्रह्मभूतो यो योगीनां संश्रये स्वरां ॥ सदा निवृत्तिसं
युक्तो योगभ्रष्टो भवेन्नरः ॥ १४ ॥ ब्रह्मणि ब्रह्मसंस्थं तन्नागतं न गतं पुनः ॥ मायायां
ब्रह्म[illegible]भूतो यो वस्थाया धारकः कुतः ॥ १५ ॥ यत्कुर्यात्कारयेद्य[illegible]त्तत्र नैव चलो
कयेत् ॥ मायामयं विनिश्रित्य पंचकं पंचके युगं ॥ १६ ॥ नाहं पंचक अश्वे दैवत

४३

स्तत्त्वतमंजसा॥ मयि कुतः प्रदृश्येत धार्यनिवृत्तिगो भवेत्॥१७॥ जीर्नं मरणं जन्म
योगो योगात्मिकापरा॥ अवस्थामे कुतो मायामोहयुक्तेः स्मृतं बुधैः॥१८॥ अयं यो
गी मयी पूर्णो मवस्थां श्रृणु मानद॥ संयोगायोगहीनायां ययाप्नुवो भवेन्नसः॥
१९॥ ब्रह्मणि ब्रह्मभूतोहं मयि मायामयं परं॥ पंचके च कुतो भाति मायाहीन म
योगकं॥२०॥ विधिनिषेधसंयुक्तं चित्तं भवति सर्वदा॥ विधिनिषेधहीनं तु न देवे जाय
ते बुधा॥२१॥ देहेन कर्मयोगश्च ज्ञानयोर्हृदि जायते॥ उभयत्र समभ्येव तुर्येषु
सहजात्मकः॥२२॥ सर्वसंयोगभावेषु स्वानंदाख्यः प्रवर्तते॥ निवृत्तिषु ह्ययोगा
ख्यो योगेषु शांतियोगकः॥२३॥ एवं नानाविधं योगं समास्थाय महामतिः॥ यो
गी शांत्या सदा तिष्टे ब्रह्मभूतोपि निश्चितं॥२४॥ योगस्थितिः समाख्याता ब्रह्म

४८ भृतसुखप्रदा ॥ अनेन विधिना देहनिर्वाहो योगिनां भवेत् ॥ २५ ॥ वर्णाश्रमस्थितो
योगी चाचरेत्स्थितिमुत्तमां ॥ लोकसंग्रहकार्यार्थमसक्तः स्वत्कलादिषु ॥ २६ ॥
यदा वर्णाश्रमं त्यक्त्वा पंचमाश्रमधारकः ॥ न तस्य स्थितिरूपं तु कदा चिन्नात्र संश्र
यः ॥ २७ ॥ विधिनिषेधहीनोऽयं विनायको भवेत्सदा ॥ यद्यत्कुर्यात्स तत्सर्वं योगरूपं भ
वेत्सदा ॥ २८ ॥ यदि स्थितिसमायुक्तो वेदादिषु प्रमाणतः ॥ तदा विधियुतः सोऽपि भ
वेत्स्व प्रजापते ॥ २९ ॥ यदा स्थितिविहीनोऽयं तिष्ठेत्संकथितं परं ॥ वेदेषु स निषे
धेन न तदा युक्तो भवेत्स रः ॥ ३० ॥ अतः स्थितियुतो योगी स्थितिहीनो यथारुचि ॥ वर्णा
श्रमान्परित्यज्य तिष्ठेद्धि नायको यथा ॥ ३१ ॥ ज्ञानं त्वानित्यं चरेत्सर्वं मनसीप्सितमंज
सा ॥ विधिनिषेधहीनश्च अत्याश्रिरस धारकः ॥ ३२ ॥ एतत्तु गमया ख्यातं योगिनां चे ४८

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्थितं महत्॥ ब्रह्मभूतास्तरं पूर्णमेवं चरेन्निरंतरं॥३३॥ यः शृणुयात्सदैवापि सस
र्वसिद्धिमान्भवेत्॥ अंते योगमयो भूत्वा तिष्ठेत्स गणपे रतः॥३४॥ ॐ तत्सदिति
श्रीमद्योगगीतासूपनिषत्सु गर्भासु योगिनां स्थिति वर्णनयोगो नाम सप्तमोध्या
यः॥ दक्ष उवाच॥ योगज्ञं तु समाश्रित्य योगमभ्यस्य नित्यदा॥ ब्रह्मणि ब्रह्मभू
तः स योगभ्रष्टः कथं भवेत्॥१॥ मायामयं जगत्सर्वं नानाभ्रमसमन्वितं॥ ज्ञात्वा
स्वयं पुनर्भ्रष्टः को नु कं वद मे मुने॥२॥ मुद्गल उवाच॥ ब्रह्मणि ब्रह्मभूतस्य यो
गिनो बिंबसंस्थितं॥ बुद्धौ तस्यां विमाहेन मोहयुक्तं प्रजापते॥३॥ दृष्ट्वा नाना
विधाभोगान्मोहेन मोहितः स्वयं॥ तेषु रसयुतो भूत्वा तानिच्छति निरंतरं॥४॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

८५ तत्र तस्य हृदि दक्ष विवेकः संस्थितो भवेत्॥ तत्स्वरूपं प्रवक्ष्यामि शृणु बुद्धिविशारद॥
॥५॥ अहं ब्रह्मणि योगेन ब्रह्मभूतो न संशयः॥ पापपुण्यादिकं मेनन शुभाशुभफलं
भवेत्॥६॥ यदा भोगं परित्यज्य तिष्ठामि नित्यमादरात्॥ तदा योगस्य वृद्धिर्मे न कलवि
ष्यति निश्चितं॥७॥ यदा नित्यं प्रभुं जानो भोगान्नानाविधान्परान्॥ पुण्यपापमना हि
त्यतदा योगक्षयो न च॥८॥ अतो हं भोगमुत्सृज्य किमर्थं दुःखसंयुतः॥ तिष्ठामि शां
तिमाश्रित्य विधिनिषेधसंयुतः॥९॥ एवं मनसि संधार्य योगी भोगेषु लालसः॥ भव
ति विविधैर्वरस युक्तः क्रमेण सः॥१०॥ अयं मोहः समाख्यातो योगिहृच्छांतिदा
यकः॥ तेन शांतिं परित्यज्य पापपुण्यपरो भवेत्॥११॥ ततः कामं समाश्रित्य देह
सौख्यप्रदायकं॥ इच्छेत्स विविधा भोगान्पुण्यपाप परायणः॥१२॥ भोगार्थं य ८५

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तमानस्ययोगिनः क्रमभावतः॥ तत्रविघ्नकृतं केन ततं क्रोधयुतो भवेत्॥१३॥ येनवि
घ्नं कृतं तेषु भोगेषु तस्य योगिनः॥ तं शत्रुं सेव जानाति भिन्नभावपरायणः॥१४॥
ततअज्ञानसंभूतिः क्रमेणोत्पद्यते परा॥ योगिनश्च तया युक्तोहं तुं तं यततेसदा
१५॥ शत्रुशिक्षार्थमर्थान्सनाना भावसमन्वितः॥ संपाद्य तं तु निर्जित्य भोगान्भु
के प्रयत्नतः॥१६॥ स्वपरज्ञानहीनत्वं गतं तस्य प्रजापते॥ तदेवाज्ञानसंभूतिः
शत्रुमित्र प्रदर्शिनी॥१७॥ ततः शनैः क्रमेण स्वविस्मृतिर्जायते परा॥ तथायुतः
स्वयं देहं मन्यते सत्यरूपकं॥१८॥ देहे संतोषमापन्ने कृतकृत्यमिवस्थितः॥
मन्यते विपरीतेस आत्मानं भाग्यवर्जितं॥१९॥ ततो योगं परित्यज्य स्वयं बिं
बिप्रजायते॥ बिंबे तन्मयभावेनागमिष्यति न संशयः॥२०॥ एवं क्रमेणयो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४८ गीसन्शांतिहीनस्वभावतः॥ सदातिष्ठतितंयोगंनाश्रयतिकदाचन॥२१॥सुख
युक्तेशरीरेऽपि सुखयुक्तोभवेत्स्वयं॥ दुःखयुक्तेतथादुःखीनानाभावपरायणः॥२२॥
लेशमात्रामयंशांतिंनलभतेकदाचन॥ असंतोषयुतोनित्यंभ्रमतिभोगलि
प्सया॥२३॥भोगार्थंविविधान्येवपापानिनित्यमादरात्॥ चरतिसर्वपुण्यानिविधि
निषेधवर्जितः॥२४॥ वर्णाश्रमयुतोयोगीस्वधर्मंत्यज्यनित्यदा॥ पापंचरतिवापुण्यं
स्वधर्मसंयुतःकदा॥२५॥भोगान्भुंक्तेविशेषेणमोहयुक्तोनिरंतरं॥योगश्रेष्ठो
यमाख्यातंस्त्यक्त्वायोगंनरोभवेत्॥२६॥तस्यहृदिविवेकश्चसदातिष्ठतिमोहकः॥
पुण्यपापविहीनोहंब्रह्मैवब्रह्मभावितः॥२७॥अंतेसनरकान्गच्छेद्दुंद्वदुःखप्र
दायकान्॥यातनांयोगरूपांतुउक्त्वापतेद्दुरातले॥२८॥दक्षउवाच॥योगभ्रष्ट ४८

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गतिं ब्रूहि योगीन्द्र दयया परां ॥ कथं नरकगो भूत्वा यातनां सलभेत्परां ॥ २९ ॥ कर्मफलं
परित्यागाद्देहजन्म धरं कथं ॥ संभवे हि समर्थं भाति चेष्टितं योगिनः परं ॥ ३० ॥ मुद्गल
उवाच ॥ ब्रह्मणि ब्रह्मभूतस्य पुनर्विषयसेवनात् ॥ ब्रह्मणो भक्तिहीनस्यां नेरुत्था
नं न भवेत्किल ॥ ३१ ॥ अपारपुण्ययोगेन ब्रह्मणि देहिनः कदा ॥ रसो यत्तिर्भवेद्द
क्ष सर्वश्रेष्ठस्य योगदा ॥ ३२ ॥ देहविषयसंयोगाद्दुःखभावपरात्मनः ॥ नानापापा
दियोगेन पुण्यस्य क्षयं प्रहीयते ॥ पतनोयं शिवलोके वा वैकुंठे ज्ञा सौरयोः ॥ ब्र
ह्मणा इंद्रलोके वा पतेदंतेन संज्ञायः ॥ ३४ ॥ शोकहर्षप्रदं विश्वं नानादुःखसम
न्वितं ॥ नरकं नात्र संदेहो योगिनां शास्त्रसंमते ॥ ३५ ॥ उत्पत्तिनाशसंयुक्तं त्य
क्त्वा ब्रह्मपरायणः ॥ ब्रह्मणि ब्रह्मभूतः स पुनर्दुःखपरो यतः ॥ ३६ ॥ वैकुंठादिष

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४७ दे संस्थितो हं हृभुंजे नैतरं ॥ उत्पत्तिनाशसंयुक्तं नानाभोगपरायणः ॥३७॥ अजनो योगी म
जनाथ स्वर्गी स्यान्नरकाम्पराम् ॥ भुक्त्वा हं हृ मयान्यत्रादिह जन्मधरो भवेत् ॥३८॥ यो
गिकुले भवेत्तस्य जन्म वा नापसे कुले ॥ कदुर्मतां स न त्रापि पुनर्योगं चरिष्यति ॥३९॥
पूर्वसंस्कारयोगेन नन्द्योगे संरमेकदा ॥ विलंतस्य मयायोगी प्रभवेन्न स्वस्य योगतः
॥४०॥ पुनर्न योगभ्रष्टः स ः संभवे ब्रह्मणास्तु न ॥ ज्ञात्वा युक्तस्वभावेन शारीरं पोष
यन्मुदा ॥४१॥ अंते ब्रह्मणि योगी स तदा कोरोसवे सरं ॥ योगसंस्कारपुण्येन स्थि
तिं लब्धा महामते ॥४२॥ एतत्ते कथितं पूर्णं योगभ्रष्टस्य चेष्टितं ॥ किं पुनः श्रो
तुमिच्छा ने वद यातर्वदाम्य हं ॥४३॥ ॐ तत्सदिति श्रीमद्योगगीतासूपनिषत्सु ग
र्भ स्थितयोगशास्त्रे श्रीमदात्मे° योगभ्रष्टचरित्रयोगो नामाष्टमोध्यायः ॥ ८॥ ४७

दक्ष उवाच ॥ चित्तं चंचलमत्यंतं विषयेषु परायणं ॥ दुर्ग्रहं शांतिसंयुक्तं न भवेन्मु
निसत्तम ॥ १ ॥ अतो योगस्य प्राप्त्यर्थं स्थितस्यर्थं सुगमं ततः ॥ उपायं वद चित्तस्य जया
र्थं वापरं प्रभो ॥ २ ॥ शुक्ल उवाच ॥ पंच चित्तेषु यद्दिव्यं स्थितं भांत्या सम चित्तं ॥ चिं
ता मणेः समाख्यातं तस्यैव भजनं चरेत् ॥ ३ ॥ नेन चित्तं जये योगी नान्यः स्यात्
मितो विधि ॥ चित्तजयं विना योगी दायकेना प्रसं स्त्रायः ॥ ४ ॥ दक्ष उवाच ॥ सु
गमं वद मार्गं मे सर्वेभ्यो ब्रह्मदायकं ॥ तं सेव्य अंतरचः सर्वे ब्रह्मभूता भवंति वै ॥ ५ ॥ शुक्
ल उवाच ॥ अज्ञानेन समायुक्तो नरो विषयलंपटः ॥ स्त्रीभ्यो दूरे परो नित्यं योगं
नेच्छति कर्हिचित् ॥ ६ ॥ तस्य सकामिकं कर्म सुखदं बाधयत्परं ॥ अलभ्य प्राप
के हद्यमाचरेल्लोभसंयुतः ॥ ७ ॥ अलभ्यलभ्यलोभेन नत्यक्तो पापं महाखलः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४८ सत्कर्मनिरतो भूत्वा पुण्यं चरेन्निरंतरं ॥८॥ ततस्तेनैव भावेन पापं न कुर्यान्निरंतरं
॥ शुद्ध्यत्यंते नरः कुर्यात्कर्म कामयुतं परं ॥९॥ ततो लक्ष्यं समाप्नुयाद्दृध्येवेसुनरेव
सः॥ विश्वासेन समायुक्तः कुर्यात्कर्म विशेषतः॥१०॥ अथवा नैव संप्राप्तमल
क्ष्यं तेन तं तदा ॥ उपादेशो हि रोषेणाधिकं सत्कर्म वाचर ॥११॥ अनंतजन्म
भिः पापं कृतं त्वया न संशयः॥ अपारमंतरायं तद्भवति तेविघ्नानकं॥१२॥ एवं कर्मप
रः सोपि दुःखितोत्यंतमाचरेत् ॥ पापनाशार्थमानंदानेन शुद्धं नरो भवेत् ॥१३॥
सकामिकपरस्यास्य कर्मान्ते नैप्रभावतः॥ तस्य बुद्धिर्भवेद्दक्ष निष्कामिकपरा
यणाः॥१४॥ जन्ममृत्युप्रदा भोगा भुक्ता विविधजन्मसु॥ अपारसुखदं ब्रह्म
न प्राप्तं देहधारिणा॥१५॥ अलक्ष्यं न मया प्राप्तं प्रारब्धाधीनतोथवा॥ अलब्धं वंवि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तुं कोपि न समर्थो भविष्यति ॥१६॥ अतो निष्कामिकं कर्म करोमि नित्यमादरात्॥ ज
न्ममृत्युविहीनोहं भविष्यामि न संशयः॥१७॥ ब्रह्मसुखमपारं यद्भुक्त्वा ब्रह्मपरा
यणः॥ ब्रह्मभूतो भविष्यामि यत्नं करोति तत्परः॥१८॥ एवं धार्यं परित्यज्य
कामान्सेवेत्सपंचकान्॥ देवान्गणेशमुख्यांश्च मुक्तिमार्गपरायणः॥१९॥ सा
लोक्यादिभवं सौख्यं मिछत्सन्नित्यमादरात्॥ कर्मयानपसायुक्तो भवेन्मानव
सत्तमः॥२०॥ विभूतिर्ब्रह्मणः प्रोक्ता नानारूपप्रजापते॥ तत्र तस्यां रमेद्दिव्ये तमैश्वर्य
युक्तभावतः॥२१॥ इमे समर्थरूपा वै ब्रह्मणः परमात्मनः॥ अंशा तेजोधरास्त
स्य सर्वाधीशा भवेत्पतः॥२२॥ एवं सर्वत्र संचिंत्य तेषां पूजापरो भवेत्॥ लब्धेत्तत्
पयादक्षाचित्तशुद्धिर्नरोत्तमः॥२३॥ विचारेण गणेशानां ज्ञात्वा संपूर्णमंजसा॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४१ सर्वपूजादिचिन्हैस्तं श्रेष्ठं तत्र रतो भवेत् ॥२४॥ ज्ञात्वा स्वानंदनाथं तं स्वानंदार्थं
विशेषतः ॥ भजेद्रूपाराजं स निष्काम भक्तिसंयुतः ॥२५॥ ततोहर्निशमस्यं तं
भजेत्तं तपसा युतः ॥ मोक्षार्थं सर्वभावेन विरक्तो विषयादिषु ॥२६॥ गणेशारूप
यानस्य चित्तशुद्धिर्भवेत्परा ॥ तया सर्वस्वभावेन भजेत्तं गणनायकं ॥२७॥ विश्वं
चराचरं सर्वं जानीयात्तत्स्वरूपकं ॥ सर्वेषां हितभावेन भजेत्तं द्विरदाननं ॥२८॥
कस्यापि संभवेत् दुःखं नादद्यां प्रचरेन्न सः ॥ सहन् द्वंद्वजं भावमार्जवेन समन्वि
तः ॥२९॥ देवकार्यं विना साधुर्नेच्छेदेत्स कदाचन ॥ पत्राद्दिकं विशेषेण विश्वरू
पपरायणः ॥३०॥ एकांते निर्जने स्थाने स्थित्वा ध्यात्वा गजाननं ॥ पूजने भक्ति
संयुक्तो ध्यानं कुर्याद्विशेषतः ॥३१॥ अनन्यमनसा देवं भजेत्तं भावधारकः ॥ ४१

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न्नामदमपरोक्षत्वा चित्तनिग्रहको भवेत्॥३२॥ दुर्जयं चित्त मत्यंतं ज्ञात्वा वायु
निबंधतः॥ प्राणायामपरोक्षत्वा जयेन्नात्र संशयः॥३३॥ अथ वायुनिरोध
स्य वक्ष्यामि मार्गमुत्तमं॥ येन पापं परित्यज्य शुद्धचित्तो नरो भवेत्॥३४॥ पूरये
दूमनसायां वायुस्तस्माच्चतुर्गुणं॥ धारणं तस्य कुर्यात्तस्योदरे नियतो भवे
त्॥३५॥ पूरकाद्द्विगुणं कुर्यान्नूरेचकत्वं प्रजापते॥ पुनर्नसा दक्षिणया पूरये
त्कुंभकं चरेत्॥३६॥ वामया रेचकं चैवं पुनः पुनर्निरंतरं॥ प्राणायामं चरेद्धी
मां पापहीनो नरो भवेत्॥३७॥ एवं त्रिकालकं कुर्यात्प्राणायामं विज्ञोषतः॥ ना
ति निरोधसंयुक्तं वायुहठे समन्वितः॥३८॥ अति हठेन संरुद्धो वायुरोमभ्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

५० एवच ॥ निसत्यकुष्ट संयुक्तं तं करोति न संशयः ॥३९॥ नाभिमूलात्स्थिता नाडी इडा
च पिंगला परा ॥ सुषुम्णा तत्र रोधेन मार्गो भवति निर्मलः ॥४०॥ अपानो नाभि
मूलस्थो ह्यधो गच्छति सर्वदा ॥ प्राणस्तूर्ध्वं तथा जंतोर्नाडिभिः प्रेरितः सदा ॥४१॥
मार्गरुंधनभावेन नाड्यां मार्गो भविष्यति ॥ वायुर्मूलं समाश्रित्य तिष्ठति क्रम
तस्ततः ॥४२॥ तत्र लघ्व क्षराण्येव द्वादशाग्र प्रतिष्ठति ॥ वायुश्चेत्स लघुः प्रो
क्तः प्राणायामश्च योगिभिः ॥४३॥ ततो द्विगुणतस्तिष्ठेद्यदा वायुः सुरोधितः ॥
मध्यमः स समाख्यातस्त्रिगुणात्तूत्तमो मतः ॥४४॥ एवं प्राणमपानं च स्वमू
ले संनयेद्बुधः ॥ तयो रोधनभावेन मूलगो नो भविष्यतः ॥४५॥ एवं क्रमे
पा मूलेयं वायुस्तु हृन्न संस्थितः ॥ तदा समानगा नाडी भिद्यते तत्र संस्थिता ॥४६

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सा सुषुम्णा समाख्याता तत्र संमीलितौ क्रमात् ॥ प्राणापानौ समौ भूत्वा तद्रूपौ
तौ भविष्यतः ॥४७॥ त्रिकालज्ञः स्वयं सिद्धो भविष्यति नरोत्तमः ॥ वायुसाधनमा
त्रेण प्राप्यते जः समन्वितः ॥४८॥ ततः स्वाधीनतां यातौ प्राणापानौ विशेषतः ॥ स
न्यविष्यतितौ यत्र तत्र गमिष्यतः क्रमात् ॥४९॥ ततो ध्यानपरो भूत्वा षट्चक्रभेद
नेरतः ॥ स्वकण्ठं स्वस्वरूपं सपश्येत द्वायुनागतः ॥५०॥ एवं क्रमेण योगीन्द्रो गच्छ
द्येयः प्रजापते ॥ सहस्रारे सहचक्राणि तत्र परस्यपद्मज्ञानतं ॥५१॥ तत्र क्रमेण वायु
संस्थापयेत्सु समाधिना ॥ वायुना संयुतं लिङ्गे स्वरूपं विघ्नेश्वरं परं ॥५२॥ क्रमा
द्वायुबलेनैव शुद्धचित्तो भविष्यति ॥ परस्य तत्त्वसर्वभावे वुत्स्थितं ब्रह्म सनात
नं ॥५३॥ ततः स्वाधीनता युक्तः प्रभवेत्स्वेन तेजसा ॥ यं यमिच्छेत्स ततं तनुसन्धे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

५१ वसफलं भवेत् ॥५४॥ किंचिच्छेदेन यो योगी तद्योगमवाप्नुयात् ॥ नोचेच्छुद्रतो भ्र
वा योगयुक्तः पुनः पतेत् ॥५५॥ साधनं द्विविधं प्रोक्तं क्रियारूपं च जायते ॥ बाह्यं कर्म
स्वरूपाख्यं तपोयुक्तं स्वधर्मजं ॥५६॥ आंतरं वायुरोधाख्यं सर्वसिद्धिप्रदायकं ॥
ताभ्यां चित्तं विनिर्गृह्य स्ववशं कारयेन्नरः ॥५७॥ बाह्यकर्मपराज्जं तोरांतरं शीघ्र
सिद्धिदं ॥ सहस्राधिकभावाख्यं प्रोक्तं योगींद्रमुख्यकैः ॥५८॥ अतःपरं तृतीयं
ते साधनं कथयाम्यहं ॥ येन योगींद्रसेव्यः स भवति मानवो ध्रुवं ॥५९॥ चित्तशु
द्ध्यर्थं कार्यार्थं कर्म द्विविधमुच्यते ॥ शुद्धचित्तनरः पश्चात्संपश्यद्ब्रह्म शाश्वतं ॥६०
सर्वत्र पूर्णभावेन संस्थितं परमव्ययं ॥ अवयवादिसिहीनं तत्र लीनो भवेत्स्व

५२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यं॥६१॥ एतावान् फलदातायं क्रियायोगः प्रकीर्त्तितः॥ बाह्यान्तरात्मकः पूर्णः स
तोऽप्यं साधनं चरेत्॥६२॥ चित्तं रसयुतं कुत्र जायते योगिनः परं॥ तं जयेत् ब्रह्मभा
वेन शमदमपरायणः॥६३॥ स्वधर्मसंयुतो भूत्वा देहनिर्वाहकं चरेत्॥ देहस्य
दमनं तत्र जायते स दमः स्मृतः॥६४॥ विषयार्थं मनस्तस्य संकल्पं यत्नमाचरे
त्॥ तं नं छेद्धि चित्तमाग्रह्य कुर्याद् ब्रह्मपरायणं॥६५॥ अयं शमः समाख्यातस्तेन चि
त्तं भवेत्परं॥ स्वाधीनं सर्वभावं च त्यक्त्वा ब्रह्मपरं भवेत्॥६६॥ शनैः शनैर्हि परमे
द्विषयेभ्यो महात्मवान्॥ इति योगमयीं धृत्वा योगी भवेत् समानवः॥६७॥ कर्म
मार्गं परित्यज्य द्विविधं योगिसत्तमः॥ ध्यानयोगं परो भूत्वा तिष्ठेन्नित्यं सदा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

५२ मितं॥६८॥मनोवाणीविहीनं यब्रह्म तत्र समाचरेत्॥ध्यानं संकल्पत्यागाख्यं विष
येषु निरंतरं॥६९॥यद्यच्चित्तेन संकल्पः क्रियते विषये ध्रुवं॥ तत्र संकल्पहीनं स
ये२ कारं ध्योगतत्परः॥७०॥एवं चित्तं नरस्यैव स्वाधीनं जायते सदा॥यदार्थं तु स नो
त्रांक्तस्तदान्यदा चरेद्बुधः॥७१॥देहेंद्रियादि संग्रह्य तिष्ठेद्भूमौ महाशयः॥न
चलेत्स्थाणुवत्सोपि क्रियां नैव समाचरेत्॥७२॥ नत्र यत्नं मीलितं चान्नं जल
पानादिकं चरेत्॥परेछया समायुक्तः सदा तिष्ठेन्महात्मवान्॥७३॥केनापि
जलपानादि न दत्तं तादृशो भवेत्॥ न तदर्थं श्रमे सोपि नेछेत्साधारध्युधार
कः॥७४॥सर्पवृश्चिकव्याघ्राद्यैः पीडितो यदि मानवः॥ नानाप्राहारयोगेश्च ५२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मानवादिभिरेकच ॥७५॥ तथापि न चलेत्सोपि स्वस्छानाज्जडवत्सरः॥ देहमा
श्रमाश्रित्य तेषु क्रोधः समाचरेत्॥७६॥ पूर्वजन्मकृतं कर्म मयातेन प्रबो
धितः॥ इमे संपीडयंत्येवमेषां दोषो न विद्यते ॥७७॥ अथवासात्विकैस्तत्र पूजि
तः सर्वभावतः॥ नित्यं नानाजनैः सोपि सेवितो न चलेत् तदा॥७८॥ पूर्वजन्मकृतैः
कर्मप्रेरितास्तेन मानवाः॥ मयायां पूजयंत्येतएषां गुणो न विद्यते ॥७९॥ एवं
मनसि संधार्य तेषां नेच्छेच्छुभं कदा॥ एवं द्वंद्वं परित्यज्य तिष्ठेन्नित्यं महायशाः
८०॥ अनेन विधिना सोपि स्वल्पकालेन भाविधे॥ चित्तंजयेन्न संदेहः शांति
पूर्णामवाप्नुयात्॥८१॥ नान्यत्किंचिद्धरेत्कर्म न ध्यानादिकमादरात्॥ एवं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

५३ शमदमौ धृत्वा योगी भवेत्समानवः॥ ८२॥ विचारं ब्रह्मणस्तत्र कुर्यान्नित्यं विरोष
नः॥ कीदृशं ब्रह्मदृश्यं मे वेदाद्यैः प्रतिपादितं॥ ८३॥ पंचभूमिमतिक्रम्यातिष्ठेत्क्रमे
णमानवः॥ नानाब्रह्माणि पश्यन्सन्नेतेशांतिमवाप्नुयात्॥ ८४॥ शांतियुक्तनरः
पश्चात्संत्यजेत्तां महाद्भुतां॥ जडावस्था पुनः सोपि यथेच्छाचरणो भवेत्॥ ८५॥
हृदि चिंतामणिं दृष्ट्वा पंचवित्तप्रचालकं॥ शांत्यायुक्तो भवेन्नित्यं स्वाधीनहृद
यः परः॥ ८६॥ दृष्ट्वा ब्रह्मस्वरूपं योगी रसहितो भवेन्मुदा॥ सर्वत्र नात्र संदेहा शां
त्या सर्वं समाचरेत्॥ ८७॥ अनेन विधिना दक्षा ज्ञानी पापपरायणः॥ क्रमेणासा
धयेद्योगं स योगी संभवेत्सुरा॥ ८८॥ एवं केतुमराक्रष्केन दाक्ष्रत्वा महामतिः।

योगमिच्छेन्निरंतरं ॥ नित्यभोगात्र भुंजन्सन्नंते स्वानंदगो भवेत् ॥ ८९॥ तत्र गणेश्वरं दृष्ट्वा २
ऽहं योगं स्वयं तत्र निष्ठायुक्तो भवेत्सदा ॥ ९०॥ स्वधर्मनिरतो भूत्वा योगयुक्तो
भविष्यति ॥ ज्योतिर्हृद्धरो भूत्वा भजेद्गणनायकं ॥ ९१॥ ब्रह्मकल्पमयं
स्थित्वा कालं तत्र महामतिः ॥ तद्देहे लिनतां प्राप्य ब्रह्मभूतो भविष्यति ॥ ९२॥ एवं
कर्तुमशक्तश्चेत्तदा स्वधर्मसंयुतः ॥ कर्माचरेत्प्रजानाथ ब्रह्मार्पणविधानतः ॥ ९३
तेनैव भुक्तिसंगत्यास ब्रह्मभूतो नरो भवेत् ॥ निष्कामयोगमार्गेण सदा ब्रह्मणि तत्परः
॥ ९४॥ एवं कर्तुमशक्तश्चेत्तदाहं ब्रह्मभावतः ॥ त्रिविधं फलमुत्सृज्य कर्मजं यो
गमार्गगः ॥ ९५॥ कर्मत्यागबलेनैवाहं ब्रह्म निश्चयेन सः ॥ क्रमेण कर्मसंयु
क्तो भविष्यत्यन्यजन्मभिः ॥ ९६॥ निष्कामकर्मकर्ता स पुनरन्यो भवेन्नरः ॥ क्रमेण

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

५४ योगरससमायुक्तो भवेद्विषयनिंदकः ॥९७॥ एवं क्रमेण शांतिं स लभेत्पूर्णो न सं
शयः ॥ क्रमार्थं चरितं सर्वं नानामतसमन्वितं ॥९८॥ युगमं सर्वभावेषु गणेशाभ
जनं परं ॥ तेन योगी भवेन्नूनं सर्वशास्त्रेषु संमतं ॥९९॥ यत्किंचिद्गणराजस्य व्रत न
पूजादिकं प्रभो ॥ कीर्तनं स्मरणाद्यं तु तत्त्वभूतप्रदायकं ॥१००॥ नाना विषय
संयुक्तो नरः स्मरेद्गणाधिपं ॥ अहर्निशं तदास्यांते गणेशस्मरणं भवेत् ॥१॥
तेन स्वानंदगो भूत्वा योगभक्ष्यस्य तन्मयः ॥ अन्तकाले तथा चेत्स भविष्यति
न संशयः ॥२॥ स्मरणं गणराजस्य प्रकुर्यान्नित्यमादरात् ॥ तस्यांते गणनाथ
स्य स्मृतिर्द्यान्नरायसः ॥३॥ अतो हर्निशमेकं तं संस्मरेन्मानवः परं ॥ नाना
योगादिकं सर्वं साध्ययोगी समो भवेत् ॥४॥ आयसेन विहीनोपि सदा विषय ५४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

०४ त्रिगुणानां लयः सदा ॥ अनन्तेजन्मसहस्रेभ्यो युक्तो भवेतिनित्यतः ॥४॥ अतः सारं
लंपटः ॥ गणेशस्मरणेसक्तः सयुक्तः समतो व्रजेत् ॥५॥ शिवविष्णुमुखानां वै नरो यः
स्मरणं चरेत् ॥ अंतेतेषां स्थितिस्तेषां मेर दद्यात्सचित्तगः प्रभुः ॥६॥ तेषां लोके समा
साद्य भुक्त्वा भोगान्मनोहरान् ॥ प्रपन्ने लाभसे रे होमस्य फले लोके विशेषतः ॥७॥
पुराणेषु प्रपठ्यंते गणेशभजनेपरं ॥ तेन ज्ञानसमायुक्तो नरो ब्रह्ममयो भवे
त् ॥९॥ एतत्ते कथितं दक्ष योगशास्त्यर्थमादरात् ॥ अज्ञानसंयुतः स्यापि ब्रह्म
भूतप्रदायकं ॥१००॥ ॐ तत्सदिति श्रीमद्योगगीतासूपनिषत्सु गर्भासु अ
ज्ञानिनां क्रमयोगो नाम नवमोध्यायः ॥ दक्ष उवाच ॥ विभूतीर्वद योगीश ग
णेशस्य महात्मनः ॥ यज्ज्ञात्वा ताः समासाद्य गणेशज्ञो भवेन्नरः ॥१॥ मुद्गल उ०
अपाराणानाथस्य विभूतयो न संशयः ॥ ताः कथितुं न शक्ताश्च भवेति शंकरः

गणपत्यो ×

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

५५ हृपः॥२॥क्षणेक्षणेगणेशानोनानाखेलपरायणः॥ बिभर्तिभिर्जगत्सर्वंभावयतिपरा
त्परः॥३॥ लोकेषुतत्वमुख्येषुजगत्सुब्रह्मसुप्रभो॥ येषांध्यानस्यतेसर्वेबिभर्ति
पदधारकाः॥४॥ कल्पेकल्पेबिभर्तिनामवतारानसंख्यकाः॥ गणेशस्यत
थाहस्तान्कर्तुंकःक्षमोभवेत्॥५॥ अतःसंक्षेपतस्तेभ्यंकथयिष्यामितान्शृणु॥
बिभर्तिगणनाथस्यनानासिद्धिप्रदायिनी॥६॥ जगत्स्वब्रह्मरूपोऽहयोगरूपोग
वा जाननः॥ कथंनभिन्नभावेषुवर्ततेवर्णयाम्यहं॥७॥ मायाभ्यांसंयुतःसोऽपिनाना
वेषप्रधारकः॥ अयोगिनामिहंदृष्टंसत्संसेभावनेसदा॥८॥ मायायुक्तप्रभा
वेणकिंकिंगजाननस्यच॥ नसंभवेदहंमायासमाश्रित्यवंशामिताः॥९॥ क
लांशाःकलयायुक्ताःकलांशांशाःकलात्मकाः॥ तेषांसंस्थधरायेतेसर्वेवि ५५

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भृतिधारकाः ॥१०॥ एवमेव गणेशानः पृष्टश्च नारदेन सः ॥ जगाद ताः श्रृणुध्वं
विभूतीः परमाद्भुताः ॥११॥ गणेश उवाच ॥ प्रणो योगेषु सर्वेषु चित्तरोधमयः परः ॥ माया
हीनप्रभावाणामयोगोहं महामुने ॥१२॥ स्थानेषु निजभक्तेषु तत्त्वेष्वव्यक्तसंस्थितः ॥
आनंदः समभावेषु जीवेष्वात्माहमंजसा ॥१३॥ नानाभेदेषु ब्रह्माणमसद्रूपं प्रधारके
॥ सत्येषु सांख्यरूपोहं बोधः खेलकरेषु च ॥१४॥ देहाभिमानयुक्तेषु सर्वेकोहं महात्म
ते ॥ देहेषु बिंदुरूपोहं चेतनासु गुणेश्वरः ॥१५॥ कोशेष्वानंदकोशोहं विज्ञानं सू
क्ष्मजातिषु ॥ विवेकेषु मनश्चाहं चालकेषु समीरणः ॥१६॥ स्थूलेष्वन्नस्वरूपोहं समा
धिषु तथेश्वरः ॥ व्याधिषु माद्यरूपोहमनुषु च महाविराट् ॥१७॥ इंद्रियेषु मनश्चा
हं भक्तेष्वाकाशसंस्थितः ॥ तन्मात्राणामहं शब्दो लोमतोहं देवतासु च ॥१८॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्त्वेषु विविधेष्वेवमहं तत्त्वमहं परं ॥ गुणेषु गुणपोऽहं तु पालकेषु जनार्दनः ॥१९॥ हरः
५९ संहारकर्तॄणां स्रष्टॄणां प्रपितामहः ॥ कर्मणामर्यमाहं तु मोहकानां च शांभिका
॥२०॥ देवानां मघवाहं तु आदित्येषु विनायकः ॥ तेजसां भानुरूपोऽहं मरुत्तेषु वि-
धुः परः ॥२१॥ अग्निः प्रतापदेष्वेव धर्मः समवर्त्तिषु ॥ यमो यमवतो चाहं रक्ष-
सां निर्ऋतिः स्वयं ॥२२॥ जलेषु वरुणोऽहं तु बलवत्सु समीरणः ॥ निधीनां धनदाताहं
रुद्राणां शंकरः प्रभुः ॥२३॥ कामो धनुर्धराणां च रतिर्भोगकरास्वहं ॥ नागेन्द्राणामहं
शेषः सर्पाणां तक्षकः स्वयः ॥२४॥ नागानां वासुकिर्नागो जंबुद्वीपेषु सर्वदा ॥
स्वोदुंबरः समुद्राणां पर्वतेषु हिमेलकः ॥२५॥ पितॄणां यमरूपोऽहं वस्सेषु ग्रामिका
मता ॥ देववृक्षेषु मंदारस्तरूणां कामदायकः ॥२६॥ धेनूनां कामधेनुर्या दुर्वाचो ५८

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षधिषु मम भुः पक्षिषु मयूरोहं तु मृगाणां सिंहरूपधृक् ॥२७॥ दंष्ट्रिणां शार्दूलश्चाहं
चौराणां मूषकाधिपः ॥ वाहनेष्वश्ववाहोहं सिद्धिरैश्वर्यदेषु च ॥२८॥ विद्यासु बुद्धिरूपो
हं चित्तप्रकाशकारिणी ॥ अहं मनश्च वेगानां मोहस्त्वभिमानकः ॥२९॥ नराधिपो न
राणां तु वर्णेषु ब्राह्मणोस्म्यहं ॥ आश्रमेषु तुरीयोहं पोषकेषु ग्रहस्तकः ॥३०॥ स्वामिनाम
वधूतोहं तिथीनां च चतुर्थिका ॥ प्रजापतिषु दक्षोहं ब्रह्मर्षिषु भृगुस्तथा ॥३१॥ नारदो देव
नर्षीणां दत्तो वधूतरूपिणां ॥ कपिलस्तत्त्वविज्ञानां योगिनां शुक एव च ॥३२॥ जनकोहं वि
देहानां निःसंगेषु महामुने ॥ सनकादय एवाहं ज्ञानिनां बादरायणः ॥३३॥ वसिष्ठः
कर्मकर्तॄणां गाणपत्येषु मुद्गलः ॥ भृशुंडी चैकनिष्ठेषु ब्रह्मिष्ठानां बृहस्पतिः ॥३४॥
अन्नानां तिलरूपोहं गव्यानां घृतमंजसा ॥ मधु सर्वरसानां च मकरो जलजात्मनां ॥३५॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

५७ कौमंडलीनदीनांचतीर्थेषुगायापंपरं॥क्षेत्राणांमयूरक्षेत्रकाह्नीराजःसर्वबुद्धिषु
॥३६॥मयूरेशोवनाराणांगार्ग्यउपासकात्मनां॥ध्याननिष्ठेषुसर्वेषुगृत्समदोहमे
वच॥३७॥सुबोधोदैत्यजातीनांज्ञानारिईषकारिणां॥दुर्जयेषुमनश्चाहंवर्षेषुशोका
रएवयः॥३८॥मुकुंदोहंभाविकेषुवेत्रिशिराःसुकुंचेतसां॥उपदेशमदांतृणांयाज्ञवल्क्यः
मतापवान्॥३९॥पौराणिकेषुसूतोहंश्रोतॄणांशौनकोमुनिः॥सेनानीनामहंस्कंदोवि
घ्नघ्नेष्वस्मिनामहं॥४०॥पापेष्वनृतरूपोहंकलहोभेदधारिणां॥कांतिषुलोमरूपोहंमणि
नांचिंतितार्थदः॥४१॥ज्ञानंपवित्रभावानांसामगापथधर्मिणां॥वेदेष्वथर्वसंज्ञोहंदुरा
त्मेषुपरस्युःपरः॥४२॥निर्लेपनामहंसाक्षीराज्यश्रीसुगजस्तथा॥विषयोभ्रांतिदा
नांचरंभाचाप्सरसामहं॥४३॥गंधर्वाणांचित्ररथोवैद्यानांवैद्यवाचकःधन्वंत ५७

रिस्म्नि विप्रजां समुद्रः सरसात्मनां ॥४४॥ स्रोतसां जान्हवी विप्र मंत्राणामेकवर्णजः॥
स्थलेषु ब्राह्मणस्य त्वं यज्ञेषु ज्ञानरूपधृक् ॥४५॥ व्रतेषु तु समानोहं शक्तिः शक्ति
मतामहं ॥ बृहदारण्यकं विद्धि नानोपनिबदां परं ॥४६॥ शास्त्रेषु योगशास्त्रं च पुरा
णेषु च मौद्गलं ॥ अरण्यानां महारण्यं दंडकारण्यं महं परं ॥ ४७॥ नियंतॄणामहं दंडो
मायाहं भावकारिणां ॥ स्मृतीनां याज्ञवल्क्यस्य स्मृतिरेव परा मता ॥ ४८॥ गायत्री
छंदसां विप्र स्यानक्षो नगरात्मनां ॥ व्याकर्णमंगभूतेषु कलास्कयोगदाय्यहं ॥४९॥
नीतिज्ञेषु तथा काव्यकृषत्तोभूमिधारणां ॥ वृद्धिके ग्रोगवां चाहं नग्नोमेरवभा
विनां ॥५०॥ एवं नानाविधाकारा विभूतिर्गणपस्य या ॥ कथितुं नैव शक्या सा सासारा सं
कथिता मया ॥५१॥ यद्यच्छ्रेष्ठतमं विप्र सा विभूतिर्जसंज्ञायः ॥ लोकेषु गणराजस्य

नां भवेयं विघ्नेशपूजनः ॥५२॥ मुद्गल उवाच ॥ एवमुक्त्वा गणेशानो विरराम प्रजापते ॥
नारदस्तं प्रणम्यैव जगाम मनसा दृढो भवत् ॥५३॥ यदिमां शृणुयाद्दक्ष श्रावयेद्वा प्र
यत्नतः ॥ नमो हं सकलस्येकापि ज्ञात्वा सामर्थ्यं जं महं ॥५४॥ अपारमहिमायुक्ता
जीवाश्च परमेश्वराः ॥ ते सर्वे विघ्नराजस्य विभूतिपदधारकाः ॥५५॥ एवं ज्ञात्वा ग
णेशानं ये भजंति मनीषिणः ॥ ते सर्वे ब्रह्मभूताश्च भविष्यंति प्रजापते ॥५६॥ ॐ
तत्सदिति श्रीमद्योगगीतासूपनिषत्सु गर्भस्थ० विभूतियोगो नाम दशमोध्या
यः ॥१०॥ दक्ष उवाच ॥ त्वया प्रोक्तं पुरा विप्र विचारं ब्रह्मणः परं ॥ तत्कृत्वा योग
माप्नोति नरस्तत्र हितावहं ॥१॥ क्रिययाशुद्धचित्तो यो नरो ब्रह्मपरायणः ॥ सर्व
त्र ब्रह्मरूपं यद्विधिना केन पश्यति ॥२॥ मुद्गल उवाच ॥ वाह्यांतरां क्रियां कृत्वा

शुद्धचित्तो नरोत्तमः॥ तत्त्वविचारमार्गेण पश्यति ब्रह्म शाश्वतं॥३॥ तत्तेहं कथ
यिष्यामि तत्त्वज्ञानं प्रजापते॥ आदौ योगिजनानां यत्साधनं योगदायकं॥४॥ पृथ्वी
जलं तथा तेजो वायुराकाशमेव यत्॥ पंचभूतमयो देहः सा प्रकृतिश्च पंचधा॥५॥
क्रियारूपा महाभागा नानाभेदपरायणा॥ विभज्यात्मानमेवं सा क्रीडति विविधे
रता॥६॥ भूतानामामेकभावाख्या पंचानां ज्ञानरूपिणी॥ प्रकृतिर्हृदि संस्था सा जी
वभावधरा परा॥७॥ तया ज्ञानं भवेत्सर्वं नानाविवेकदायकं॥ तदाधारं जगत्सर्व
मेकरूपा प्रकीर्तिता॥८॥ तयोर्योगे प्रजानाथ ब्रह्मैवमभिधीयते॥ क्रियाज्ञा
नस्वरूपाख्यं द्वंद्व[illegible] हीनं परात्परं॥९॥ तदेव पंचधा जातं तच्छृणु योगदायकं।
स्थूलं सूक्ष्मं समं चात्मप्रतीतं बिंदुसंज्ञितं॥१०॥ समष्टिव्यष्टिभावेन द्विविधं च

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सकथ्यते ॥ पृथक्त्वेन स्वयं भाति पंचरूपं च भेदतः ॥ ११ ॥ स्थूलं जाग्रन्मयं ब्रह्म
तद्देवं द्विविधं मतं ॥ विश्वाख्यं व्यष्टिरूपेण वैश्वानरं समष्टिगं ॥ १२ ॥ अंडेषु वि
विधारूपा जंतवो दृष्टिगोचराः ॥ जाग्रद्भावधराः सर्वे विश्वात्मका उदाहृता ॥
१३ ॥ तस्य रोधं प्रवक्ष्यामि स्कृगमार्थप्रकाशकं ॥ क्रियात्मकेषु देहेषु क्रियारूपा
भवंति ते ॥ १४ ॥ ज्ञानात्मकेषु देहेषु ज्ञानरूपधरा मता ॥ उभयोर्योगभावेन वि
श्वाख्यास्ते प्रकीर्तिताः ॥ १५ ॥ बाह्य देहस्य सोदक्ष वितस्तिर्याद्दृशी भवेत् ॥ तां
व भानेन सर्वेषां ज्ञानदेहो हृदि स्थितः ॥ १६ ॥ विराट् जाग्रत्स्वरूपस्थो वैश्वान
र इति स्मृतः ॥ व्यापकात्मकदेहेन लिप्तातिविश्वभावितु ॥ १७ ॥ तस्यापि द्विवि
धो देहः क्रियाज्ञानप्रभेदतः ॥ तयोर्योगे समाख्यातो वैश्वारस्तन्मयः ॥ १८ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विश्ववैश्वानराय श्रयोगे ब्रह्मप्रकीर्तितः॥ जाग्रद्भावधरं पूर्णं स्थूलभूतप्रकाश
कं॥१९॥ एतत्स्थूलस्य तत्त्वं तेकथितं तु समासतः॥ तत्र तत्त्वविधिं ब्रह्म शृणु योगस
माधिदे॥२०॥ जन्ममृत्युयुतं यच्च नानाभावपरायणं॥ त्वंपदाख्यं प्रजानाथ विद्धि
तत्त्वं विभावगं॥२१॥ जन्ममृत्युविहीनं यदेकरूपं प्रकीर्तितं॥ तत्पदाख्यं च तं विद्धि
सर्वात्मधारकं परं॥२२॥ तयोर्योगे भवेत्तत्त्वं तदेवासिपदं परं॥ द्वंद्वभावविहीनं तद्वि
द्रूपप्रकाशकं॥२३॥ त्वंपदं क्रियया युक्तं ज्ञानाख्यं तत्पदं भवेत्॥ तयोर्योगे भवेद्वि
श्वं तत्स्वरूपं न संशयः॥२४॥ एवं वैश्वानराख्यं त्वं जानीहि तत्त्वसंज्ञितं॥ क्रियाज्ञान
समायोगे तयोः प्रकाशकारकं॥२५॥ अथान्यच्छृणु दक्ष त्वं तत्स्वरूपं पुरातनं॥ विश्वा
ख्या जंतवः सर्वे नानाभावात्मका बुधे॥२६॥ जन्ममृत्युयुताः प्रोक्तास्त्वंपदधारका.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मताः॥ वैश्वानरस्तत्त्वदृश्चैकरूपाद्व्यापको मतः॥२७॥ तयोरभेदभावे यत् ब्रह्मतत्त्वं
प्रकीर्त्यते॥ जाग्रद्रूपधरं पूर्वं स्थूलभावपरायणं॥२८॥ एवं नानाविभागेषु ज्ञातव्यं
तत्त्वरूपकं॥ सूक्ष्मादिषु प्रजानाथ ब्रह्मसौख्यप्रदायकं॥२९॥ अथ सूक्ष्मं प्रवक्ष्यामि यो
गमार्गप्रसिद्धये॥ शुद्धचित्तप्रभावेन तज्ज्ञानं तन्मयं भवेत्॥३०॥ बाह्यं स्थूलं विशेषे
ण जाग्रदन्नमयं परं॥ आंतरं स्वप्नभावार्थं सूक्ष्मं जानीहि मानद॥३१॥ प्राणो दशवि
धः प्रोक्तः सूक्ष्मरूपो निरिस्थितः॥ तस्मात्सूक्ष्मं मनः प्रोक्तं प्राणानां तरिव्यवस्थितं॥३२॥
तस्मात्सूक्ष्मं च विज्ञानं देहद्वंद्वप्रमुत्तमं॥ मनोंतरिस्थितं पूर्वं तदंतरं न विद्यते॥३३॥
त्रिविधं कोशसंयुक्तं स्वप्नं सूक्ष्मस्वरूपकं॥ सर्वांतरिस्थितं ब्रह्म द्वंद्वमायाप्रचालकं॥३४॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्रियारूपं तथा देहः सूक्ष्मभूतमयः स्मृतः॥ सर्वान्तरिसमाख्याय कल्पितं भोगकारकः
॥३५॥ स्थानदेहसमाख्यातः सदैकभावधारकः॥ पूर्ववत्सर्वं विज्ञेयं सूक्ष्ममायाप्रका
शकं॥३६॥ भिन्नभावधराः सर्वे जंतवः स्वप्नगाः पराः॥ तैजसास्ते मताः ज्ञास्ते क्रियाज्ञा
नप्रचालकाः॥३७॥ विराट्तत्र समाख्यातो हिरण्यगर्भसंज्ञितः॥ व्यापकः स्वप्नभावेषु
नानाजंतुप्रचालकः॥३८॥ तयोरभेदभावे यत् ब्रह्मस्वप्नात्मकं परं॥ सूक्ष्ममायाप्रका
शत्वात्सूक्ष्मं तत्कथ्यते बुधैः॥३९॥ पूर्ववत्तत्स्वभावश्च विज्ञेयः सूक्ष्मगः परः॥ सुषुप्तिवि
तप्रभावेण साक्षात्कारं करोति सः॥४०॥ अतः परं समाख्यातं ब्रह्मसुषुप्तिसंज्ञितं॥
कथयामि महत्प्रीत्या लोकानामुपकारकं॥४१॥ बाह्यं जाग्रन्मयं दक्षवपुः सर्वत्र
पठ्यते॥ आंतरं स्वप्नमित्युक्तं तयोर्योगे समात्मकं॥४२॥ बाह्यांतरैकभावाख्यं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२

६१ बाह्यां तौ विवर्जितं ॥ आनंदकोऽग्रगं साम्यं भूते रज्ञानमुत्कृतं ॥ ४३ ॥ जाग्रत्त्यक्त्वा नरो
यस्तु स्वप्नं गछति तत्र सा ॥ तयोः संधिं समाश्रित्य सुषुप्तिर्जायते परा ॥ ४४ ॥ तथा स्वप्नं
परित्यज्य जाग्रतं गछति स्वयं ॥ तयोः संधिं समास्थाय तृतिया सा सुषुप्तिका ॥ ४५ ॥ यत्र
स्थितो नरो दक्षा ज्ञानयुक्तोऽपि वत्यसौ ॥ न जानाति स्वकं वान्यं स्वप्नं नैव प्रपश्यति
॥ ४६ ॥ सा सुषुप्तिः समाख्याता नो प्राज्ञेश्वरस्वभावतः ॥ भिन्नदेहधरायां तु प्राज्ञाख्या
सा प्रकीर्तिता ॥ ४८ ॥ + निद्रां संश्रित्य तिष्ठति ॥ जाग्रति स्वप्नबोधं या करोति सा स्मृतिका ॥ ४७ +
सा द्विधा मायया युक्ता + विराड्रूपधरा नित्या सेश्वराख्या प्रकथ्यते ॥ ब्रह्मरूपा तयो
र्योजितत्वसंज्ञा यथा पुरा ॥ ४९ ॥ कथं तुरीयरूपं ते कथयामि समासतः ॥ नादरूपधरं भू
ल तन्मात्रामयमं जसा ॥ ५० ॥ अवस्था संश्रितं प्रोक्तं त्रिषु साक्षिवदुच्यते ॥ तस्यानुभ

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्माहात्म्यं कथयामि हिलायने ॥ ५१॥ मयाजाग्रन्मयं भुक्तं मयास्वप्नं विलोकितं ॥ निद्रा
यां न मया किंचित् ज्ञातं वदति यः स वै ॥ ५२॥ यदाजागर्ति विश्वस्यस्तदा द्वाभ्यां विवर्जि
तः ॥ यदा स्वपति से द्वाभ्यां हीनस्तिष्टति निश्चितं ॥ ५३॥ यदा सुषुप्तिसंस्थो यं तदा द्वा
भ्यां विवर्जितः ॥ एवं भेदप्रकारैः स्तअवस्था संयुतो मतः ॥ ५४॥ तस्य तत्वं प्रवक्ष्यामि वि
श्वतेजस प्राज्ञगः ॥ तंपदाख्यः समाख्यातो नादेदेहधरः प्रभुः ॥ ५५॥ त्रिविराण्मयए
वासौ तस्यदाख्यः प्रकीर्यते ॥ तयोरभेदभावे स तत्वरूपोस्मिता मयः ॥ ५६॥ अवस्था
नां समायोगेनादस्फूरीयधारकः ॥ स देकभावसंयुक्तः सर्वत्रासो विराजति ॥ ५७॥
तवा स्योनां तरिस्थो यं तोमयात्मकमुच्यते ॥ अहमित्येवकोशात्मा स्मिताख्यः पर
मेश्वरः ॥ ५८॥ अतः परं प्रवक्ष्यामि बिंदुतत्वं स्फसोख्यदं ॥ पंचमं ब्रह्मसंज्ञं तद्देहानां

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

६२ देहगं परं ॥५९॥ अवस्थामयसंस्थं यत्त्वंपदस्थं प्रकथ्यते । तुरीयसंज्ञितं देहं तत्पदा
ख्यं प्रकीर्तितं ॥६०॥ तयोरभेदभावेयत्तत्त्वं योगमयं परं ॥ चतुःस्थसंस्थितं पूर्णं चतु
र्भिर्वर्जितं सदा ॥६१॥ एवं तत्त्वविचारेण ब्रह्मदमपरायणः ॥ संकल्पजान्नू सदा का
मांस्त्यक्त्वा योगमयो भवेत् ॥६२॥ सर्वत्र ब्रह्मसंस्थं यत्स्वरूपे तन्मात्रसंश्रयः ॥ त
त्त्वरूपपरं पूर्णं तत्त्वविचारतः सदा ॥६३॥ अथान्यत्तत्त्वमार्गेते कथयामि सर्वदं
॥ बिंदुत्वंपदसंज्ञस्थं सोहं तत्पदगं मतं ॥६४॥ तयोर्योगे प्रजानाथ बोधस्तत्त्वम
यः स्मृतः ॥ मनोवाणीविहीनत्वात् द्रूपं तयोगिनां परः ॥६५॥ बोधस्त्वंपदरूपश्च विदेह
स्तत्पदात्मकः ॥ तयोर्योगे सर्वसंवेद्यं तत्त्वं वेदेप्रकीर्तितं ॥६६॥ असत्त्वं पदरूपं च स
त्तत्पदस्थमुच्यते ॥ तयोर्योगे समं ब्रह्म तत्त्वं योगपदं मतं ॥६७॥ समत्वं पदसंज्ञस्य
६२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मध्यकं तत्पदं स्थितं ॥ तयोर्योगे परं तत्त्वं स्वानंदाख्यं प्रकथ्यते ॥६८॥ स्वानंदस्त्वंपदाख्यश्चा
योगस्तत्पद उच्यते ॥ तयोर्योगे परं तत्त्वं पूर्णयोगमयं मतं ॥६९॥ सिद्धिस्त्वंपदगा प्रोक्ता बुद्धि
स्तत्पदगामता ॥ तयोर्योगे गजेशानस्तत्स्वरूपं प्रकथ्यते ॥७०॥ एवं नानामतैर्युक्ता वेदां
तार्थविचक्षणाः ॥ तत्त्वं वदंति दक्ष त्वं जानीहीनात्र संशयः ॥७१॥ इदं सारतरं रहस्यं ते कथितं
योगदं परं ॥ येन सर्वत्र योगं स संपश्येज्ज्ञानचक्षुषा ॥७२॥ + अनेन भावसंयुक्तं त्वंपदं
विद्धि सर्वदा ॥ अकल्पितं तत्पदाख्यं तयोर्योगे परं भवेत् ॥७४॥ ॐ तत्सदिति श्रीमद्यो
गगीतासूपनिषत्स्कगर्भासू॰ तत्त्वविचारयोगो नामैकादशोध्यायः ॥११॥ श्री॥ श्री॥
दक्ष उवाच ॥ शुक्लां कृष्णां गतिं ब्रूहि याभ्यां मुक्तिमवाप्नुयात् ॥ संसारं च तथा योगिन्
दयया सर्वतारक ॥१॥ मुद्गल उवाच ॥ कर्म त्वं त्रिविधं विद्धि कर्माकर्मविकर्मगं ॥ स्वध

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

।आग्नेयं ज्योतिरयनमुत्तराख्यं दिवा तथा ।। शुक्लगतिमयं सर्वं जानीहि मुक्तिदायकं ।। १ ।। ए
६३ मेव वर्जितं सर्वं कर्म विकर्म संज्ञितं ।। २ ।। स्वधर्म संयुतं कर्म भोगवासनया युतं ।। कर्म संज्ञं विजा
नीहि कृष्णागति पदप्रदं ।। ३ ।। ब्रह्मार्पणतया कर्म स्वधर्मस्थं भवेत्परं ।। शुक्लगतिमयं वि
द्धि मुक्तिदं तदकर्मकं ।। ४ ।। धूमो ज्योतिस्तथा रात्रिर्दक्षिणायनमेव च ।। कृष्णगतिस्व
रूपं तं जानीहि जनमृत्युदं ।। ६ ।। तयोर्भेदं प्रवक्ष्यामि लोकानां हितकाम्यया ।।
येन द्वैधं परित्यज्य ब्रह्मणि नियतो भवेत् ।। ७ ।। निष्कामिकं कर्म कृत्वा मृतो नरो यदा भ
वेत् ।। रात्रौ सदक्षिणा केवानलं गृण्हन्ति देवताः ।। ८ ।। देवभोगांस्तिरस्कृत्य ब्रह्मार्पणप
रायणं ।। नरं तं किं करिष्यन्ति देवाः स्वर्गसुखप्रदाः ।। ९ ।। अतो दाहे सवै दक्षु अग्निज्यो
तिस्थगो भवेत् ।। दिवसे समनुप्राप्ते दिवा देवतगस्तथा ।। १० ।। उत्तरायणसंभूते गच्छत्सु
भानुमंडले ।। प्रलये मंडलस्यैव नाशो पुरुषगो भवेत् ।। ११ ।। महाप्रलयवेलायां ब्रह्म

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेः पुरुषस्य च ॥ नाशे ब्रह्मणि गच्छन्ति ब्रह्मभूतो भवेत्ततः ॥१२॥ सकामिकं कर्म कृत्वा
दिवसउत्तरायणे ॥ मृतं नरं नतं भानुर्गृह्णाति कामनायुतं ॥१३॥ सदाघे धूमसंस्छक्र
यदाराश्रिःसमागताः ॥ तदा तस्यां समाश्रित्य तथा तिष्ठेत् प्रजापते ॥१४॥ दक्षिणाय
नमानंदादागतं वीक्ष्य तत्क्षणात् ॥ विमानवरमारुह्य गच्छेत्स्वर्गं विहायसा ॥१५॥
चांद्रज्योतिः समाश्रित्य भोगान् भुंजेत्स्वकर्मजान् ॥ कर्मप्रमाणमार्जयतानाना
स्वर्गपरायणाः ॥१६॥ तत्र विधिं प्रवक्ष्यामि चंद्रकला समुद्भवं ॥ अमृतं देवलोकेषु
स्वर्गेषु भोगदं परं ॥१७॥ इह कर्मकृतं पूर्वं नरैस्तद्दामृतात्मकं ॥ स्रवंति चंद्रगं सर्वं
तेन कलायुतो भवेत् ॥१८॥ शुक्लपक्षे क्रमेणायमेकैककलया प्रभुः ॥ वृद्धियुक्तः
स्वयं पूर्णः पूर्णिमायां प्रदृश्यते ॥१९॥ कृष्णपक्षे स्रुताः सर्वे क्रमेणामृतभोजि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

६४ नः॥ पिबंति चंद्रसंस्थं तदमृतं तृप्तिकारकं॥२०॥ तेन तृप्तियुताः सर्वे स्रवंति मासमान
सः॥ अमायां पतितश्चंद्र ओषधीषु नसंशयः॥२१॥ अत ओषधयश्छेद्या नरेपानेवनि वि २
श्चितं॥ अमायां चंद्रसंयोगयुक्ताः सुखपरायणाः॥२२॥ अंतश्चंद्रभवं सर्वममृतं
देवभूमिषु॥ चांद्रं स्वर्गमिति प्रोक्तं तेन वै वेदवादिभिः॥२३॥ देवानां विविधानां स
कर्मकृत्वा सकामिकं॥ कर्मांगदेवमध्यस्थं गच्छेत्स्वमर्थ्यलोकियां॥२४॥ ततल्लोक
सुखं भुक्त्वा नानाभोगसमन्वितं॥ भोगांते पुनरेवासौ मेघमंडलगो भवेत्॥२५॥ त
तजलमयो भूत्वा वृष्टिपतनेन भूमिषु॥ तत ओषधिगो भूत्वा भवेदन्नमयस्ततः॥२६॥
ततो वीर्यसमाश्रित्य गच्छेत्स्त्रीजठरे स्त्रियः॥ तत्र तत्त्वान्वितं देहं आविशंति नसंशयः॥
२७॥ क्षेत्रज्ञः साक्षिरूपस्तत्त्वैः क्षेत्रं विनिर्ममे॥ तस्याविधिं प्रवक्ष्यामि गर्भोपनिषदि

भवं ॥२८॥ तत्रैकदिवसेनैव स्त्रीवीर्यरक्तसंमिश्रिते । तस्मिंस्ते मिलिते रूपं बुद्बुदाकारो
भवेन्नरः ॥२९॥ ततस्त्रिदिवसैः सोऽपि फेनरूपो भवेन्नरः ॥ बुद्बुदः पंचदिवसैः पिण्डः
सप्तदिनैस्तथा ॥३०॥ ततश्चतुर्दशैः सोऽपि दिवसैः फुल्लतां गतः ॥ पंचविंशतिभिस्त
त्र मांसरूपो भवेत्स्वयं ॥३१॥ मासेन कठिनत्वे स प्रगच्छेत्तत्र संस्थितः ॥ द्विमासाभ्यां
शिरोयुक्तो भवेत्तत्र प्रजापते ॥३२॥ त्रिमासैः कंठसंयुक्तश्चतुर्मासे त्वचायुतः ॥
पंचमासे भवेज्जंतुरिंद्रियैः संयुतः क्रमात् ॥३३॥ अवयवसमायुक्तो नखरोमस
मन्वितः ॥ भवेन्मुखेन संयुक्तो मासैः षड्भिर्न संशयः ॥३४॥ तत इंद्रियसंभूतं ज्ञानं
भवेत्क्रमेण वै ॥ षण्मासैः परिपूर्णश्चाकृतिः पूर्णा भवेत्सुरा ॥३५॥ पूर्वकर्मानुसा
रेण यादृशी योनिगो भवेत् ॥ तादृशाकृतिसंयुक्त इंद्रियैश्च समन्वितः ॥३६॥
Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

६५ सप्तमासैर्भवेज्जंतुश्चेतनयासमन्वितः॥ उदरे पचरेत्सोपि मातुर्दुःखसमन्वितः।
३७॥ अवकाशविहीनः सपीडितो जंतुभिः सदा॥ मूर्छां गच्छेत्स्तु नः संज्ञां कोमलोतीव
मानवः॥३८॥ अष्टमासे स्तनस्तत्र बुद्धियुक्तो भवेन्नरः॥ सांख्ययोगपरो भूत्वा ध्या
येत्ब्रह्मसनातनं॥३९॥ अतिसंकोचभावेन पीडितो जंतुभिस्तथा॥ मातुर्भक्षान्नदो
षैः स वेदनासंयुतो भवेत्॥४०॥ गर्भदुःखं स विज्ञाय तन्निवृत्त्यर्थमादरात्॥ सांख्य
योगपरो भूत्वा भजेद्गणनायकं॥४१॥ तनस्तत्र भवेत्तस्य ज्ञानं परमसौख्यदं॥ ते
नानंतभवानां सदृशं दुःखं निवर्तते॥४२॥ अनन्यमनसा देवं स्तवेत्स्तोत्रैर्महाम
तिः॥ गर्भवासप्रमुक्त्यर्थं ब्रह्मभूतार्थमादरात्॥४३॥ गर्भ उवाच॥ नमस्ते गणनाथा
य ब्रह्मणां ब्रह्मरूपिणे॥ अनाथानां प्रनाथाय विघ्नेशाय नमो नमः॥४४॥ ज्येष्ठरा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ज्यायदेवायदेवेशमूर्त्तयेनमः॥ अनादयेपरेशाय त्वादिपूज्यायतेनमः॥ ४५॥ सर्वपू
ज्यायसर्वेषां सर्वरूपाय तेनमः॥ सर्वादयेपरं ब्रह्मसर्वेशायनमोनमः॥ ४६॥ गजाको
रस्वरूपायगजाकारमयायते॥ गजमस्तकधारायगजेशायनमोनमः॥ ४७॥ आदि
मध्यांतभावायस्वानंदपतयेनमः॥ आदिमध्यांतहीनायत्वादिमध्यांतगायते॥ ४८॥ सि
द्धिबुद्धिप्रदात्रेचसिद्धिबुद्धिविहारिणे॥ सिद्धिबुद्धिमयायेब्रह्मेशायनमोनमः॥ ४९॥
दिष्टवेशक्तयेचैवशिवायमानुरूपिणे॥ मायिनांमाययानाथमोहदायनमोनमः॥
५०॥ किंस्तौमित्वांगणाधीशयत्रवेदोदयोपरे॥ योगिनःशांतिमापन्नाअतस्त्वांप्रण
माम्यहं॥ ५१॥ रक्षमांगर्भदुःखात्त्वामेवशरणागतं॥ जन्ममृत्युविहीनंवैकुरुष्वते
पदप्रियं॥ ५२॥ एवंसंस्तूयतवंतंनवमासादनंतरं॥ प्रसूतिजोमहावायुर्वेहिकुयोन

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

९९ रंक्षणात्॥५३॥ वायुना चालितः सोपि मुमुर्छ दुःखसंयुतः॥ संकीर्णांगः पतेज्जंतुः ध
रिण्यां योनिमार्गतः॥५४॥ भवेत्तत्सावधानोत्र विस्मृतो ज्ञानमुत्तमं॥ बालभावपरः
कुर्याद्रोदनं धरणीतले॥५५॥ फलहीनं भवेत्सर्वं गर्भकारकृतं महत्॥ ज्ञानादिकम
तोभ्रष्टो साधयेत्सर्वमंजसा॥५६॥ न साधीतं नरेणात्र कर्मभ्रष्टो प्रजायते॥ ज्ञानादि
कं तदा सोपि गर्भजं दुःखमश्नुते॥५७॥ एवं तृष्णागतिश्चैव कथिता ते विशेषतः॥ जन्म
मृत्युकरी जंतोः सुखदुःखप्रदायिनी॥५८॥ गर्भकृतमिदं स्तोत्रं यः पठिष्यति मान
वः॥ स भुक्त्वा सकलान्भोगानंते स्वानंदगो भवेत्॥५९॥ न कदाचिल्लभेत्सोपि गर्भवा
सं प्रजापते॥ अतो विशेषतो जंतुर्जपेदिदं निरंतरं॥६०॥ अधुना कथयिष्यामि ह्यन्य
मर्थं सुखप्रदं॥ शुक्लकृष्णागतिसंस्थं येन ज्ञानं तयोर्भवेत्॥६१॥ भुक्तिमुक्तिप्र ९९

लोभार्थं नरः कुर्यान्निरंतरं ॥ कर्मस्वधर्मसंयुक्तो नानादेवपरायणः ॥ ९२ ॥ उत्तरायणगे
भानौ दिवसे वा मृतो भवेत् ॥ स त्वग्निलोकमासाद्य तपोयुक्तो भवेत्सदा ॥ ९३ ॥ तत्र यो
गे स्फुतों ज्वाल्य गछेच्छक्तिमहामतिः ॥ तत्राभिमानमुत्सृज्य गच्छेद्देवं दिवाकरं ॥
९४ ॥ अतिध्यानेन संयुक्तस्तत्राभिमानमचिंतयेत् ॥ अंतरात्मानमुत्सृज्य गच्छेद्धि कुंदमे
वच ॥ ९५ ॥ तत्रानंदं परित्यज्य गछेच्छिवं नसंशयः ॥ तत्र साक्षित्वमुत्सृज्य गच्छेत्स्वानं
दमंजसा ॥ ९६ ॥ तत्र गणेश्वरं दृष्ट्वा ब्रह्मभूतो नरो भवेत् ॥ भुक्तिगतिप्रभावेण कथितं
ते प्रजापते ॥ ९७ ॥ यदा दक्षिणगे भानौ रात्रौ वा संमृतो भवेत् ॥ भुक्तिमुक्तिपरः सो
पि गछेत्स्वर्गं ततो नरः ॥ ९८ ॥ नानास्वर्गफलं भुक्त्वा स्वकर्मनिर्मितं नरः ॥ पुनःपत
नरो भूमौ तत्र मोक्षरुचिर्भवेत् ॥ ९९ ॥ ततः शुक्लं समाश्रित्य मोक्षं गच्छेन्नरोत्तमः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एवं जानीहि भो दक्ष गत्योर्मार्गं पुरातनं ॥७०॥ यदेकदेवतां श्रित्य तद्भक्तः सततः सदा ॥
उपासनविधानेन स्वधर्मस्थो भजेत्सतां ॥७१॥ स मृतो स्वेष्टदेवस्य लोकं गच्छेन्न
संशयः ॥ तत्रपाद्यं दृस्त्यर्याख्यो मार्गो नैव प्रकीर्त्तितो ॥७२॥ तत्र भोगान्स भुं
जानौ ते पते दिहगंनिष्कितं ॥ त्रिगुणात्ममया देवास्तेषां नाशो प्रजापते ॥७३॥ यदा
गणेश्वरं सोपि भजेदत्रैव मानवः ॥ अंते स्वानंदगो भूत्वा ब्रह्मभूतो भविष्यति ॥७४
स्वानंदो नाशहीनश्च सदा ब्रह्मस्वरूपकः ॥ अतः स्वानंदमाश्रित्य ब्रह्मभूतो नरो
भवेत् ॥७५॥ मरणे दोषहीनश्च तेजस्तत्वं समाश्रितः ॥ अथवा धूम्रतत्वं स शुक्ल
कृष्णागतिस्थितः ॥७६॥ पूर्ववत्समाख्यातं तस्य सर्वं प्रजापते ॥ एवं विस्तारतो
गत्योः कथितं ते कथानकं ॥७७॥ अतो गणेश्वरं दक्ष समाश्रित्य हितं प्रदं ॥ योगक्षे

मंसतेकुर्यादनन्यचेतसः सदा ॥८०॥ नशुक्लानैवकृष्णा तेभविष्यतोगतीकदा ॥ अ
त्यंभूतमयंभावं प्राप्यासिनात्रसंशयः ॥८१॥ ॐ तत्सदिति श्रीमद्योगगीतासूपनि
षत्सुगर्भासु मुमुक्षुकृष्णगतीचर्या नयोगो नाम द्वादशोध्यायः ॥१२॥ दक्ष उवाच ॥
क्षेत्रंवदमाहाभागक्षेत्रज्ञंचतयोः परं ॥ सर्वगंब्रह्मयज्ञोक्तंयेनज्ञानंतयोर्भवेत् ॥१॥
मुद्गल उवाच ॥ देहंक्षेत्रमयंविद्धिदेहीक्षेत्रज्ञमंजसा ॥ तयोर्योगेभवेत्स्वतउ[illegible] [illegible]५
न संज्ञिकं ॥२॥ भूतानिपंचतन्मात्राः पंचज्ञानेंद्रियाणि तु ॥ कर्मेंद्रियाणिपंचैववा
यवः पंचदेवताः ॥३॥ इंद्रियाणांदश्रौवापिहृष्चइच्छाधृतिस्तथा ॥ अव्यक्तंचेतनादुः
खंसुखंमनोहमेवच ॥४॥ चित्तंबुद्धिः स्थूलसूक्ष्मकारणंचतुरीयकं ॥ एतेषांयो
गभावेयत्क्षेत्रंतत्कथितंबुधैः ॥५॥ सदैकभावरूपश्चभेदैः संवर्जितः परः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्षेत्रज्ञः क्षेत्रमास्थाय सर्वान्तर्यामितां व्रजेत्॥६॥ तयोर्योगे परं ब्रह्म द्वन्द्वाद्द्वन्द्ववि
वर्जितः॥ द्वन्द्वद्वन्द्वमयं पूर्णं बोधरूपं प्रजायते॥७॥ स्थूलसूक्ष्मसमाख्याख्येभ्यो वै
र्मायाविज्ञापितः॥ क्षेत्रज्ञं मोक्षस्याधीनं करोति नित्यमादरात्॥८॥ चतुर्भेदैर्विज्ञो ब
पामोहितोऽत्यन्तमेव सः॥ अहं देहस्वरूपाख्यो मन्यते सततं सुधा॥९॥ ततः क्षेत्रस्य भोगा
र्थे नानाकर्मपरायणः॥ त्रिगुणेषु भ्रमेणोव भ्रमत्यहंममात्मकः॥१०॥ अतस्तमोगुणं
त्यज्य राजसं धारयेन्नरः॥ राजसं सततं त्यज्य सात्त्विकः संभवेत्क्रमात्॥११॥ ततस्तु
रीयमाश्रित्य गणेशं संभजेत्परं॥ सर्वगं पंचमं साध्य ब्रह्मभूतो भवेन्नरः॥१२॥ इ
हसौख्यप्रदं यच्च कर्म संजायते सदा॥ पापपुण्यमयं तेन ज्ञायते न कदाचन॥१३॥
देहभोगकरं सर्वं ह्रीश्वादरपरायणं॥ तामसं तद्धि जानीहि चान्ते नरकं भवेत्॥१४॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्र तामससंयुक्ता भुक्त्वा दुःखं महाद्भुतं ॥ पुनरोगादिसंयुक्ता भवंति नीचयोनिषु ॥१५॥
कायमुक्तादिदोषैस्ते संयुक्ता पापपंचेन सः ॥ दारिद्र्यादिसमायुक्ता भोगैर्हीना भवंत्य
पि ॥१६॥ पुनः पापसमाचारा यदि स्युर्वंति मानवाः ॥ अंते यमस्य गेहे ते नरकस्थाः पुनः पु
नः ॥१७॥ अनन्तमोगुणास्त्वं च स्वभावे त्यज्यमानवाः ॥ धर्मार्थे घृति संयुक्ता यतंते दे
वयोगतः ॥१८॥ विद्धि राजसगं भावं सकामिकं नराधिप ॥ सततं कर्म कुर्वंति भोगदं ध
र्मसंयुताः ॥१९॥ वासनासंयुतं कर्म स्वधर्मस्थं सर्वे किल ॥ तदेव राजसं विद्धि नानाभा
वगतं परं ॥२०॥ राजसाः स्वर्गभोगं तु भुक्त्वा नरः पतंत्यपि ॥ इह तेयादृशं कर्म कुर्वंते
तादृशं फलं ॥२१॥ अथवा स्वल्पभावेन कृतं राजससंभवं ॥ कर्मते नन राभूमौ सर्वं लित न
क्षणात्पुनः ॥२२॥ अथवा विविधा सूते योनिषु संभवंत्यपि ॥ नीचोच्चासु विरोधेन.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

६१ जन्ममृत्युपरायणाः ॥२३॥ राजसानां प्रजानाथ नरकं नैव विद्यते ॥ स्थावरं जंगमं त्रित्य
भवंति जन्मसंयुताः ॥२४॥ तत्र दुःखं सुखं नाना भुंजंते चात्र संशयः ॥ एवं राजससर्गं सर्वं क
थितं ते समासतः ॥२५॥ अतः परं प्रवक्ष्यामि सात्त्विकं कामवर्जितं ॥ स्वधर्मस्था जना
विद्धि कुर्वंति नित्यं निरंतरं ॥२६॥ ब्रह्मार्पणतया यद्यद्भवति कर्म धर्मजं ॥ नानाविधं पर
तत्त्सात्त्विकं विद्धि मानद ॥२७॥ तेन शुक्लां गतिं प्राप्य गच्छंति मोक्षमंजसा ॥ अतः सत्व
गुणेनैव युक्ता भवंति मानवाः ॥२८॥ अतः परं तुरीयं ते कथयामि समासतः ॥ रस
हीनस्वभावेन चित्तं देहसमन्वितं ॥२९॥ भवंति चेत्तदा तुर्यं कर्म संजायते परं ॥ नाना
विधं जगत्सर्वं ब्रह्माकारं न संशयः ॥३०॥ यद्यत्तेन कृतं कर्म तदेव ब्रह्मदं भवेत् ॥ स्तु
ति निंदादिकं किंचिन्नैव तत्र प्रकीर्तितं ॥३१॥ देवभक्तादिकं दक्ष नैव तुर्ये प्रतिष्ठितं ॥ प्र ६१

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्थाणिसमभावेन वर्त्तते सर्वदा स्वयं ॥३२॥ अंतरि सर्वभावेषु पश्यति विश्वरूपिणं
॥ नदा तुरीयकं कर्मभवेति नान्यथा क्वचित् ॥३३॥ एवं सर्वसमानेन यं दृष्ट्वेन तुरीयकं ॥
कर्म आरब्धयोगेन ब्रह्मणि रसभावतः ॥३४॥ अंते स्मिता मसेतेन लीनो भवति मान
वः ॥ महाकारणभावेन त्रिगुणवालको भवेत् ॥३५॥ अतः परं महं कर्म कैवल्यं कथया
मिते ॥ विधिनिषेधहीनं यत् स वर्तिकर्म स्वेच्छया ॥३६॥ ब्रह्मभूतं समयं विद्धि पंचमं यो
मतं ६ गिसंमतं ॥ कर्त्ता देहो न संदेहस्त्करी यं प्रेरकं ॥३७॥ कुत्र स्तत्र अवस्था स्वतुरीयं व
र्ततेपरे ॥ येन सृष्टमिदं सर्वं चतुर्विधं स्वलीलया ॥३८॥ स एवं कर्त्तृभावेन कारयित
प्रभावतः ॥ तिष्ठति तत्र कोहं तु ब्रह्म कुतो विचारतः ॥३९॥ नाहं नरो न वै ब्रह्ममया सा
ध्यं निरंतरं ॥ भ्रांत्या सर्वं न संदेहो दृश्यते माययामयि ॥४०॥ स्वेछया खेलति ब्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ह्म चतुर्भेदमयं परं ॥ नस्य शुभाशुभं नास्ति तथाहंतां त्यजेन्नरः ॥ ४१ ॥ अनेनानुभवेनै
व मुक्तां स्यासंवर्ततेनरः ॥ रसं सर्वत्रसंत्यज्य त्र्यक्षाणि रसधारकः ॥ ४२ ॥ एवं चतुर्विधेभा
वे स्थितं देहिस्वरूपकं ॥ देहभ्रांतिविहीनं तं केवलासोहं परोभवेत् ॥ ४३ ॥ एवं क्रमेण यो
गीन्द्रो भवेद्योगान्नरोत्तमः ॥ कथितं विस्तरात्सर्वं क्षेत्रक्षेत्रज्ञसाधनं ॥ ४४ ॥ अथव
र्णाश्रमाचारं शृणु सर्वसुखप्रदं ॥ येन धर्मार्थकामांश्च मोक्षं लभेन्नरोत्तमः ॥ ४५ ॥
चित्तेंद्रियाणि वश्यानि क्षमार्जवे तपांसि च ॥ शौचं श्रुती स्मृतीनां वै ज्ञानं यत्र प्रति
ष्टति ॥ ४६ ॥ वेदाधारविहीनं यन्न करोति कदाचन ॥ सदा ब्रह्मपरायत्तत्वं ब्राह्मणः
से वसं स्मृतः ॥ ४७ ॥ शौर्यं दाक्ष्यं तथा दार्ढ्यं युद्धे सन्मुखगः सदा ॥ शरण्य रक्षणं
नित्यं प्रभुत्वं दंडधारणं ॥ ४८ ॥ धृतिः क्षात्रं सदा तेजश्चित्तमोदार्यसंयुतं ॥ स्कनीमा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पालनं पंचकर्मयुक्तः स्मृता द्विजाः ॥४९॥ क्रयविक्रयके नित्यं वस्तूनां भूमिकर्षणं ॥ गवांपा
लनकं चैव कर्मयुक्तः स वैश्यकः ॥५०॥ त्रिवर्णसेवनं दानं [illegible] नाममंत्रजपेत्परं ॥ पुरा
णश्रवणं शूद्रं कर्मघोराणिकं द्विजात् ॥५१॥ अंत्यजानां पुराणोक्तं कर्मविप्रमुखोद्भूतं ॥
नैव शूद्रसमं चान्यदस्पर्शत्वं द्विजादिषु ॥५२॥ कृतोपवीतको विप्रः सन्नियो विप्र एव सः ।
वेदादिकं समभ्यस्य ब्रह्मचर्ययुतो भवेत् ॥५३॥ भिक्षान्नो भवेन्नित्यं गुरोराज्ञावशा
नुगः ॥ गायत्रीं संजपेन्नित्यं त्रिकाले शुचिरात्मवान् ॥५४॥ सायं प्रातर्जुहुयाच्च हविर्नित्यं जि
तेंद्रियः ॥ द्वादशषोडशाब्दानि ब्रह्मचर्याच्चरेत्परं ॥५५॥ पंचयज्ञपरो नित्यं नैमित्तिकं
समाचरेत् ॥ कृतदारः प्रजार्थं स ऋतुगामी भवेद्गृही ॥५६॥ स्त्रीसंगं संपरित्यज्य स्त्रिया
युक्तो वसेद्वनं ॥ वन्येन सर्वकर्माणि कुर्यान्नित्यं तपःपरं ॥५७॥ नखलोमयुतश्चैव यामे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

७१ मन्त्रप्रवेशनं ।। कुर्याद्देवं वानप्रस्थो वा यु[illegible]क्षादिनं चरेत् ।। ५८ ।। मनसापि स्मरेन्नैव स्त्री
संगं न्याससंयुतः ।। चित्तनिग्रहसंयुक्तो भिक्षाशी सततं नरः ।। ५९ ।। कपर्दिकादिकं किं
चिन्मस्टन्नो न कदाचन ।। ब्रह्मणि ब्रह्मभूतत्वं तदर्थं सम्भमेत्सदा ।। ६० ।। साक्षिवद्देह
संस्थोपि मौनादिदंडधारकः ।। अथवा दंडहीनः सज्ज्ञानदंडधरो भवेत् ।। ६१ ।। एवं सन्या
सकं कृत्वा सदा तिष्ठेद्यतात्मवान् ।। शुक्लमार्गमयं शास्त्रं स्पष्टं त्रोन्मान्येहि निश्चितं ।।
६२ ।। वर्णाश्रमविहीनश्च योगी पंचमगः स्मृतः ।। विधिनिषेधहीनश्च यथा विनाय
कोभवेत् ।। ६३ ।। एतत्ते सर्वमाख्यातं स्वधर्माचरणादिकं ।। येनैव प्राप्नते योगो नरेण
ब्रह्मदायकः ।। ६४ ।। दक्ष उवाच ।। धर्मार्थकाममोक्षाणां स्वरूपं वद मानद ।। ब्रह्मभूत
स्य भिन्नं मे भ्रममनाशकरं परं ।। ६५ ।। केचिद्धर्मं महच्छ्रेष्ठं केचित्कामं तु मोक्षकं ।। प
७१

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गं परं वदंत्येव ब्रह्मभूतं तथा परे ॥६६॥ मुद्गल उवाच ॥ धर्मेण ब्रह्मलोकश्च लभ्यते
मानवैः परः ॥ ब्रह्मा सर्वसमानश्च स्वधर्माख्यः प्रकीर्तितः ॥६७॥ अर्थः समर्थता वा
ख्य ईश्वरलोकदायकः ॥ ईश्वरान्नसमर्थोऽन्यः त्र्यस्त्रब्रह्मांडमंडले ॥६८॥ कामो भोगा
त्मकः प्रोक्तो विष्णुलोकप्रदायकः ॥ स लक्ष्मीपतिराख्यातो नानाकामप्रदः प्रभुः ॥६९॥
मुक्तिसोरात्मिका प्रोक्ता स्कर्थः पुरुष उच्यते ॥ शुक्लागतिधरः पूर्णः सदा साक्षी
द्गलं तु न संशयः।।२७।। मौद्गले गणनाथस्य त्वचनं वर्तते परं।। महालयां तमेवेदं
विश्वं भाति निरंतरं।।२८।। अन्यच्च मौद्गलस्यैव विघ्नं भविष्यति कदा।। तदेव नस्स
वे मिथ्यावचनं मुनिसत्तम।।२९।। अतो गणेश्वरं प्रार्थ्य विघ्नं कुरुत देवपाः।। मौद्
लस्य गणेशानः क्षुब्धो नो न भविष्यति।।३०।। बृहस्पतेर्वचः श्रुत्वा देवा हर्षसम
न्विताः।। स्तुनयस्तं महाभाग साधुसाध्व ब्रुवन्वचः।।३१।। ननस्तं विघ्नराजं ते तु १०३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

हृद्वुः करसंपुटाः ॥ नानास्तोत्रैर्गणाध्यक्षं प्रसन्नं चक्रुरादरात् ॥ ३२ ॥ जगादतान्
स्वयं देवः सर्वव्यापी मयस्वरूपधृक् ॥ विकल्पं संत्यज्य देवेशा भविष्यथ सुखे रताः ॥ ३३ ॥
ततो ब्रह्मा गणेशानं स्तुत्वा ससर्ज तत्पदात् ॥ विकल्पं संशयाकारं महातेजोयुतं
खलं ॥ ३४ ॥ तं दृष्ट्वा देवमुख्या ये देवा विप्रादयो परे ॥ सर्वस्ते संशयेनैव युक्ता
विप्र बभूविरे ॥ ३५ ॥ किंमोद्भूतेन विघ्नेशः प्रसन्नो वा भविष्यति ॥ गणेशो ब्रह्मणां
नाथः कथं देहधरो भवेत् ॥ ३६ ॥ स्वार्थं कथितं सर्वं वेदादिषु न संशयः ॥ ब्रह्म ब्रह्म
णि संस्थं तत्सर्वं मान्यं विशेषतः ॥ ३७ ॥ एवमुक्त्वा ययुः सर्वे स्वस्वस्थानं महामु
ने ॥ मोहिता मायया तस्य विकल्पस्य महाद्भुतं ॥ ३८ ॥ किमर्थमागताः सर्वे किं कृतं
सस्मरुर्न ते ॥ विकल्पेन समायुक्ता बभूवुर्भ्रांतिचेतसः ॥ ३९ ॥ ततस्तमोद्भूतं

१०४ त्यक्त्वास्थितासर्वेविघ्नोपलः॥ नानाभावपराविप्र बभूवुः स्वस्वक्रियां पुनः॥४०॥ वि
कल्पस्तान्विलोक्यैव हर्षयुक्तो बभूव ह॥ ममसार त्रिलोके पुनाना संशयकार
कः॥४१॥ तेन सर्वे जना विघ्नमोहलं त्यजसं स्थिताः॥ एवं क्रमेण नैष्ठं तस्तुराणां प्र
बभूव ह॥४२॥ अन्यानि तु पुराणानि सर्वाणि वेदमुख्यकाः॥ नष्टमनष्टवं कुत्र स्थि
तानि स्वल्पस्तावनः॥४३॥ ततः कर्मविहीनं तु बभूव सचराचरं॥ देवा दुःखयुताः
सर्वे विकल्पं यो द्रुमायवुः॥४४॥ विकल्पेन जिताः सर्वे नष्टवीर्या बभूविरे॥ ततो ग
जाननं देवं तु ष्टुवुस्तद्ध्यायते॥४५॥ पुनराकाशवाणी स्थो जगाद तान् गजाननः॥
युद्धनाशाव शोभना क्रियां कुरुतमा चिरं॥४६॥ विकल्पो वशगस्तेन भविष्यति
नसंशयः॥ एवमुक्त्वा गणाधीशो विरराम च वशो नकः॥४७॥ ननस्ते हर्षसंयुक्ताः १०४

शिवविष्णुमुखामराः॥ कश्यपाद्यायमुस्तं तु मुद्गलं योगिनां वरं॥४९॥ प्रणम्य भा
वसंयुक्ताः पप्रच्छुः करसंपुटाः॥ विकल्पजयदं पूर्णमुपायं स्वहितप्रदं॥ तेषां
वचनमाकर्ण्य मुद्गलः पूज्य तान् स्वयं॥ जगाद वचनं योगी रहस्यं मायया युतान्
॥५०॥ इति श्रीमदान्त्ये मौद्गले न व॰ यो॰ विकल्पविजयवर्णनं नाम चतुर्विंशतितमो
ध्यायः॥२४॥ श्री॥ मुद्गल उवाच॥ आदौ गणेश्वरं स्मृत्वा लक्ष्माविनाकं परं॥ ते
जस्विनं महाभागाः कथं नेकथं तं पुनः॥१॥ स्मरणं मे प्रपन्नानां करिष्यामि प्रियं हि
वः॥ स्थितानां संनिधाने च विकल्पः किं करिष्यति॥२॥ महर्षयः कश्यपाद्या मुद्गलेन
शिवादयः॥ आश्वासिताः स्थितास्तत्र स्मरणयुक्ता बभूविरे॥३॥ मुद्गलस्याश्रमे तस्य प्र
वेशो नैव विद्यते॥ विकल्पस्य महाभागाः ते न निःसंशया बभुः॥४॥ विकल्पेनैव दृष्टो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

१०५ तो ज्ञातो देवर्षिसंस्तवः ॥ क्रोधयुक्तः स्वयं हंतुं जगाम मुद्गलाश्रमं ॥५॥ आगमं तं समा
लोक्य विकल्पं भयदायकं ॥ देवेंद्रा मुद्गलं तत्र जग्मुर्भयसमन्विताः ॥६॥ देवेंद्रा ऊचुः ॥
विकल्पः क्रोधसंयुक्तः समागतो महामते ॥ तवाश्रमे धुना विप्र यत्करिष्यसि तत्कुरु
॥७॥ तेषां वचनमाकर्ण्य मुद्गलस्तानथाब्रवीत् ॥ चिंतां मा कुरुत प्राज्ञा हनिष्यामि वि
कल्पकं ॥८॥ एवमुक्त्वास्थ्ययं योगी मुद्गलस्तमथाययौ ॥ विकल्पं तेजसा युक्तं सर्वसं
ज्ञायकारकं ॥९॥ उवाच तं महायोगी मुद्गलः परमार्थवित् ॥ दयायुक्तस्वभावेन प्रेरितो
गणपेन सः ॥१०॥ मुद्गल उवाच ॥ किमर्थमागतोसि त्वं विकल्प गच्छ ते रुचि ॥ यत्र तत्र
महादुष्ट नो चेद्भस्म भविष्यसि ॥११॥ मुद्गलस्य वचः श्रुत्वा विकल्पः क्रोधसंयुतः ॥ जगा
द स महाविप्रं प्रदहन्निव तेजसा ॥१२॥ विकल्प उवाच ॥ मां दृष्ट्वा विद्रुतां त्वा घा वसिष्ठा १०५

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

धामहर्षयः॥ संशयेन महायुक्ता बभूवुस्तत्क्षणान्मुने॥१३॥ त्वां न जानामि योगींद्र कु
त्र स्थितोसि वाडव॥ वदसि मां विजेतारं सर्वेषां मुरर्षवहूचः॥१४॥ मया चराचरं सर्वम
द्धीनं कृतं किल॥ अधुना त्वां हनिष्यामि महेषकारकं परं॥१५॥ त्वया देवेंद्रमुख्याश्च
देवा मुनिसमन्विताः॥ विकल्पेनाविहीना वै कृताः कस्माद्द्विजप्रभो॥१६॥ गर्वहं तु समाया
तं त्वदीयं मुहूर्ताच्छुभं॥ जानीहि त्यज सर्वास्त्वं नोचेद्भस्म भविष्यसि॥१७॥ विकल्पस्य
वचः श्रुत्वा क्रोधयुक्तो महामुनिः॥ सस्मार गणपं चित्ते विकल्पस्य वधाय सः॥१८॥
तस्य स्मरणमात्रेण चित्तान्मुद्गलयोगिनः॥ अग्निः प्रलयकृत्तत्र निःसृतः सर्वदाहकः॥
१९॥ अग्निर्ययौ महाक्रूरं विकल्पं क्रोधसंयुतः॥ खलं दर्शनमात्रेन दाहयुक्तं चका
र सः॥२०॥ ततः शांत्यर्थमत्यंतं यत्नं चकार शौनक॥ विकल्पवारुणं शौच्य सोग्निस्त

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जो युतोभवत्॥२१॥अतिदाहयुतः सोपि विकल्पः खेदसंयुतः॥खलं दर्शनमात्रेण दा
हयुक्तं चकार ह॥२२॥गर्वत्यक्त्वा महाविप्रं ननाम मुद्गलं पुरः॥जगाद स्मयभीतः सरस्व
मां मुनिसत्तम॥तेजसा ते प्रदग्धं तु शरणागतवत्सल॥२३॥शिवविष्णुमुखाः सर्वे वि
प्रा वसिष्ठमुख्यकाः॥जिता मया न संदेहः स्वल्पा यासेन योगिप॥२४॥त्वं किं साक्षा
द्गणेशानः समागतो न संशयः॥त्वां जेतुं न समर्थो हमनस्ते शरणागतः॥२५॥रक्षर
क्ष दयासिंधो दाहयुक्तं विशेषतः॥तेजसा ते प्रनष्टं मां क्षमस्व मे कृपाग सं॥२६॥वि
कल्पं व्याकुलं दृष्ट्वा दयायुक्तो बभूव ह॥मुद्गलो गणपाज्ञालं मस्थितं शांतं चकार ह
२७॥ततः संज्ञासमायुक्तो विकल्पस्तमुवाच ह॥स्वस्थचित्तः प्रणम्यादौ मुद्गलं यो
गिनां वरं॥२८॥विकल्प उवाच॥जितोहं त्वया विप्र रक्षितो निर्भयात्तथा॥अधुना

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेसमाधीनस्तिष्ठामित्वत्समीपगः ॥२९॥ स्थानं देहि महाभाग तत्र स्थास्यामि निश्च-
लः ॥ तवाज्ञावशगो भूत्वा लवदासोहमंजसा ॥३०॥ तस्य तद्वचनं श्रुत्वा ध्यानयुक्तो बभू-
व ह ॥ ज्ञात्वा विघ्नेश्वरस्यैव रूपं तं सकुदाब्रवीत् ॥ ३१॥ मुद्गल उवाच ॥ योगाकारं गणे-
शानं जानाति नराधमाः ॥ देहधारिसमं तं ये मानयंति गुणोद्भवं ॥३२॥ तेषां हृदि वहि-
स्थित्वा तिष्ठत्वं सर्वदा मुदा ॥ नानासंज्ञायसंयुक्तां स्तान्कुर्वन्स तु विज्ञोषतः ॥३३॥ मौ-
द्गलं संज्ञायेनैव यत्नं कुरु मदाज्ञया ॥ तेषां हृदि समास्थाय योगिनां गणपद्विषां ॥३४॥
गणेशं योगरूपं ये मानयंति विकल्पकाः । योगिनो योगिनो वापि ते त्याज्याः सर्वदा त्व-
या ॥३५॥ मौद्गलेभ्रद्धयायुक्ता भविष्यंति सदा मुदा ॥ गणेशा योगिनः शुद्धा नान्येम-
दीयवाक्यतः ॥३६॥ एवमुक्त्वा महायोगी मुद्गलो विरराम ह ॥ विकल्पे स्थानं तथेत्युक्त

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्क्वा प्रणम्य स्वस्थलं ययौ ॥३७॥ ततो हर्षयुता देवा मुनयस्तं प्रणम्य च ॥ कुकुलं स्व
स्थलं जग्मुः कर्मयुक्ता जना बभुः ॥३८॥ तदादिमो कुलं विप्रसेव्यते नैव जंतुभिः ॥ दो
षयुक्तैर्विरोधेनापि कलौ न सम्पन्चितैः ॥३९॥ कलावस्यं तथा देवमो कुलं न सुगं भवे
त् ॥ दोषयुक्ता जनास्तत्र प्रसविष्यं तिग्रहे गृहे ॥४०॥ योगिनो मो कुलं नित्यं सेवंते भा
वसंयुताः ॥ गणेशरूपबोधे येन तु ते सर्वपावनाः ॥४१॥ नान्यो पायं वंदिनो लुब्धा
नानाखचयधराभुवि ॥ मोहयुक्ता विरोधेन भविष्यंति तु मो कुलं ॥४२॥ एवं देवैः कृ
तो विघ्नो गणेशाने न प्रेरितैः ॥ मुनिभिमौकुले तेनाभवन्नू जन्मयुता नराः ॥४३॥
एतत्ते कथितं सर्वं रहस्यं परमाद्भुतं ॥ शृणुयाच्छ्रावयेद्यः स विकल्पवर्जितो भवेत् ॥४४॥ इ
ति श्रीमदांत्ये मौद्गले ॰ न ॰ या ॰ विकल्पप्रतापखंडनं नाम पंचविंशतितमोऽध्यायः ॥ २५॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

श्रीगणेशायनमः॥ सूतउवाच॥ सीमोनामाभवद्दूरयः सर्वधर्मविवर्जितः॥ अंगदेशे महापा
ना२ पीद्दुर्ग्रस्तुपुण्यनाशकृत॥१॥ सकदाचिद्दूने संस्तो बभूव वीर्यकाम्यात्॥ तत्राजगाम राज
र्षिः सैन्ययुक्तो विदर्भपः॥२॥ तं दृष्ट्वा त्यज्य शस्त्राणि भीमः पापपरायणः॥ महावना
न्तरं गत्वा तस्थौ पापपरिश्रया॥३॥ तत्र मेधातिथिर्विप्रो माघशुक्लप्रतिपदि॥ आरभ्य
मुनिसंयुक्तो मौद्गल्यं कथनेरतः॥४॥ तत्राजगाम तं दृष्ट्वा वैरूपपापरतो मुने॥ भया
त्समीपगस्ते पां संस्थितः शस्त्रवर्जितः॥५॥ राजा समाययौ तत्र नत्वा नाम मुनिपुंगवं॥
मेधातिथिं मतः सर्वान् मुनीन् भावसमन्वितः॥६॥ श्रोतः कालेषु नः स्नात्वा कृत्वा नि
त्यक्रियां द्विजाः॥ मौद्गल्यं श्रोतुकामास्ते आययुर्हर्षसंयुताः॥७॥ + पुनः श्रवणम्पस्त्व
स्थानं ययौ भानुर्विदर्भपः॥ वैश्यो मुनिवरैस्तत्र स्कन्धाप विनयान्वितः॥८॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१०८ तैः सह भीमवैश्योपि राजभयात्समाययौ ॥ ॐ आवमुद्गलं तत्र पुराणं विस्मितोभ
वत् ॥ ९ ॥ सो मुद्गलस्य कृपणस्य श्रवणेन दुरात्मनः ॥ बुद्धिभेदो बभूवापि सत्तत्रैव
स्थितोभवत् ॥ १० ॥ विचारमकरोच्चित्ते भीमः पापपरायणः ॥ अहो वैश्योयमानंदा
त्किं करोमि दुरात्मवान् ॥ ११ ॥ पापिनो नरकं यान्ति नात्मनास्य च संशयः ॥ नरदेहं समा
साद्य धर्मं कुर्यात्समानवः ॥ १२ ॥ एवं विचार्य तत्रैव मोद्गलश्च वणोरतः ॥ त्यक्त्वा स्त्रीपु
त्रकार्यं स गणेशोल्लालसोभवत् ॥ १३ ॥ फाल्गुन्यां पूर्णिमायां तु चतुरायां पूर्णमाभ
वत् ॥ प्रतिपद्दिने द्विजान्भोज्य मेधातिथिः स हर्षितः ॥ १४ ॥ पारणां कृत्य सर्वानूसावि
स ज्येगणपे रतः ॥ नित्यं गणेश्वरं भक्त्या पूज्य भक्तिपरो भवत् ॥ १५ ॥ भीमः स्व
ग्रहमागत्य त्यक्त्वा पापात्मकं परं ॥ कर्मस्वधर्मसंयुक्तो बभूव गणपे रतः ॥ १६ ॥ सो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ल
दूश्रवणेनैव सर्वपापविवर्जितः॥ बभूव धर्मशीलश्च गाणपत्यो महायशाः॥१८॥ श
राशं तेन गत्वा स्थानं जगाम वैश्यजः परं॥ अत्यन्तभूतो बभूवापि दृष्ट्वा विघ्नेश्वरं मुने॥१९॥
मोद्गलं श्रुत्वा विप्रेन्द्र एवं नानाजनादयः॥ बभूवुः पुण्यशीलाश्च गाणपत्या तन्मयाः कि
ल॥१२॥ तत्राहं किं ततो ब्रूयां शाक्तो वकुं न को भवेत्॥ नानेन सदृशं किंचिज्ज्ञानीहि
त्वं महामुने॥२०॥ इति श्री मेद्गांल्ये मोद्गले न॰ खं॰ माघशुक्लादि सार्द्धैक मास सम्भवं
मोद्गल श्रवण माहात्म्य वर्णनं नाम वर्द्धिशतितमोऽध्यायः॥२१॥ सूत उवाच॥ भाद्रप
दे महायोगी मुद्गलस्यो गणपेरतः॥ प्रतिपदिनतो स्थानं कृत्वा रंभस्य मोद्गलं॥१॥ ते
त्र विप्रादयो विप्र श्रवणार्थं समाययुः॥ यथाविधि न्यास वै शुश्रुषुर्भक्तिनम्राः।
रा॥ अर्थेन संयुतं नित्यं मोद्गलं मुनिसत्तमः॥ कथयामास हर्षेण गणेशार्थ विचक्ष

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१०१ तः॥३॥ तत्र सर्पो बिले संस्थः कृश्चाव भय संयुतः॥ कस्मिंश्चिद्दिवसे विप्रभाग्येन प्रेरि
तः परं॥४॥ मुनयः सुषुपुः सर्वे रात्रौ सर्पो बहिः शनैः॥ निर्जगाम ययौ मार्गे स्वेच्छ
या स्फुख संयुतः॥५॥ वनस्थो नकुलः कश्चित्तं ददर्श भुजंगमं॥ आययौ हंतु मावेशाल
यो युद्धं बभूव ह॥६॥ नकुलेन बलाढ्येन हतं सर्पं वनांतरे॥ तं स्रुत्य गापापाः सद्यो
ब्रह्मभूतं प्रचक्रिरे॥७॥ तं दृष्ट्वा विस्मिताः सर्वे देवे द्वाश्यामहामते॥ परस्परं समू
चुस्ते साश्रुनेत्रा महर्षयः॥८॥ अहो मुद्गलमहात्म्यं वक्तुं सर्वे न शक्यते॥ सर्पो ज्ञाना
द्वसं कृत्वा किंचिद्ब्रह्ममयो धुना॥९॥ संपूर्णो मौद्गलं ये स्कसंस्कृतं ते गपाश्वरः॥
न ज्ञायते विशेषेण किं विशेषमतः परं॥१०॥ संपूर्णो मौद्गलं येश्च संस्कृतं ते गणेश्व
राः॥ ज्ञातव्या लोकनाथा वै पावनार्थं भवंत्यतः॥११॥ नरजन्मधरो यस्मान्मौ १०१

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दूर्लं न शृणोति चेत्तु ॥ दैवजितो मायया चूर्णो धिक् तस्य जीवनं वृथा ॥१२॥ विप्रा जन
मस्कार्यं देहि जन्म धरातले ॥ नित्यमोदसंयुक्ता न कुरुतो मानवा श्रमो ॥१३॥ धिक् स्व
र्गं देवदेवेशाय यत्र कर्मफलं न च ॥ क्षीयते देवदेवेशैः कर्म तत्र यथार्थतां ययौ ॥१४॥ अ
हो कीट पतंगादि या नो जन्म धरो भवेत्तु ॥ भारते साधुसंगेन ब्रह्मभूतो भविष्यति ।
॥१५॥ सर्पोयं नरवा कुही नो न जानाति किं भव्य हो ॥ मनुष्य वाणि जंभा वं तथा शुश्रा
वमो दूर्लं ॥१६॥ तेनैव ब्रह्मभूतोयं गतः स्वानंदके पुरे ॥ किं पुनर्नरजातिस्थो न प्रा
प्नुयात् जाननं ॥१७॥ एवमुक्त्वा मराघास्ते स्वस्वस्थानकमाययुः ॥ अधुना प्रक्व
तं ब्रूहि सर्वसौख्यकरं परं ॥१८॥ आश्विन्यां पूर्णिमायां तु समाप्तं संबभूव ह ॥ सो
दूर्लं हर्षसंयुक्ताः श्रोतारस्तं प्रपूजिरे ॥१९॥ सर्वैः साकं महायोगी पारयास्यवका

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

११० रहः॥ अतिपदितः सर्वान् विससर्ज महायशाः॥२०॥ तदाज्ञया ययुः सर्वे स्वं स्व
माश्रमकं मुने॥ गणेशभजने सक्ता बभूवुः सर्वभावनः॥२१॥ इह भुक्त्वाखिलान् भो
गानंते स्वानंदगा मुदा॥ बभूवुर्ब्रह्मभूतास्ते दृष्ट्वा गाणेश्वरं परं॥२२॥ इति ते सर्वमा
ख्यातं स्वार्द्धैकमासजं परं॥ मौद्गल्यश्रवणाज्जातं भाद्रपदादिसंभवं॥२३॥ एवमनं
तरूपाश्च जंतवो ब्रह्म लेभिरे॥ तव कुंडस्य तेन त्वं मौद्गल्यश्रवणे नवै॥२४॥ इति श्रीम
दांत्ये मौद्गले न॰ यो॰ भाद्रपदादिसार्द्धैकमासमौद्गल्यश्रवणमाहात्म्यं नाम सप्तविंशा
तितमोध्यायः॥२७॥ सूत उवाच॥ ब्राह्मणो वंध्यभावेन पीडितः कर्मपापुरा॥ गा
र्ग्यवंशाधरः कोपि नाम्ना शंभुरितीरितः॥१॥ नानोपायान् समास्ते न वंध्यदोषघ्न हारि
णः॥ तथापि तस्य पुत्रो वा पुत्री बभूव न द्विज॥२॥ ततोतिदुःखसंयुक्तो गोतमं सज ११०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गामह॥ सत्विकः पुत्रकामार्थं नानामतं महामतिं॥३॥ गोतमेन मुनीन्द्रेणासक्तेनः शंभु
रवसत्॥ सेवार्थं स्वगुरोस्तत्र यत्नयुक्तो बभूवह॥४॥ एकदा सुखमासीनं गोतमं
नम्य भक्तितः॥ जगाद पुत्रप्राप्त्यर्थं वचनं स्वहितावहं॥५॥ शंभुरुवाच॥ नानायत्नाः कृ
ताः स्वामिन् पुत्रप्राप्त्यर्थमादरात्॥ लब्धं नैव संतानं मयाकिं वदकारणं॥६॥ येनो
पायेन मे पुत्रो भविष्यति महामते॥ तमुपायं वदस्वामिन् करिष्यामि त्वदाज्ञया॥७॥ त्वं
गुरुर्मे पराकाष्ठा त्वत्तः परं न विद्यते॥ तारय स्व महाभाग वंध्यदोषसमुद्रतः॥८॥ तस्य
तद्वचनं श्रुत्वा जगाद तं महामुनिः॥ गोतमः सर्वतत्त्वज्ञः शंभुं दुःखसमन्वितं॥९॥ गो
तम उवाच॥ मा कुरुष्व वृथा चिंतां तव पुत्रा द्विजोत्तम॥ भविष्यंति त्रयः प्राज्ञा वेदज्ञा
गतपापक्रियाः॥१०॥ शृणु त्वं मोद्गलमतः सर्वसिद्धिप्रदायकं॥ तेनानंतं लभ वस्तुं तेपापं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१२१ नन्दयेच्च नक्षपान् ॥११॥ पुष्पराशिः स्वयं साक्षात्प्राविष्यति तनारकः ॥ अन्येषां
नात्र संदेहः सर्वसिद्धियुतस्तथा ॥१२॥ अंमे गणेश्वरं प्राप्य अर्णलब्धो भविष्यसि ॥ नि
शात्र ज्येष्ठमासे हं कथयिष्यामि मोद्दलं ॥१३॥ एवं तस्य वचः श्रुत्वा हर्षयुक्तो बभूव ह ॥
स्फटील यास्त्रियो सार्द्धं तत्रैव संस्थितो भवत् ॥१४॥ ततः स्वल्पेन गते काले ज्येष्ठमा
सः समाययौ ॥ अन्ये मुनिगणास्तत्र श्रवणार्थे समाययुः ॥१५॥ नानाद्वीपस्थितिसमायु
क्तः शंभुरतीव हर्षितः ॥ विधियुक्तनमा सर्वे श्रोतारस्तत्परा बभुः ॥१६॥ ज्येष्ठ प्रति
पदि शुक्ले गोतमो योगिनां वरः ॥ समारभत्स हर्षेणाथो द्दलं सर्वसिद्धिदं ॥१७॥ व्या
ख्यां चकार सर्वज्ञो मोद्दलस्य यथार्थतः ॥ नत्तु वाविस्मिताः सर्वे बभूवुः श्रवणोरताः ॥
१८॥ नित्यं नियमसंयुक्ताः शुश्रूषुर्भक्तिसंयुताः ॥ तत्रैकस्मिन्दिने चित्रं बभूव प

रमाद्भुतं॥१९॥ गर्दभस्तत्र दैवेन समाययौ स दुःखितः॥ ज्वरेण पीडितो त्यंतं दूरेन स्थितो
महामुने॥२०॥ क्षुधाश्च मौद्गलस्येव श्लोकं ज्ञानविवर्जितः॥ पीडाहीनो बभूवापि त
त्र किंचित्स रासभः॥२१॥ हृदि सविस्मितो भूत्वा तस्थौ श्रवणलालसः॥ ततो गोतम
विप्रेण समाप्तं तत्कृतं मुदा॥२२॥ सर्वैः स्वस्वक्रियां चक्रुः पुनः प्रातः समाययुः॥ ग
र्दभो दुःखहीनः स बभूव तत्क्षणान्मुने॥२३॥ स ययौ स्वेच्छया सुखो ममार कालवे
गतः॥ कस्मिन्काले च तं नेतुं गायोत्रा: प्रययौ मुदा॥२४॥ तं गृह्य स्वलन्तं ते चक्रुः
श्रवणपुण्यतः॥ तं दृष्ट्वा देवविप्राद्याः स्वर्गस्थाश्च विस्मयं ययुः॥२५॥ अथ शृणु महा
भाग गौतमो हर्षसंयुतः॥ आषाढ्यां पूर्णमायां स समाप्तं तच्चकार ह॥२६॥ प्रति
पदि द्विजाद्यैः स च कारपारणं मुदा॥ सर्वे हर्षयुतास्तं ते नत्वा स्वस्वाश्रमं ययुः॥२७॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शंभुः स्वलीलया साढूं जगाम स्वाश्रमं ततः॥ गयोत्राम भजं नित्यं स्नात्वा योगवपुर्धरं
॥२८॥ ततः स्वल्पेन काले स्त्री ला गर्भसंयुता॥ बभूव तां प्रदृश्यैव शंभुः स्वविस्मि
तोभवत्॥२९॥ ततः शुभे मुहूर्ते सा सुषुवे पुत्रमुत्तमं॥ सर्वलक्षणसंयुक्तमेवं स्वा ना
त्रयोभवन्॥३०॥ वेदज्ञं सर्वमान्यां श्रीगाणापत्यपरायणान्॥ तान्दृष्ट्वा विस्मितः शंभुः
सस्मार गौतमं गुरुं॥३१॥ मौद्गले तस्य रः सोपि बभूव नित्यमादरात्॥ अंते विघ्नेश्वरं प्रा
प तत्क्षणः प्रबभूव ह॥३२॥ नानाजन्मगतोज्ञानं लेभिरे मौद्गलस्य च॥ श्रवणेन च
पाठेन तेषु कं ति बुवे मुने॥३३॥ एतत्ते कथितं विप्र ज्येष्ठात्साढूंकमासगं॥ मौद्गल
श्रवणस्यैवमाहात्म्यं स्वल्पभावतः॥३४॥ इति श्रीमदांत्ये मौद्गले॰ नयो॰ ज्येष्ठात्सा
ढूंकमासभवं मौद्गलश्रवणमहात्म्य वर्णनं नामाष्टाविंशतितमोध्यायः॥ ॥२८॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रीगणेशाय नमः ॥ सूत उवाच । राजासीन्नृपुंड्रदेशस्य रुक्मग्रीवः सर्वशास्त्रवित् । ना
नाधर्मपरः सोपि शास्त्रार्थतत्त्वविचक्षणः ॥१॥ तस्य देशे ह्यनावृष्टिर्बभूव दुःखवर्द्धि
नी ॥ नववर्षं रुद्धा मेघस्ततो राजातिदुःखितः ॥२॥ इंद्रस्य वरुणस्यैवानुष्ठानं तत्परो
भवत् ॥ शास्त्रवैर्नित्यमत्यंतं तोषयामास मेघपं ॥३॥ ततोपि नववर्षे च मेघः पापनये
रितः ॥ वीक्ष्यातिदुःखसंयुक्तो बभूव रुक्मग्रीवो नृपः ॥४॥ राजा राज्यं परित्यज्य विश्वामि
त्रं जगाम ह ॥ तं प्रणम्य पप्रच्छ सो मेघवृष्टिकरं परं ॥५॥ तेन संकथितं विप्र मौद्गलं श्र
शुभ्रमिप । देशं दृष्ट्वा असंपूर्णां स विश्यति न संशयः ॥६॥ ततो राजा द्विजैस्तत्र गले ख
यित्वा च मुद्गलं ॥ ययौ स्वनगरं हृष्टः शुश्राव तन्महामतिः ॥७॥ जनैः सार्द्धं समीपस्थै
स्ततो वृष्टिर्बभूव ह । आरब्धे मौद्गले प्राप्ते तं दृष्ट्वा विस्मितो नृपः ॥८॥ सर्वे हर्षयुता लो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

११३ कृताजाताःपुंड्रनिवासिनः॥राज्ञागणेश्वरंनित्यमभजन्भक्तिसंयुतः॥भाद्रेशुक्लप्रतिप
त्समारभ्यसमोद्भवं॥श्रावणेनित्यमानंदात्पुराणंसर्वसिद्धिदं॥१०॥पुनर्भाद्रपदेमा
स्यशुक्लचतुर्थिकांपरां॥समाप्तंतत्रपंचम्यांचकारहर्षसंयुतः॥११॥अतिसंहर्षितो
राजाश्रावणंप्राप्यसौख्यदं॥शुक्लप्रतिपदिप्राज्ञैःप्रारभन्मौद्गलंपुनः॥१२॥नित्यंस्क
श्रावेस्कन्दीवोगाणापत्यपरायणः॥आषाढ्यांससमाप्तंतद्मायांअन्वकारह॥१३॥
पुनःप्रारभ्यस्कन्दीवोजनैःश्रेष्ठैःसमन्वितः॥शुश्रावद्वर्षमध्येसएवंवार्षिकमा
दरात्॥१४॥प्रतिवर्षंमहाभक्त्याशुश्रुवुःसर्वनागराः॥भक्तियुक्तागणेशानमभज
न्दुःखवर्जिताः॥१५॥नतत्रवंध्यदोषेणयुक्तःकश्चिद्बभूवह॥नरोगशोकसंयुक्तः
स्कन्दीवोराज्यकर्तरि॥१६॥सर्वसंपत्समायुक्ताजनास्तत्रबभूविरे॥रोगदोषादिभि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

र्भावैः संयुक्ताभयवर्जिताः ॥१७॥ ततः सर्वे स राजर्षिर्जगाम नगरं स्थितेः ॥ गणेशं ब्रह्मभू
तस्तैर्बभूव परमद्युतिः ॥१८॥ गच्छतो निजलोकं वै तस्यां गाढ्यायुना परे ॥ दृष्टा रौरवसंस्था
स्तेपीडाहीना बभूविरे ॥१९॥ तान्दृष्ट्वा मानवा विप्र ब्रह्मभूतान्स्वचक्रिरे ॥ यमाद्या विस्मिताः
सर्वे प्रशशंसुश्च मौद्गलं ॥२०॥ एवं वार्षिकजं तेय त्कथितं श्रवणं च तत् ॥ मौद्गलस्य हि
माहात्म्यं सर्वसिद्धिप्रदायकं ॥२१॥ सुग्रीवदेशगः कश्चिच्छ्रुत्वा वृत्तांतमद्भुतं ॥ कुष्टयुक्तो ययौ
तत्र पुराणश्रवणार्थतः ॥२२॥ वार्षिकं राजशार्दूलः समारभ्य नृस्तु भक्तितः ॥ सोपि नित्यं
प्रसुश्राव कुष्टनाशार्थमुत्तमं ॥२३॥ कृत्वा कुष्टविहीनः स बभूव हर्षसंयुतः ॥ जगाम स्व
गृहं पश्चाद्गृहकार्यरतो भवत् ॥२४॥ भुक्त्वा भोगान्मनोज्ञान्सो ते जगाम गजाननं ॥
ब्रह्मभूतो बभूवापि श्रवणं फलजेन वै ॥२५॥ एवं संक्षसमाख्यातं मौद्गलं विविधाजनाः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्युक्त्वाखिलान्भोगानंतेस्वानंदमाययुः ॥ २६ ॥ तत्रैवकतितेब्रूयांनालंवर्षायुतैरपि ॥
अतःसंक्षेपतःप्रोक्तंवर्षश्चव्रताजंफलं ॥ २७ ॥ इतिश्रीमदांत्येमौद्गले॰ न॰ यो॰ वर्षपामौ
द्गलश्रवणमाहात्म्यंवर्णनं नामैकोनत्रिंशोध्यायः ॥ अध्या ॥ २९ ॥ सूतउवाच ॥ रा
जाभूद्राक्षसेषुकश्चित्सुमेधानामधारकः ॥ नानाधर्मपरोयज्वादातामानीमहाबलः ॥
१ ॥ सर्वशास्त्रार्थतत्वज्ञोदेवद्विजातिथिप्रियः ॥ सप्तद्वीपाधिपोभूत्वाचकारराज्यमु
त्तमं ॥ २ ॥ एवंराज्यपरोराजासर्वेषांहितकारकः ॥ वंध्यदोषसमायुक्तोबभूवातिदुः
खितः ॥ ३ ॥ नानोपायांश्चकारासोपुत्रप्राप्त्यर्थ मादरान् ॥ नालभत्सुतमानंददा
यकंदुःखितोभवत् ॥ ४ ॥ पत्न्याविचार्यराजासोत्यक्त्वाराज्यंतयासह ॥ प्रधानेषु
वनंघोरंययौशोकसमन्वितः ॥ ५ ॥ बभ्रामभ्रांतिचित्तोसौसुमेधायत्रतत्रच ॥ ततो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

महावनं राजा ददर्श भयदायकं ॥ ६॥ मृगयां निश्चयं कृत्वा प्रविवेश महावनं ॥ त
त्रव्यालान्मृगव्याघ्रांः पपलुस्तं निरीक्ष्यते ॥ ७॥ ततो राजा श्रियायुक्तो बभ्राम भ्रां
तवद्यथा ॥ तत्र क्रतुं ददर्शापि महायोगीन्द्र मुत्तमं ॥ ८॥ प्रणनाम महिपालो विप्रं कृतां
जलिपुरस्थितः ॥ तुष्टाव तं विधेः पुत्रं तेजोयुक्तं प्रजापतिः ॥ ९॥ संतुष्टस्तं महीपालं
समाश्वास्य जगाद ह ॥ क्रतुः त्वं किं ते महीपाल वद किमर्थमागतः ॥ १०॥ राजा तस्मै सद
वृत्तं कथयामास विस्तरात् ॥ तच्छ्रुत्वा ध्यानसंयुक्तो बभूव मुनिसत्तमः ॥ ११॥ क्रतु
स्तं नृपतिं विप्रो जगाद हर्षयन्निव ॥ सौद्युम्ने शृणु राजेन्द्र त्वं पुत्रयुक्तो भविष्यसि ॥ १२॥
मुद्गिलोऽयं जटाजूटस्तं ब्रह्मप्रतदासया ॥ ययौ स्वनगरं विप्रं पुरोहितमुवाच ह ॥ १३॥
श्रुत्वा वृत्तं गुरुस्तस्य वशिष्ठो ऽव्ययः सर्वशास्त्रविदां जगाद तं महिपालं हर्षनिर्भरमा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

११५ नमः॥१४॥मौद्गलमानयिष्यामि सर्वसिद्धिप्रदायकं॥आवद्व्याभीनो राजन्मन्साक्षिं मां
कुरु निश्चितं॥१५॥एवमुक्त्वा ययौ सोपि कर्तुं योगींद्रमुत्तमं॥ तं प्रणम्य यथान्यायं
मौद्गलं कृतवान्परं॥१६॥ लखयित्वा स्वयं विप्रः शांडिल्यः सर्वतत्ववित्॥ ययोस्कमे
ध्य संभूपं जगाद वचनं हितं॥१७॥ शांडिल्य उवाच॥ मौद्गलेन समं राजन्नून किंचिद्दूर्त
तेपरं॥ शास्त्रं योगींद्रवंद्यं तत्सर्वसिद्धिप्रदायकं॥१८॥ कृतोः प्रसादमाहात्म्यान्मम
याज्ञातमिदं परं॥ शृणु नित्यं महाराज मौद्गलं सर्वमौद्गलं॥१९॥ एवमुक्त्वा स्वयं विप्रः
समारभस्क हर्षितः॥ मौद्गलं तं प्रणम्यादौ जगाद नृपसत्तमः॥२०॥ स्कमेधा उवाच॥
मुहूर्तेपरस्य विप्रेन्द्र श्रुभर्दं नत्सु नः प्रसो॥ मौद्गलं कथयस्व त्वं सर्वसिद्धिकरं परं॥२१॥
शांडिल्य उ०॥ क्षणभंगुरदेहोयं न विश्वास्यो महीपते॥ विघ्नराजं स्मर त्वं वै तेन का ११५

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

लः शुभो भवेत्॥२२॥ गणेशं नृपशार्दूल यः किंचित्सर्वसिद्धिदं॥ तत्र द्विविधभावेन स
मां चरेन्नरो नमः॥२३॥ मुहूर्तं शुभदं लोक्याथवा नं गणपं स्मरन्॥ समारभेन्न संदेहो
लोभात्वं तु विचारय॥२४॥ एवमुक्तो नृपस्तेन तथेति पत्निसंयुतः॥ शुश्राव मोद्गलं
नित्यं श्रीशांडिल्याद्धर्मसंयुतः॥२५॥ ततस्वल्पेगते काले गर्भयुक्तां निरीक्ष्य तां॥ पत्नीं
महीपतिः सर्वैर्हर्षयुक्तो बभूव ह॥२६॥ पुत्रं सा सुषुवे साध्वी सर्वलक्षणसंयुतं॥ रा
जा नित्यं स्वहर्षेण शुश्राव मोद्गलं परं॥२७॥ तदेकस्मिन्प्रसावस्थो बभूव नित्यमादरात्॥
अंते नगरसंयुक्तो जगाम गणपं परं॥२८॥ तत्र दृष्ट्वा गणेशानं ब्रह्मभूतो बभूव ह॥ ज
नैः सार्द्धं स्वमेधास्वपुराणश्रवणेन वै॥२९॥ शांडिल्योपि वनं गत्वा नित्यं विघ्नेशमाश्र
जत्॥ गणेशाख्यपुराणं स कथयामास मोद्गलं॥३०॥ नित्यं भावसमायुक्तो मोद्गलेन

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सरोभवत्॥ तां नियोगयुतो भूत्वा स्तुवंतं गणनायकं॥३१॥ सर्वत्र सममान्यश्च च
भवब्राह्मणाग्रणीः॥ अंतेन योऽभवत् प्रापयोगिवंद्यो महायशाः॥३२॥ तस्याश्रमे गणे
शस्य क्षेत्रं बभूव सिद्धिदं॥ दर्शनाद्यैर्महाविप्र सर्वसौख्यकरं परं॥३३॥ एवं नित्यं
जपेत्स क्रोधौ दूतस्य महामुने॥ इहमुक्त्वोपभोगांस्ते ब्रह्मभूताववरविरे॥३४॥ इ
ति श्रीमदांत्यमौद्गले • न०या •यौ द्गलनित्यच्छवणामाहात्म्यं नामत्रिंशत्तमोऽध्यायः॥३०॥
सूत उवाच॥ कुत्सो द्विजवरः साक्षान्नाना तपः परोऽभवत्॥ तपसा शुद्धभावः सत्रं स च ब्र
ह्मपरायणः॥१॥ ब्रह्मयपरोभूत्वा जप्तोन्मत्तादिकं परं॥ वेचारसततः शक्ते ब्रह्मपित
मयोऽभवत्॥२॥ नामरूपात्मकानां तं त्रैह्मास संस्थितं मतं॥ तस्मात्तात्यांति हीनश्च ब
भवस्वेदसंयुतः॥३॥ तत्रागतं स योगींद्रं याज्ञवल्क्यं प्रतापिनं॥ ततो नमतं महाभागं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कुतोऽध्यमेषि दुर्लभः ॥४॥ पूज्य तं हर्षसंयुक्तः पप्रच्छ विनयान्वितः ॥ वद योगं महायोगी
न्द्र शांतिदं योगिनां मतं ॥५॥ याज्ञवल्क्य उवाच ॥ पंचचित्तमयी बुद्धिः संयोगा
योगरूपिणी ॥ तस्यां भ्रांतिप्रदा सिद्धिर्नाना सिद्धिप्रदर्शिनी ॥६॥ तत्र बिंबं गणेशा
स्वपतिं मोहधारकं ॥ बिंबभावं परित्यज्य ब्रह्मभूतो भविष्यसि ॥७॥ तदर्थं वक्रतुं
डस्याराधनं कुरु सर्वदा ॥ तेन शांतिसमायुक्तो भविष्यसि न संशयः ॥८॥ बिंबमा
यायुतं प्रोक्तं मोहितं सिद्धिबुद्धिगं ॥ तद्भावं हंति तुंडेन तेनायं वक्रतुंडकः ॥९॥ मा
यास्वरूपं नराकारं तस्वादकं परं सुखं ॥ ब्रह्म तयोः समायोगे वक्रतुंडोऽयमुच्यते ॥
॥१०॥ कंठाधो मायया युक्तो मस्तकं तद्विवर्जितं ॥ वक्राख्यं तस्य विघ्नेश तेनायं वक्र
तुंडकः ॥११॥ अनेनार्थेन संयुक्तं वक्रतुंडं भजस्व च ॥ तेन शांतिसमायुक्तो गाणप

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

११० ष्यो भविष्यति ॥१२॥ एवमुक्त्वा ययौ योगी यास्तु वन्यो महायशाः ॥ कुष्ठो ह
र्षसमायुक्तो वक्रतुंडपरो भवत् ॥१३॥ ततः स्वल्पेन कालेन शांतिं लेभे महामुनिः ॥
गाणपत्यस्वभावेन भजनं वक्रतुंडकं ॥१४॥ वत्सो नित्यं महायोगी वक्रतुंडं चरि
त्रगं ॥ स्तोत्रं पपाठ भक्त्या समो दूरं लक्षं स्फ हावेन ॥१५॥ तस्य गेहे कदाचित्तु जगाम
श्लसंयुतः ॥ भगंदरयुतः पापी द्विज आंगिरसोद्भवः ॥१६॥ दुःखयुक्तो नमास्या
सौ कुष्ठसंयोगविदां वरं ॥ स्नात्वा स्वस्वाप विप्रेन्द्रं तस्याग्रे ध्येति दुःखितः ॥१७॥
कुष्ठो गणेश्वरं स्तुत्या पठन् वक्रतुंडगं ॥ चरितं सो पि स्फ श्रावी नायासेन गृहे स्थि
तः ॥१८॥ संपूर्णे संस्कृते न च रोगहीनो बभूव ह ॥ तं प्रणम्य ययौ स्थानं स्वकीयां
गिरसोद्भवः ॥१९॥ भुक्त्वा सविविधान् भोगान् जगाम तेन गणेश्वरं ॥ आंगिरसो ११६

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्याख्यानं परस्य शौनकेन नमः॥२०॥ एवं नानाजना सिद्धिं ययुः श्रवणमात्रतः॥ वक्रतुंडच
रित्रस्य मौद्गलस्य महात्मनः॥२१॥ तत्र वक्तितले ब्रूयां मया वक्तुं न शक्यते॥ अतः संक्षेपतः
प्रोक्तं मया ते ऋषिसत्तम॥२२॥ इति श्रीमदांत्ये नवमे ० वक्रतुंड खंड महात्म्यं नामै
कविंशो ध्यायः॥३१॥ सूत उवाच॥ पिप्पलादः पुरा कश्चिद्ब्राह्मणो ब्रह्मणो नमः॥ स
शैवमार्गसंयुक्तो भजनं तेन सा करं तदा॥१॥ गौतमीतीरसंस्थः स कर्मेणा योगिसंमतः।
ब्रह्मवसहमे संस्थः स्वाधीनता परायणः॥ २॥ ततो वेदार्थजं योगं ज्ञात्वा शांतिं पर
परं॥ सहजं मोहहीनं तं दृष्ट्वा दुःखयुतोऽभवत्॥३॥ जगाम गौतमं विप्रो ननाम भ
क्तिसंयुतः॥ पप्रच्छ योगज्ञं त्वर्थमुपायं ब्रह्मदं परं॥४॥ हृष्टः सगौतमो विप्रं जगा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अपहृत्य रितं तस्य तस्माल्लब्धोपसृत्य कृतः ॥१२॥ नव पल्ली स्थितानां च विलासांश्च भावचरितं ॥ ज्वरयुक्तो महाभाग
ज्वरस्थो नावभूद्बहु ॥१३॥ हस्तेन गणनाथं तु अगाम चरितं अवातू ॥ तं ह द्वाब्रलम्भ तासावनवचितनमद्भुतं ॥१४॥ एव
मेकरदस्यैव चरितं सेवनेन च ॥ अव लोनन नानायोगिलम्भ नावभूव विरे ॥१५॥ तेषां न पूज्य तेव तुच चरितं केनाचिन्मुने ॥

११८ रच्चैकदंतकं ॥ ब्रह्म तस्यैव भतया तं शांतियोगमवाप्स्यसि ॥५॥ यस्य मायाविका
रैश्च संयुक्तं मुनिसत्तम ॥ मायया सह विद्धि नं देहं सर्वब्रह्मवाचकं ॥६॥ मायाहीनं
स्थितं यत्तु मायिकं वा द्विजोत्तम ॥ दंतसंज्ञं विजानीहि परस्य वेदविचक्षणाः ॥७॥
तयोर्योगे गजो ज्ञान एकदंत इति स्मृतः ॥ तं भज स्वविधानेन शांतियुक्तो भविष्य
सि ॥८॥ एवमुक्त्वा महायोगी गौतमो विरराम ह ॥ पित्रा लाद श्रुत्वा तं नत्वा ययौ स्व
स्याश्रमं परं ॥९॥ तत्रस्थ एकदंतं सो भजन् भक्तिसमन्वितः ॥ गणेशकृपया विप्रो
योगशांतियुतोऽभवत् ॥१०॥ ततोऽभिलषं महाविप्र एकदंतं चरित्रकं ॥ अपठन्मौ
द्गलं संस्थं गाणपत्यस्वभावगः ॥११॥ कस्मिंश्चित्समये योगी प्रजंत्वेकदंतकं ॥१२॥
पि

अतः संक्षेपतः प्रोक्तं सर्वसिद्धिप्रदायकं ॥ २१

११८

इति श्रीमदांत्ये मौद्गले॰ नवम॰ खं॰ एकदंतचरित्रे माहात्म्यश्रवणं नाम द्वात्रिंशोध्यायः
॥३२॥ श्रीग॰ सूत उवाच॥ माध्यंदिनिर्महाभागो मुनिः सर्वार्थकोविदः॥ स्वधर्मनि
रतो नित्यं नानातपोबलान्वितः॥१॥ स शांत्यर्थं जगामैव व्यासं सर्वज्ञमुत्तमं॥ तं प्रण
म्य महाभागं पप्रच्छ विनयान्वितः॥२॥ माध्यंदिनिरुवाच॥ शांत्यर्थं किं नरैः कार्यं तन्मे
वद महामते॥ येन योगयुताः सर्वे ब्रह्मभूता भवंति वै॥३॥ व्यास उवाच॥ संयोगा
योगयोर्योगे ब्रह्मभूतो नरो भवेत्॥ तत्र शांतियुतो भावी सा शांतिः सर्वसंमता॥४॥
स एव गणनाथस्तु महोदर इति श्रुतः॥ तं भजस्व विधानेन ततः शांतिमवाप्स्यसि॥५॥
संयोगायोगरूपं संस्तयोरुदरगाः परं॥ भुनक्ति सकलान् भोगांस्तेन महोदर
स्मृतः॥६॥ ब्रह्मसु ब्रह्मसौख्यं यद्भोगरूपं प्रकीर्तितं॥ भुक्तो भोगस्थितो यत्र तत्र देव

११९ जठरं स्मृतं ॥७॥ जगतां ब्रह्मणां विप्र जठरे संस्थितः सदा ॥ गणेशो योगरूपो वै
तस्योदरे न कोपि नु ॥८॥ तेन महोदरः प्रोक्तो वेदेषु गणनायकः ॥ एकस्तं भज भक्त्या
वै तया शांतिमवाप्स्यसि ॥९॥ एवमुक्तो महायोगी व्यासो योगींद्रसत्तमः ॥ विररामस
तेन त्वा स्वमाश्रमं जगाम च ॥१०॥ महोदरचरित्रं समौद्गलस्तं विशेषतः ॥ सेव्य यो
गपरो भूत्वा भजतं तु महोदरं ॥११॥ तस्मै तुष्टो गणाधीशो ददौ योगं सुशांतिगं ॥ त
तः शांतिं सुतो नित्यमभजद् गणनायकं ॥१२॥ महोदरचरित्रं यद् पठन्नित्यमाद
रात् ॥ महायोगी स्वयं तत्र स्थापयामास विघ्नपं ॥१३॥ कदाचिद् गणराजं स पूज
यित्वा पपाठ यत् ॥ महोदरस्य माहात्म्यं तत्पवित्रं खगेश्वर हे ॥१४॥ मंडुको देवयोगेन
शुश्राव स्नानसंयुतः ॥ निर्माल्ये संस्थितस्तत्र भयभीतः समंततः ॥१५॥ ततो ११९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

बहुगते काले महतंतं कुत्र चित्स्थले ॥ मंडुकं च समानेतुमगमन्नागपापमुदा ॥
१६ ॥ तं गृह्य ब्रह्मभूतं ते चक्रुरेकत्र वासरं ॥ पाठस्य पश्य विप्रेंद्रा महात्म्यं परमा
द्भुतं ॥ १७ ॥ एवं नाना जना विप्र महोदरचरित्रकं ॥ संसेव्य भुक्त्वा भोगांस्ते भवन् ब्र
ह्ममया मता: ॥ १८ ॥ इति श्रीमदांत्ये मौद्गले॰ न॰ यो॰ महोदरचरित्रश्रवणमहा
त्म्यवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ २३ ॥ सूत उवाच ॥ आश्वलायनवंशस्थो ब्रा
ह्मणः सत्कृतिः पुरा ॥ नाम्ना स्वधर्मनिष्ठः स ब्रह्मज्ञानपरोऽभवत् ॥ १ ॥ नानायो
गक्रमेसक्तः शमदमपरायणः ॥ चचार योगचर्यां तामंते सहजगोऽभवत् ॥ २ ॥
तत्र स्वाधीनतां दृष्ट्वा विस्मितः श्रयये स्वयं ॥ स्वगुरुं तं प्रणम्यादौ पप्रच्छ योगमुत्तमं ॥ ३ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कुरुविरुवाच ॥ वदयोगं महायोगी नृणां शांतिदं सर्वभावनः ॥ अस्माकं नेपराकाष्ठा गुरु
र्वेद्याधरः प्रभुः ॥ ४ ॥ आश्वलायन उवाच ॥ येलेन कथितो योगो महां शांतिप्रदः परः ॥ तत्ते
हं कथयिष्यामि ब्रह्मभूत प्रदायकं ॥ ५ ॥ चित्तं पंचविधं त्यक्त्वा हं ब्रह्मेति प्रबोधनः ॥ सरसं
तेन शांतिस्थो भविष्यसि न संशयः ॥ ६ ॥ सरसं चित्तकं यस्मात् संभूतं तन्मयं मतं ॥ अं
तेयत्रगतं त्वं च गजं जानीहि मानद ॥ ७ ॥ तदेव आननं यस्य तं भज स्वविधानतः ॥ गजान
नं स्मृत्वा शांतिस्थो भविष्यस्य धुना मुने ॥ ८ ॥ एवमुक्त्वा महाविप्र आश्वलायन आदरात् ॥
तूष्णीं स्थितः स तं नत्वा मयो स्वस्याश्रमं पुनः ॥ ९ ॥ गजाननपरो भूत्वा भजंतं नित्यमाद
रात् ॥ गजाननेन चरित्रं सोपलब्धो ब्रह्मसंस्थितं ॥ १० ॥ तेन तुष्टो गणाध्यक्षो ददौ योगप्र
शांतिदं ॥ सुरुचये स्वभक्ताय भक्तवांछाप्रपूरकः ॥ ११ ॥ ततस्तेन रहस्यं यत्रानु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वेदसमुद्भवं॥ ज्ञानं गजाननाख्यं न संस्थितं ब्रह्मणोदितं॥१२॥ गच्छंति यत्र सर्वाणि वि-
श्वानि ब्रह्मकानि तु। योगरूपेण तेनायं गच्छति गः स उच्यते॥१३॥ सर्वेषां ब्रह्मणां सो क-
म्रग्वेदं सारगं परं॥१॥ तदेव गश्च विज्ञेयो नाम्नि गजानने मुने॥१४॥ जायंते विविधान्ये-
व ब्रह्माणि विश्वकानि च॥ यस्मादजः स जःख्यातः एक महितीयात्मकः॥१५॥ आदि-
मध्यांतभावेषु यादृशां तादृशां भव॥ ब्रह्मयजुषि संप्रोक्तं गजानने स जः स्मृतः॥१६॥ पं-
चचित्तमयं सर्वं नाशवान्नात्र संशयः॥ नष्टं नकारगं विद्यात्समं तादृश वत्तत्र वै॥१७॥
नष्टभावेषु यस्तिष्ठेदा समं तान देवयत्॥ ब्रह्मसाम्नात्समाख्यातं मनो गं जानने स्थि-
तः॥१८॥ पंचचित्तमयं सर्वं नष्टं ज्ञात्वा यमं जसा॥ तदेव योगभावेन ब्रह्मरूपं प्रकी-
र्तितं॥१९॥ अथर्वणा समाख्यातं महमात्मानसंशयः॥ अज्ञानेन विनाशात्स्योग

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१२१ जाननेसन्नः स्मृतः ॥२०॥ एतत्फलं स्कन्दवेद्यश्च सारं चतुर्थे ईरितं ॥ गजानन नाम
हा विघ्नश्चतुर्वेदात्मकः स्मृतः ॥२१॥ एवं गजाननं ज्ञात्वा भजते स्कन्दरूपिः सदा ॥ अपठत
स्य महात्म्यं तत्र चित्रं बभूव ह ॥२२॥ कपोतो वृक्षसं स्थः कश्चिदावनजश्चरित्रकं ॥
सरोगसंयुतः पापी रोगहीनो बभूव ह ॥२३॥ अंते गजाननं गत्वा ब्रह्मभूतो भवन्मुदा ॥
अज्ञानश्रवणेनैवालः किं वदामि तत्फलं ॥२४॥ एवं नानाजनाद्याश्च स्वं उं गजानना
त्मकं ॥ श्रुत्वा पठित्वा भुक्त्वांते भोगान् ब्रह्म पलेभिरे ॥२५॥ इतिश्रीमदांत्ये मौद्गले म
यो॰ गजाननचरित्रश्रवणमाहात्म्यवर्णनं नाम चतुस्त्रिंशोध्यायः ॥३४॥ सूत उवा
च ॥ भार्गवः कपिलो नामा सर्वशास्त्रविशारदः ॥ कपिलो वरदानेन समुत्पन्नः स्व
धर्मवित् ॥१॥ नानातपः समायुक्तो योगनिष्ठो बभूव ह ॥ तदर्थं श्रुतकं सोपि जगाम वि १२२

नयान्वितः॥२॥ तं प्रणम्य महात्मानं स्थितआर्जवसंयुतः॥ कदाचित्तं महाभागं
पप्रच्छ पितरं मुदा॥३॥ कपिलउवाच॥ योगं शांतिप्रदं नाथ वद ब्रह्मणि तन्मयं॥ त्व
न्नो गुरुः समाख्यातस्तारय स्वभवार्णवात्॥४॥ शुनकउवाच॥ विघ्नानि विद्धि तं यो
गं ब्रह्मणि निःसृतानि च॥ यदाधारेण वर्त्तंते गच्छंति यत्नदात्मनि॥५॥ तदेव यो
गदं ब्रह्म लंबोदरप्रवाचकं॥ तस्माद्दूरे स्थितं ब्रह्म विघ्नं भज त्वं सदा॥६॥ तेन शां
तिसमायुक्तो ब्रह्मभूतो भविष्यसि॥ नान्यथा त्वं महाभाग सिद्धिबुद्धिविमोहितः
॥७॥ एवमुक्त्वा महायोगी शुनको विरराम ह॥ तं प्रणम्य ययौ सोपि स्वाश्रमं हर्षसं
युतः॥८॥ लंबोदरचरित्रं समोद्गलस्तं जजाप ह॥ नित्यं पूज्य गणेशानं भक्ति
परायणः॥ तेन तुष्टो गणाधीशो ददौ योगं सुशांतिदं॥ कपिलाय स्वभक्ताय स

१२२ क्त्वा तस्य प्रकारणात् ॥१०॥ शांतियुक्तस्वयं योगी जजाप तं चरित्रकं ॥ नित्यं प्रजा
परो भूत्वा लंबोदरसमीपगः ॥११॥ तत्र चित्रं कदाचिद्वै बभूव शृणु शौनक ॥ बलिव
र्द्दः स्थितः कश्चिद्रोगाप्लुतः पपात ह ॥१२॥ शुश्राव तच्चरित्रं स संपूर्णं स्नानहीनतः ॥
सद्यैव रोगनिर्मुक्तो बभूव हर्षसंयुतः ॥१३॥ नाजानं स्तन्म हत्पुण्यं बलिवर्द्दः कदाच
न ॥ कालेन समृतस्तत्र ब्रह्मभूतो बभूव ह ॥१४॥ एवमज्ञानतो वापि ज्ञानतो विवि
धा जनाः ॥ ब्रह्मभूता बभूवुश्च वै कुंभयानत्रा कथ्यते ॥१५॥ इति श्रीमदांत्ये मौद्गले॰
न॰ मो॰ लंबोदरचरित्रश्रवणमाहात्म्यं नाम पंचत्रिंशोध्यायः ॥३५॥ सूत उवाच ॥
अश्वत्थामा महाभागो द्रोणपुत्रः प्रतापवान् ॥ कृपेण मातुलेनैव जगाम वन
मुत्तमं ॥१॥ भारते संस्थितं सारं ज्ञात्वा तत्त्वमुखाच्छ्रुतं ॥ बुद्धेः परतरं ब्रह्म १२२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्रैव लालसो भवेत् ॥२॥ बुद्धिपतेर्गणेशस्य हृदि ज्ञानं कथं भवेत् । परिपूर्णानन्दर्थं
सगौतमं शरणं ययौ ॥३॥ कपस्तं विनयेनैव प्रणम्य संस्थितो भवेत् ॥ सेवार्थं लगि
नीयेन संयुक्तः परमार्थवित् ॥४॥ कदाचिद्योगिनां मध्ये गौतमः संस्थितो भवेत् ॥
कथयामास योगं स शान्तिदं योगसेवया ॥५॥ तत्र हर्षेण संयुक्तो ध्यात्मा विनयान्वि
तः ॥ पप्रच्छ कपया युक्तः संशयस्यापनुत्तये ॥६॥ अश्वलोमा उवाच ॥ योगशास्त्र
र्थमानन्दात् कस्योपासनकं चरेत् ॥ योगरूपस्य योगीशावद सर्वज्ञ ते नमः ॥७॥ गौ
तम उवाच ॥ गणेशोपासनं मुख्यं पूर्णशान्तिप्रदायकं ॥ योगाकारः स वै वेदे नर
गजमयस्त्वतः ॥८॥ पंचचित्तात्ममोहेन तेन सर्वं विमोहितं ॥ न जानाति परं भावं योग
दं गणनायकं ॥९॥ स मोहं चित्तमुत्सृज्य स्वयं चिन्तामणिर्भवेत् ॥ तस्माद्विकट भक्त्या

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

१२३ स लभ्यते विकटः प्रभुः॥१०॥ पंचचित्तमयं यत्तस्माद्विकटश्चावतः॥ अमंयत्क
स्वचित्तस्थं सजस्वत्तं गजाननं॥११॥ तच्छ्रुत्वा विस्मिताः सर्वे मुनयस्तं प्रणम्य च॥ स्व
स्वाश्रमं समागत्य विकटभजने रताः॥१२॥ अश्वत्थामा कृपश्चैव तं प्रणम्य महामतिं॥
स्वस्वाश्रमं समागत्य विकटभजने रतौ॥१३॥ मौद्गलस्थं चरित्रं तौ विकटस्य महा
त्मनः॥ पपाठतुर्महद्भक्त्या नित्यं संपूज्य गणेश्वरं॥१४॥ ततः स्वल्पेन कालेन सं
तुष्टो विकटोऽभवत्॥ ददौ योगं स ताभ्यां वै पूर्णशांतिप्रदायकं॥१५॥ तथापि
तौ महाभागौ पाठं चक्रतुरादरात्॥ विकटस्वं उकस्ये च विकटं पूज्य नित्यदा॥
१६॥ एकदा पाठसंयुक्तौ बभूवतुर्द्विजोत्तमौ॥ तत्र श्वानः कृपस्याग्रे स्वश्चाव
संस्थितो महत्॥१७॥ अश्वत्थाम्नश्च मार्जारः शुश्राव समुपस्थितः॥ तौ रा

१२३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गायैर्विहीनौ च जातावशौ नतः श्रवाकू॥१८॥ अतःस्वानं दगौ जातावेकश्रवणपुण्य
तः॥ अतः किं महिमानं ते कथयामि सुपारकं॥१९॥ अश्वत्थामा कृपश्चैव स्वस्वांशे संग
तौ मुदा॥ अंते योगयुतौ विघ्नादिकठभजनेरतौ॥२०॥ शौनक उवाच॥ योगयुक्तौ कथं
स्कंद स्वांशे रागौ बभूवतुः॥ गणेशो न तदाकारौ महच्चित्रं वदस्व मां॥ स्कंद उवाच॥ दे
वाः कलांशांशाशेन भूभारहरणाय ये॥ भवंति मानवाध्यास्ते नानासामर्थ्यसंयुता॥
२२॥ दुःहपापं यदा कृत्वा गच्छंति यमपं मृताः॥ पतंति नरके घोरे यथा दशारथादयः॥
२३॥ अथवा पुण्यमुग्रं ते कृत्वांते स्वर्गगामुदा॥ भवंति भोगसंयुक्ता यथा रामोयुम
स्तुले॥ २४॥ भवंति योगयुक्तास्ते यदा स्वस्यांशगास्तदा॥ तदाकारा गणेशा
नं कल्पांते संगता मुदा॥ २५॥ यथा विदुरकः सद्यः कौरवो यमदेहगः॥ यमाका

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

 रोगणेशानमभक्तिसंयुतः ॥२६॥ अंते योगसमायुक्तो यमः परमपावनः ॥ ययौ
गणेश्वरं विप्र ब्रह्मभूतः स्वभावतः ॥२७॥ एतत्ते कथितं पूर्वचरितं श्रवणात्मकं ॥ वि
कटस्यैव खंडस्य सर्वसिद्धिप्रदायकं ॥२८॥ एवं नानाजना पापाः कृत्वा खंडमहद्भु
तं ॥ विकटस्य स्फुरं भुक्त्वा ब्रह्मभूता बभूविरे ॥२९॥ इति श्रीमदांत्ये मौद्गले॰ न॰
यो॰ विकटखंडे श्रवणमहात्म्यनाम षड्विंशोध्यायः ॥२६॥ सूत उवाच ॥ विश्वी
षणो महाभागो ॐकां ज्ञात्वा स्फुहृद्गतः ॥ रामं पूज्य स्वयं नित्यं भक्तियुक्तो भजेत्परं ॥
॥१॥ तत्राद्देगणनाथस्य पूजनं वेदसंमतं ॥ किंचार्थविस्मितः सोपि दुःखयुक्तो ब
भूव ह ॥२॥ मनसि धारयामास गणेशं ब्रह्मनायकं ॥ सर्वपूज्यगणेशस्योच्छिष्ट
भुंजो भरात्परान् ॥३॥ कदाचित्तत्र योगीन्द्रो नारदः स्वेच्छयागतः ॥ तं प्रणम्य प्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रज्येवपप्रच्छ हृत्स्थितं परं ॥४॥ वसिष्ठ उवाच ॥ गणेशो ह्यस्ति सोंकारादेवादि
ष्णुमुखा मुने ॥ अग्रपूज्यप्रभावत्वाद्यत्वं वेदसंमतं ॥५॥ नारद उवाच ॥ ब्रह्माकाराः
शिवाद्याश्च नानायोगप्रचारकाः ॥ ब्रह्माण्यन्नमुखान्यैर्वेदेषु कथितं बुधैः ॥६॥ तेषां व३
स्वामि गणेशानो ब्रह्मणस्पतिसंज्ञकः ॥ ब्रह्मणां पालकोभावाद्दैपालि विन्नस्य भावतः ॥
॥७॥ तेषां योगप्रदानार्थं देहधारि बभूव ह ॥ गजाननादिचिन्हैः स संयुक्तो ब्रह्मरूप
कैः ॥८॥ विघ्नासन्नात्मका ये वा तेषां स्वामी गजाननः ॥ विघ्नैः सर्वान्मदर्थं वै खेल
ति योगरूपधृक् ॥९॥ ब्रह्माणि विघ्नयुक्तानि भवंति राक्षसाधिप ॥ सत्यसंकल्पहीना
नि मदानमयभजन्परं ॥१०॥ पराधीनं स्वसत्ताकं च सर्वं जानाति नित्यदा ॥ स्वकीयं चेतनः
श्रीगणेशो जायते परः ॥११॥ ददाति योगमुख्यं स्वगणेशास्तेभ्य आदरान्नृ ॥ तदा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१२५ विघ्नाविहीना निभवंति वीर्यवंति तु ॥१२॥ अतोगणेश्वरः पूर्वः सर्वेषां पूज्यतां गतः।
सर्वादि पूज्यतां वेदे स्ये हि राजप्रमाणतः ॥१३॥ एवं विघ्नेश्वरं नित्यं भजस्व शांतिदायकं॥
रामः स एव विघ्नेशः कलौ चो नन संशयः ॥१४॥ गणेशाभजनेकस्य व्यभिचारो भवेन्न
वै॥ समूहानां पतित्वात् समूहा विष्णुमुख्यकाः ॥१५॥ एवमुक्त्वा महायोगी नारदो ग
तः पंस्मरन् ॥ ययौ सोपि महा बुद्धिं विचार्य गणपे रतः ॥१६॥ विघ्नराजस्य खंडं स प
पाठ मोद्गले स्थितं ॥ नित्यं शक्ति समायुक्तः पूजयन्गणनायकं ॥१७॥ ततः शांति स
मायुक्तो विज्ञी वणो बभूव ह॥ गणेशा मनसं नित्यं राम्नैक्य मार्गतः परं ॥१८॥ एकदा
राक्षसाधीशो जगाम सेतुबंधनं ॥ महोदरं प्रपूज्यैव तत्र खंडं पाठमाकरोत् ॥१९॥
तत्रैका जले संस्कृता भु श्राव खंड मुत्तमं॥ विघ्नराजस्य तेनैव सुखयुक्तो बभूव

१२९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हा॥२०॥एतस्मिन्नंतरे तेन सर्पेणासाध्वताभवत्॥अस्तामस्मारगाणोश्चौर्निता स्वानंदके
पुरे॥२१॥सोऽकिंरद्यध्रमलभृतां चकुर्हर्षसमन्वितः॥एवमज्ञानतः पूर्वं विघ्नेशाच
रितो ध्रुवं॥२२॥नानाजनाद्यो विप्रश्च तत्रावरखंडं ययुर्मुदा॥स्वानंदंभुक्तेभागाग्रव
कुं मया नत्राक्यते॥२३॥इति श्रीमदांत्ये मौद्गले० न-यो विघ्नराजखंडश्रवणचरित्रं
नाम सप्तत्रिंशोऽध्यायः॥३७॥सूतउवाच॥वरतंतुर्मुनिश्रेष्ठो नानातपपरायणः॥
शांतिं न तपसा लेभे ततः खेदयुतोऽभवत्॥१॥नश्वरं विश्वमेवं स ज्ञात्वा अलपरोऽभ
वत्॥तत्राजगाम योगस्थो विश्रवा मुनिसत्तमः॥२॥तं दृष्ट्वा त्वाययविप्रेच्यं प्रणना
म [illegible] पुपूजह॥सोऽप्यपृच्छ हर्षेण युक्तः परमपावनं॥३॥वरतंतुरुवाच॥त्वंसा
क्षाद्योगिनां वंद्यः पावनार्थं समागतः॥महापुण्येन ते पादपद्मं दृष्टं मया प्रभो॥४॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

योगं शांतिप्रदं ब्रूहि येन शांतो भवाम्यहं ॥ नश्वरं सर्वमुत्सृज्य तदर्थं लालसो धुना ॥५॥
विश्रवा उवाच ॥ ब्रह्मज्ञानं विना तात न शांतिं लभते नरः ॥ ब्रह्म नानाविधं प्रोक्तं वेद
षु वेदवादिभिः ॥६॥ तेषां पतिगणाधीशं ब्रह्म पास्यति संज्ञितं ॥ तं भज त्वं विधाने
न तदा शांतो भविष्यसि ॥७॥ विश्वं वपुः शिरो ब्रह्म गजं योगेन योभेनः ॥ सिद्धिबुद्धिप
तिः साक्षात्स्वानंदवासकृत्परः ॥८॥ वर्णाधूम्राधिनायश्च मनसा मुनिसत्तम ॥ तेन
धूम्राक्षरः प्रोक्तो ब्रह्मभूतप्रदायकः ॥९॥ धूम्रवर्णं गणाधीशं भज यत्नेन मानद ॥
तस्यैव भजनं कृत्वा शांतिं प्राप्तोहमुत्तमां ॥१०॥ नान्यथा पूर्णशांतिं तु लभते को
पि निश्चितं ॥ वेदादिभिर्मुनींद्रैश्च देवाद्यैः परमं प्रभुं ॥११॥ पुलस्त्येनोपदिष्टोहं ना
नायोगपरायणः ॥ त्यक्त्वा ब्रह्मापितस्मिन्निष्ठो भव सदा नसंशय ॥१२॥ एवमुक्त्वा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

महायोगी विश्रवाः स्वंस्कृत्यं ययौ ॥ वरतंतुर्द्विचार्यं वगणेशभजनेरतः ॥ स्वंद्मौद्गल
संस्कं सधूम्रवर्णात्मकं परं ॥ जजापनित्यमानंदास्तद्ज्यविघ्नेश्वरं परं ॥ १४ ॥ दर्प
शांतिपुत्तोजातोयोगींद्रः सर्वपारगः ॥ गणेशरूपयानित्यमभजद्दूपनायकं ॥
॥ १५ ॥ एकदातीर्थसंस्थः सधूम्रवर्णं पुपूजह ॥ तस्याग्रे नित्यगंपाठं चकार धौम्रव
र्णकं ॥ १६ ॥ तत्रकाकः स्थितः कोपि वृक्षशाखापरायणः ॥ भूलयुक्तः सशुश्राव
धूम्रवर्णचरित्रकं ॥ १७ ॥ सद्योवभूलहीनः सबभूवहर्षसंयुतः ॥ उडीयप्ययौत
स्माद्वृक्षात्स्वेच्छापरायणः ॥ १८ ॥ अंतेगजेश्वरंगत्वा ब्रह्मभूतोबभूवह ॥ अज्ञाने
श्रवणात्पुण्यंपत्यः किंकथयाम्यहं ॥ १९ ॥ एवं नानाजनाः श्रुत्वाधूम्रवर्णच
रित्रकं ॥ ब्रह्मभूताबभूवुस्तेभुक्त्वाभोगान्विशेषतः ॥ २० ॥ तेषुकिंतन्महावि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

प्रकथ्यते तन्न शक्यते ॥ अतः संक्षेपतः प्रोक्तं श्रवणस्य चरित्रकं ॥२१॥ इति
श्रीमदांत्यमौद्गले॰ न॰ म॰ यो॰ धूम्रवर्णचरित्रश्रवणमहात्म्यं नामाष्टत्रिंशोध्या
यः ॥३८॥ सूत उवाच ॥ प्रल्हादो नाम विख्यातो योगी योगपरायणः ॥ मयूरेशं
समाश्रित्य भजतं भक्तिसंयुतः ॥१॥ स्वप्ने ददर्श देवेशं मयूरोपरि संस्थितं ॥ सिद्धि
बुद्धिसमायुक्तं गजास्यं भक्तिवत्सलं ॥२॥ तं प्रणम्य ननर्तासौ सास्रुनेत्रो महायशाः
॥ तं जगाद मयूरेशो वरं यस्व वरान्परान् ॥३॥ स तं प्रणम्य विघ्नेशं जगाद हर्षसं
युतः ॥ योगं शांतिप्रदं देहि भक्तिं नेनिलरां प्रभो ॥४॥ तस्य तद्वचनं श्रुत्वा जगाद तं ग
जाननः ॥ मौद्गले नवमं खंडं पठन्य योगप्रदायकं ॥५॥ तेन योगींद्र वंद्यस्त्वं भविष्यति
महामते ॥ भक्तिर्मे भाविता तेतु दृढा संहर्षभावतः ॥६॥ एवमुक्त्वांतर्दधे सौम्य

पूरेव्योम हामतिः॥ जजागरा सवत्सोपि स्मृत्वास्वजनं स्कृविस्मितः॥ ७॥ तेनैतो मोद्भूल
जं योगमलभत्तत्प्रसादतः॥ ततोति हर्षसंयुक्तो भजेतं नवधा प्रभुं॥ ८॥ संस्तुं स
खंडं योगात्मकं परं॥ नवमं लिख्यं भक्त्या तं पपाठ नित्यमादरात्॥ ९॥ [redacted]
क्षेत्रसंन्याससंयुक्तो निस्सभक्तिसमन्वितः॥ पपाठ पाठकं पूर्वो नवमं मोद्भूलेख्यि
तं॥ १०॥ कदा दैत्येंद्रमुख्यश्च बभ्रुवसिंधुसंज्ञितः॥ क्षेत्रेमूर्तिगणेशास्य खंडध्या
मासंस्थितां॥ ११॥ सिंधोश्च प्रतिमां तत्रस्थापिता दैत्यपैः पुरा॥ प्रल्हादो दुः
खसंयुक्तो दृष्ट्वा बभ्रुवशौनक॥ १२॥ क्षेत्रवासिजनानां सर्वे त्यक्त्वा क्षेत्रं भयंकरं॥
पपलुर्भयसंयुक्ता यत्र तत्र स्कुदुःखिनः॥ १३॥ प्रल्हादो योगिवंद्यः सक्षेत्र
संन्यासभक्तितः॥ उपोषणपरो भूत्वा तिष्ठत्तत्रैव नित्यदा॥ १४॥ मानसी मक

१२८ रोतत्रप्रजां विघ्नेश्वरस्य सः ॥ तस्योच्छिष्टं भुजेनैव मनसा भक्तिसंयुत ॥१५॥ तस्य
दृढाग्रहं दृष्ट्वा मयूरेशो मुतं सदा ॥ स कनालुस्तुष्टं कृत्वा तोषयामास तेन तं ॥१६॥
एवं बहुगते काले ह्रिव पुत्रो बभूव ह ॥ मयूरेशो वधार्थाय सिंधोर्देवर्षिभिः स्तु-
तः ॥१७॥ स समागत्य सिंधोश्च खंडयामास मूर्तिकां ॥ तत्रस्थास्तु यमेवं तु निवा-
समकरोत्प्रभुः ॥१८॥ दृष्ट्वा तं पूजयामास प्रल्हादो योगिनां वरः ॥ पारणं स च का-
रैव हर्षनिर्भरमानसः ॥१९॥ प्रत्यक्षं गणराजस्तं प्रसन्नो वरदो भवत् ॥ स च ब्रह्मस-
न्निधानस्थो भजामि त्वां तथा कुरु ॥२०॥ ततोति हर्षसंयुक्तो मयूरेशो प्यकारह ।
सदाक्षेत्रनिवासस्थं गणं ब्रह्मप्रियाख्यकं ॥२१॥ अन्यच्च शृणु विप्रेश विश्वामित्रो
महामुनिः ॥ चकार मौद्गलस्यैव पारायणं सुभक्तितः ॥२२॥ स रटस्तत्र दृष्टस्तु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भुक्त्वा वा ज्ञानभावतः ॥ ज्वरयुक्तः कदाचिद्वै नवमं खंडमुत्तमं ॥२३॥ सद्य एव ज्वर
हीनः स बभूव पुण्यगौरवात् ॥ यथेष्टं विषयान्भुक्त्वांते स्वानंदे गतोऽभवत् ॥२४॥
तत्र गणेश्वरं दृष्ट्वा ब्रह्मभूतो बभूव ह ॥ एवं नानाजना ब्रह्म लेभिरे खंडसंश्रवा
त् ॥२५॥ तेषु कति ब्रुवाम्येव वक्तुं केन न शक्यते ॥ भुक्तिमुक्तिप्रदश्चायं खंडो न
वमसंज्ञितः ॥२६॥ इति श्रीमदांत्ये मौद्गले • नं० यो० • नवमखंडश्रवणमहात्म्यं ना
मैकोनचत्वारिंशोऽध्यायः ॥ ॥ अयं नैकथितः पूर्णः खंडो योगात्मकः परः ॥
नवमः सर्वदः साक्षात्संपूर्णयोगदायकः ॥१॥ एकस्य श्रवणेनैव खंडस्यास्य
महामते ॥ संपूर्णमौद्गलस्थं यत्फलं प्राप्नोति मानवः ॥२॥ तत्राकथयते मया विप्र
महात्म्यं खंडसंभवं ॥ पूर्णयोगपतिः पूर्णो वर्णितो गणनायकः ॥३॥ चतुर्वेदमयं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१२० पुण्यं श्रवणेन भविष्यति ॥ सांगैः साधनकैश्चास्य खंडस्य नात्र संशयः ॥ ४ ॥ अष्टा
दश पुराणानि तथोपमयकानि यः ॥ शृणुयात्स नरस्तस्मादानंत्यमस्य संभवात् ।
॥ ५ ॥ शास्त्रं ब्रह्ममयान्नाना शास्त्राणि निःसृतानि तु । तेषां श्रवैतोऽनंतुरस्य लभेद् ग॰३
नंतकं ॥ ६ ॥ तीर्थानि सकलान्येव यः कुर्याद्विधिसंयुतः ॥ तेभ्योनंतगुणं पुण्यम
स्य श्रवणतो लभेत् ॥ ७ ॥ क्षेत्राणि विविधान्येव यः कुर्याद्भक्तिसंयुतः ॥ तेभ्यो
स्य श्रवणेनैव लभेदसंख्यगं फलं ॥ ८ ॥ दानानि विविधान्येव यः कुर्यान्मानवो
त्तमः ॥ अस्य श्रवणमात्रेणानंतं तेभ्यः फलं लभेत् ॥ ९ ॥ यज्ञान् कुर्याच्च संपूर्णा
न् यथाशास्त्रप्रमाणतः ॥ तेभ्योनंतफलं प्रोक्तमस्य श्रवणमात्रतः ॥ १० ॥ इ
ष्टापूर्तादिकान्येव नानासत्कर्मकानि यः ॥ प्रकुर्यात्स नरस्तेभ्यो नंतं फलं लभे

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ध्रुवात् ॥११॥ बहुनात्र किमुक्तेन नानेन सदृशो भवेत् ॥ साधनं योगखंडेन योगो
यत्र निरूपितः ॥१२॥ संपूर्णो योगखंडस्ते कथितो व्यासवर्णितः ॥ अतः परं गामि
ष्यामि स्वाश्रममाहात्यास्वते ॥१३॥ संपूर्णं मौद्गलं तुभ्यं कथितं सर्वसिद्धिदं ॥ अतःप
रं पुराणं च नास्ति शौनकतेनमः ॥१४॥ इति श्रीमदांत्ये मौद्गले० नवम-यो०नव
मखंडे महात्म्यं नाम चत्वारिंशो ध्यायः ॥ ४०॥ शौनक उवाच ॥ पुराणे तु महाभा
ग संज्ञायैर्विविधैः परैः ॥ ग्रामे स्तेः संयुतो हं च संस्थितः खेदसंयुतः ॥१॥ अन्य
स्यै वपुराणस्य संज्ञायाः श्रवणो नमे ॥ गमिष्यं तिमहाबुद्धे विचार्येवं स्थितो भव
त् ॥२॥ आंत्यं मौद्गलं कं मुक्तासंज्ञायामे गताः पराः ॥ निः संशयः कृतः सूतत्वया

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१३० हं नात्र नात्र संशयः ॥३॥ एकोमे संशयश्चैव हृदि तिष्ठति तं नुद ॥ गच्छ पश्चात्त्वितं
स्थानं यत्र्यं मां कृत्य शांतिद ॥४॥ गतो ह्यास्य रहस्यं फलानं व्यासेन धीमता ॥ यो दु
लस्तं महच्चित्रं सर्वानिगं परात्परं ॥५॥ ततो व्यासेन शास्त्रं तत्कृतं भारतकं परं ॥ धर्मो
धर्मव्यवस्थातं ब्रह्मसायुज्यदायकं ॥६॥ तत्रादौ गणनाथस्य पूजनं स्मरणं कृतं
॥ पश्चाद्रूपेश्वरस्यैव वर्णनं न कृतं किल ॥७॥ संपूर्णभारते प्राप्ते कृतकृत्यो महा
मुनिः ॥ अत्रैव मात्र संदेहः किमिदं कौतुकं वद ॥८॥ शौनकस्य वचः श्रुत्वा सूतः
सस्मार तं गुरुं ॥ तत्क्षणात्तत्र योगीशो व्यासः समागतोभवत् ॥९॥ तं दृष्ट्वा हर्षसं
युक्ताः शौनकस्तत्प्रमुख्यकाः ॥ उत्थाय पूज्य तेनेमुः स्थाप्य पुरो जलयो भवन् ॥१०॥
ततस्तान् समिपस्थाप्य जगाद मुनिसत्तमाः ॥ व्यासः शौनकमुख्यांस्तत्रस्थां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्तप्रबोधनं ॥११॥ व्यास उवाच ॥ मया शास्त्रं कृतं विप्र सारतं नात्र संशयः ॥ तत्रायं
बुद्धिगः साक्षाद्वर्णितो ब्रह्मसंज्ञिकः ॥१२॥ सिद्धिदो ब्रह्मरूपायं मुख्यं तदेव संमतं ॥
विकुंठादय एवं वै नानायुक्ताः प्रकीर्तिताः ॥१३॥ सिद्धिबुद्धिवरेणैव मोहितो हं न संश
यः ॥ गणेशांस सर्वभावेन वर्णितुं विस्मितो भव ॥१४॥ अन्यग्रंथं ततः कर्तुं समुद्यतो भवं
मुने ॥ तत्राकाशमयी वाणी मामुवाच शृणुष्व तत् ॥१५॥ गणेश वर्णनं पूर्णं प्रशास्त्रं मा
कुरुष्व वै ॥ मोहनार्थं गणेशेन जनानां रचितं त्विदं ॥१६॥ मुद्गलं मुनिमुख्यं वै त्यज्य स
र्वे मुनीद्रकाः ॥ स्वप्ने गणपते रूपं वर्णितुं न क्षमाः कदा ॥१७॥ श्रुत्वाहं तां नमस्कृत्य सं
स्थितो मौद्गले रतः ॥ अतः संशयहीनस्त्वं मौद्गलं भज भक्तितः ॥१८॥ पुराणे तु गणे
शस्य स्वरूपं वर्णितं परं ॥ ब्रह्मणस्पतिबोधस्य दायकं नात्र संशयः ॥१९॥ तथा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१३१ विमोहिताः सर्वेविप्रा ध्यानेनगजाननं ॥ जानंतिनादृशां तेषु सिद्धिबुद्धिवरेणते ॥२०॥
गणेशो वरदानेन भक्तस्यै मोद्गलकं परं ॥ दृष्ट्वा गणेश्वरं पूर्णं ज्ञास्यंति नान्यथा क्वचि
त् ॥२१॥ अतो मोद्गलमे कल्पं भज त्वं नित्यमादरात् ॥ कलिदोषविहीनः सन् सर्वं च
लप्स्यसे परं ॥२२॥ एवमुक्त्वा महायोगी व्यासस्तत्र महामतिः ॥ विरराम च तत्रैव धू
म्रवर्णः समाययौ ॥२३॥ तं दृष्ट्वा व्यासयने मुक्तो गणेशं भक्तिसंयुताः ॥ संपूज्य नु
ष्टुवुस्तोत्रैर्गणेशं गणपप्रियैः ॥२४॥ तुष्टस्तान् धूम्रवर्णः स जगाद हास्यसंयु
तः ॥ स्वभक्तान् भक्तनाथस्तु वचनं सुखदायकं ॥२५॥ धूम्रवर्ण उवाच ॥ कल्पे प
राक्रमं सर्वं मया संपूर्णभावतः ॥ खंडितं मुनिमुख्याश्च धुनाचरत निर्भयाः ॥२६॥
एवमुक्त्वा गणाधीशस्तत्रांतर्हितधरणीतले ॥ स्थापयामास धर्मं च युक्तांश्चाका १३९

रम्यानवान्॥२७॥ उग्रादमुनिमुख्यास्तान् मौद्गलं मे रहस्यदं॥ जपध्वं नित्यमानंदाने
नाहं वत्रागोभवे:॥२८॥ नाने नसदृत्रां किंचित्स्वियं मे पूर्णभावत:॥ यत्राहं पंचधासं
स्थितो योगाकारस्वरूपधृक्॥२९॥ पंचधा मे स्वरूपं तु मौद्गलेन प्रकाश्यते॥ श्रवणे
न पुराणस्य पठने न तदर्थत:॥३०॥ मौद्गलं यत्र विप्रेन्द्राः पठ्यते श्रूयते जनै:॥ तत्रा
हं संस्थित: सर्वैर्भक्तियहयालोलुप:॥३१॥ आत्मस्थबुद्धिस्थितं रूपं वर्णितं मे तदंत्रा
व४ न:॥ तत्राहं संस्थितश्चैव निर्गुणात्मतिलक्षण:॥३२॥ ब्रह्मांडे प्रणवाकारो नानाख
लसमन्वित:॥ विश्वाकारप्रभावेणांशेन तत्र स्थितो मुदा॥३३॥ गणेशो मूर्त्तिमो
हं तु नयोर्स्तीन प्रकाशक:॥ गजवक्त्रादिचिन्है: संयुक्तस्तिष्ठामि सर्वदा॥३४॥
अन्येषु च पुराणेषु शिवविष्ण्वादिरूपधृक्॥ संस्थितस्तत्कलांशेन नानाभेदवि

१३२ द्वारतः ॥३५॥ मौद्गले योगरूपो हं तिष्ठामि नात्र संशयः ॥ सर्वेषां मे स्वरूपाणां यो
प्र२ गस्तत्र प्रकीर्तितः ॥३६॥ तेषां काशकं पूर्णं तथा योगप्रकाशकं ॥ मौद्गलं मे
प्रियं तस्मात्तन्मां नैव विघ्नते ॥३७॥ प्रतप्यासं प्रार्थितो हं तुष्टश्चादौ मुनिसत्त
माः ॥ तदा मया वरो दत्तो भक्त्ये भक्तिविवर्द्धनः ॥३८॥ तदर्थं मौद्गलं पूर्णं रचि
तं च मया पुरा ॥ मुद्गलस्य हृदि क्षिप्तं सर्वसौख्यप्रदायकं ॥३९॥ प्रयासो प्रेरि
तो योगी दक्षाय मौद्गलं परं ॥ कथयामास संपूर्णं पुराणं मे मदाकृतिः ॥४०॥ त
तः शिवादिभिर्देवैर्मुनिभिर्मरीच्यादिभिः ॥ शेषादिभिर्नरैः सर्वैः सेव्यते मे पुरा
णकं ॥४१॥ न मौद्गलं विना विप्राः स्वरूपं मे यथार्थतः ॥ ज्ञायते केन चित्क्वापि
पूर्णं सर्वप्रकाशकं ॥४२॥ अन्यत्र मे स्वरूपं तु वर्णितं पूर्णभावतः ॥ तत्र मोहो भवे १३२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नूनं सिद्धिर्भविष्यति ततः परः ॥ ४३ ॥ स्तव्यादौ सिद्धिबुद्ध्यां प्रार्थितोहं द्विजोत्तमः ॥ जगतां मोह
नार्थं च भ्रमणं खेलकारणात् ॥ ४४ ॥ तदा मया वरो दत्तो मौद्गलं त्यज्य मां कदा ॥ त्य
क्ष्यंति न च विश्वानि भ्रमापि तेषु संस्थितं ॥ ४५ ॥ अतो मां मौद्गले संस्थं भज ध्वमेकचे
तसः ॥ तेन मद्भक्तिसंयुक्ता भविष्यथ निरंतरं ॥ ४६ ॥ नातेन सदृशं किंचिन्मत्प्रीतो
साधनं परं ॥ सर्वसिद्ध्यर्थमिदं तु ज्ञानलभ्यं द्विजसत्तमाः ॥ ४७ ॥ अस्य श्रवणमात्रेणाहं
तत्कृत्यो नरो भवेत् ॥ न शाक्यं तत्फलं वक्तुमपारत्वान्मया कदा ॥ ४८ ॥ मौद्गलश्रवणे
नैव संतुष्टोहं महर्षयः ॥ दास्यामि सकलाभीष्टं शृणुध्वं निर्विशंकया ॥ ४९ ॥ शौनका
द्या ऊचुः ॥ भक्तिं देहि त्वदीयां नो योगं शांतिप्रदायकं ॥ यं यं मिच्छाम हे नाथ तं तं सि
द्ध्यतु सर्वदा ॥ ५० ॥ गाणपत्यांश्च नः सर्वान्कुरुष्व सर्वदा परान् ॥ इमान्वरान्गणा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१३३ ध्यक्षप्रार्थितान्देवदेहिनः ॥५१॥ तथेति तानथोवाच गणेशो ब्रह्मनायकः ॥ व्यासादी
न्जगादासौ वृणुध्वं वांछितान्वरान् ॥५२॥ तैस्तथैव गणाध्यक्षः प्रार्थितो गणपप्रि
यैः ॥ तथेति तानथोवाच स तं जगाद विघ्नपः ॥५३॥ वरान्ब्रूहि महाभाग त्वया संश्रावि
तं परं ॥ द्विजेभ्यस्तेन संतुष्टो दास्यामि स तथाब्रवीत् ॥५४॥ तथेति तमथोवाच सोपू
र्ववर्णो गजाननः ॥ अंतर्दधे स्वमात्मानं स्वानंदस्थो बभूव ह ॥५५॥ सर्वे संहृष्टचिता
स्ते स्वस्वस्थानं ययुस्ततः ॥ मौद्गलं तत्समाश्रित्य गणेशमभजन्परं ॥५६॥ इमां मु
द्गलजां श्लोकैः संहितां वेदबृंहितां ॥ त्रयोविंशतिसाहस्रैः सार्धशतैकसंयुतैः ॥
५७॥ अष्टाविंशत्यधिकैश्चाध्यायैश्चतुःशतैः परैः ॥ खंडैश्च नवभिः पूर्णां सर्वसिद्धि
मयीमिमां ॥५८॥ मुद्गलः कथयामास सर्वेषां हितकारणात् ॥ दक्ष ब्रह्मरहस्या १३३

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गणेशायनमः॥ श्रीगणेशायनमः॥
श्रीगणेशायनमः॥ श्रीगणेशायनमः॥
श्रीगणेशायनमः॥ श्रीगणेशायनमः॥

गणेशायनमः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry